In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

सर्वशुक्ला

(प्रथमः खण्डः)

रमाकान्त शुक्लः

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

सर्वशुक्ला (प्रथमः खण्डः)

रमाकान्त शुक्लः

देववाणी-परिषद्, दिल्ली

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

With my best Regards
and wishing you good
health and long life
May you keep on with the
marvellous work you
have undertaken.

Anerood Jugnauth.

President of the
Republic of
Mauritius
29/3/04.

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

'देववाणी-परिषद्, दिल्ली' ग्रन्थाङ्कः-९६

सर्वशुक्ला

(प्रथमः खण्डः)

(दिल्ली संस्कृत अकादम्या आर्थिकानुदानेन प्रकाशितः
संस्कृतकाव्यसङ्ग्रहः)

प्रणेता

डा० रमाकान्त शुक्लः

प्रकाशिका

देववाणी–परिषद्, दिल्ली

६, वाणी-विहारः, नयी दिल्ली-११००५९

(भारतम्)

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

सर्वशुक्ला (प्रथमः खण्डः) (संस्कृतकाव्यसङ्ग्रहः)

प्रणेता : डा० रमाकान्त शुक्लः

प्रकाशिका : देववाणी-परिषद् दिल्ली
आर-६, वाणी विहारः,
नयी दिल्ली-११००५९
फोन : 25639146

मुद्रकः : प्रवीण प्रिंटिंग सर्विस
३५, टी. एक्स्टैंशन, उत्तम नगर,
नई दिल्ली-११००५९
फोन : २५३३२७५५

संस्करणम् : प्रथमम्, २००३

प्रतिरूपाणि : १०००

मूल्यम् : रु० २५०.००

© : लेखकः

Sarvaśuklā (Vol. I) (Collection of Sanskrit Poetry)

Author : Shukla, Dr. Rama Kant

Publisher : Devavani Parishad, Delhi
R-6, Vani Vihar, New Delhi-59 (India)
Phone : 25639146

Printer : Praveen Printing Services
35, T. Extn., Uttam Nagar
New Delhi-110059 :
Ph. 25332755

Edition : First, 2003

Copies : 1000

Price : Rs. 250.00

© : Author

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

सर्वशुक्ला

(प्रथमः खण्डः)

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

आनुपूर्वी

१.	प्रास्ताविकम्	क-ठ
२.	वाणीं वयं वन्दामहे	१
३.	सुरभारती विजयते	२
४.	भाति मे भारतम्	३-५८
५.	दूरदर्शने प्रस्तुतं भाति मे भारतम्	५९-६९
६.	'भाति मे भारतम्' (परिशिष्टम्)	७०-७१
७.	भाति मे भारतमवलम्ब्य 'कविरत्न' श्यामदेवपाराशरस्य पत्रम्	७२
८.	जय भारतभूमे तथान्याः कविताः	७३-१२४
९.	भाति मौरीशसम्	१२५-१३६
१०.	भारतजनताहम् तथान्याः कविताः	१३७-३१६
११.	कवि-परिचयः	३१७-३१८
१२.	The Poet : Brief Bio Data	३१९-३२०

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

प्रास्ताविकम्

'भाति मे भारतं' नाम काव्यं मया १९७८ तमे खैष्टेऽब्दे प्रारब्धं १९८० तमे खैष्टेऽब्दे तस्य १०८ पद्यानि पुस्तकाकारेण संकलितानि। १९८१ तमे खैष्टेऽब्दे **'जय भारतभूमे !'** इत्येतच्छीर्षकान्तर्गतं छात्रावस्थायां किञ्च १९८०-८१ वर्षान्तराले रचितानां केषाञ्चित् पद्यानां संकलनं कृतम्। एतयोः काव्ययोर्मया भारतभूमेः सद्गुणाः कीर्तिताः।

अद्यत्वे, यदा भ्रष्टाचारस्य, आपराधिकवृत्तेः, अपवञ्चनाकाण्डानां च नित्यनूतना वार्ताः वृत्तपत्रेषु प्रायः प्रत्यहं प्रकाश्यन्ते, भारतस्य सद्गुणानां चर्चा नूनमेव आत्यन्तिकीं प्रासङ्गिकतां निदधाति। कदाचिदेतेषां कीर्तनेन जनानां चित्तेषु सत्पथप्रवृत्तेरुदयो भवेदेव येन राष्ट्रं पुष्टं सुरक्षितं समृद्धं प्रगतिशीलं च भवेद्। आशा बलवती ! सा न कदापि त्याज्या। तथापि भारतस्य चिन्त्यदशा नोपेक्षामर्हति। साप्यवलोकनीया एव। १९८३ तमे खैष्टेऽब्दे मया **'अहं स्वतन्त्रता भणामी'** तिरचनामुखेन भारतस्य चिन्त्यदशा संकेतिता। १९८५ तमे खैष्टेऽब्दे **'रौति ते भारतम्'** इत्यनया रचनया मया पुनरपि भारतस्यान्धकारपक्षः संकेतितः। एतादृशरचनानामपि लक्ष्यं स्वराष्ट्रोन्नतिरेवास्ति। राष्ट्रस्य चिन्त्यदशा दूरीभवतु, पुष्टि-तुष्टि-समृद्धि-प्रगति-सुरक्षा-प्रतापाः पुनरस्य वर्धन्ताम्–इत्येव कांक्षितम् भवति कटुरचनानामपि।

१९८७ तमे खैष्टेऽब्दे **'भारतजनताहम्'** इत्यस्यां रचनायां मया भारतीयजनतायाः वैशिष्ट्यमुद्घाटितम्।

मयेमाः कविताः बहुधा बहुत्र श्राविताः। **'भाति मे भारतम्'** तु सहस्रधा श्रोतृषु श्रावितं भवेत्। आकाशवाणी–दूरदर्शनमाध्यमेनाप्यस्य बहुधा प्रसारणमभूत्। २४-९-२००२ तारिकायां वाशिंगटनस्था 'लाइब्रेरी ऑफ कांग्रेस' नाम्नी संस्था स्वद्विशताब्द–समारोहावसरे ध्वन्यंकिताः विविधभाषा कविताः आन्तरजाले प्राक्षिपत् यत्र एकघण्टात्मिका मम काश्चन कविता अपि सन्ति यासु सम्पूर्णं **'भाति मे भारतम्'** काव्यमपि अन्तर्भूतम्। इदं द्रष्टुं श्रोतुं च http:// www.loc.gov/acq/ovop/delhi/salrp/shukla इत्यस्य वेबसाइटस्य दर्शनं कार्यम्।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

'सर्वशुक्लायां' 'भाति मे भारतम्', 'जय भारतभूमे', 'भाति मौरीशम्', 'भारतजनताहम्' च संगृह्य प्रकाश्यन्ते। एतासु रचनासु भक्तिभावना, प्रकृतिचित्रणं, सूक्तिविधानं राष्ट्रप्रेम च अभिव्यक्तिं लभन्ते। कासाञ्चिद् रचनानां हिन्दी-भावानुवादा अपि दीयन्ते। **'भाति मे भारतम्'** इत्यस्य आंग्लभाषानुवादोऽपि दीयते। **'जय भारतभूमे'** इत्युपशीर्षकान्तर्गतं प्रदत्तानां सर्वासामपि रचनानां हिन्दी-भावानुवादा दीयन्ते। **'भारतजनताहम्'** इत्युपशीर्षकान्तर्गतं प्रदत्तानां रचनानामनुक्रमे रचनातिथेरप्युल्लेखः कृतः। **'जय भारतभूमे !'** इत्यस्याः कविताया हिन्दीभाषायां स्वोपज्ञो वृत्तानुवृत्तानुवादोऽपि संयोजितः।

इतोऽग्रेऽहमत्र संकलितानां कासाञ्चिद् रचनानामाविर्भावस्य प्रमुखपाठस्य च स्थानानुरोधात् संक्षिप्तां चर्चां करोमि यद्यपि नास्या रसग्रहणेऽनिवार्या भूमिका वर्तते । अन्यद्धि रचनानामुत्पत्तिनिमित्तमन्यच्च प्रतीतिनिमित्तम् ।

'भाति मौरीशसम्'–इत्यस्यां रचनायामेतत्पंक्तिलेखकेन **'मौरीशस'** देशस्य प्राकृतिकं सांस्कृतिकं च रामणीयकं संकेतितम्। इयं रचना मौरीशसस्य 'मोका'स्थे महात्मा गाँधी-संस्थाने १७-३-१९८४ तारिकायां रात्रौ पादोन-दशवादनवेलायां सर्वप्रथमं मया पठितासीत्। अयं ह्यवसरः स आसीत् यदा १४–१७.३.१९८४ तारिकासु तत्र समायोजितं संस्कृत-सम्मेलनं समापनं याति स्म। मौरीशसस्य गवर्नरजनरलो महामहिम डा० सर शिवसागर रामगुलाम-महाभागः समापनोत्सवस्य मुख्यातिथिरासीत्। अहं तत्पार्श्व एव स्थित आसम्। मया यदा मौरीशसमवलम्ब्य रचितायाः कविताया विषये असौ महानुभावः सूचितस्तदा तेन कवितां श्रोतुं स्वौत्सुक्यं प्रकटितम्। तेन सार्धनववादनकाले ततो गन्तव्यमासीत्। यदा तत्सचिवस्तमानेतुमायातस्तदा तेन भोजपुर्यां स उक्तः ''पहले इनकी कविता सुनब तौ चलब'' (अर्थात् प्रथममस्य कवितां श्रोष्यामि ततश्चलिष्यामि)। तदनन्तरं मया पठितायाः अस्याः कवितायाः सजीवं 'टेलीविजन'-प्रसारणमभूत्। श्रोतृभिरस्या कवितायाः करतलध्वनभिरतीवाभिनन्दनं कृतम्। डॉ० सर शिवसागररामगुलाम-महाभागैरस्या अनुवादस्याप्यावश्यकतानुभूता। अनेकैः सज्जनैरस्याः प्रतिकृतिराकांक्षिता। तस्मिन्नेव दिने होलिकाप्यासीत्। समापनोत्सवानन्तरं महात्म-गान्धि-संस्थान-परिसर एव होलिकादहनमभूत्। अग्रिमे दिने च-'स्वस्तिका'-मन्दिर परिसरे-होलिका-क्रीडा राष्ट्रीयस्तरेण समायोजिताभूत्। तत्राप्यनेकैर्महानुभावैरस्याः कवितायाः प्रतिलिपिर्वाञ्छिता। मया शीघ्रमेव अस्याः

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

प्रकाशनं तत्र प्रतिश्रुतम्। तत्र आकाशवाणीतोऽप्यस्याः प्रसारणमभूत्। तच्छ्रुत्वा अनेकाभिर्व्यक्तिभिरस्याः प्रतिलिपिर्लब्धुं समीहिता।

अस्याः कविताया अधिकांशः १७-३-१९८४ तारिकायामेव मया व्यरच्यत। पद्यद्वयं स्वस्तिकायां होलिका-क्रीडानन्तरं रचितमासीत्। अस्यां कवितायां पञ्चषानि पद्यानि मम **'भाति मे भारतम्'** इतिशीर्षक-रचनातो यथावत् किञ्चित्परिवर्तन-सहितानि वा समाविष्टानि। मया मौरीशसदेशेऽवलोकितं यत्प्रवासिनां भारतीयानां समाजे भारतीयसंस्कृतिस्तथैव विलोक्यते यथा भारतवर्षे। अतः पञ्चषानि पद्यानि उभयोर्देशयोविषये प्रासङ्गिकानि सन्ति। मौरीशस-दृश्यावलोकनं मया श्रीदामोदर तुलसी-श्रीपरमानन्द रामलखन-श्री प्रेमहरिनाग-श्रीसुरेशरामवर्ण-श्रीत्रिभुवनजी-आचार्यरवीन्द्रनागर-महाभागैस्साकं कृतम्। तैः परिमितेऽपि काले मौरीशसस्याधिकतमः परिचयो मह्यं प्रदत्तः। दृश्यावलोकनवेलायां डॉ० सी०आर० स्वामिनाथ-महाभागानां सान्निध्यमपि सुखकरमासीत्। दृश्यावलोकनानन्तरमेव मया पद्यानि रचितान्यासन्।

वार्तालापप्रसङ्गे मौरीशसदेशे भारतीयोच्चायुक्त श्री प्रेमसिंह-महाभागेन, तत्रैव प्रथमसचिवेन श्री चन्द्रदेवसहाय-महाभागेन श्रीमदनमोहन वडेरा-श्री गोयल-श्री टण्डन-प्रभृतिभिस्तत्रत्याधिकारिभिः पत्रकारप्रवर श्री राजेन्द्रअरुणेन, चि० अनुरागनागरेण, वयोवृद्धसाहित्यकारैः श्रीवासुदेव विष्णुदयाल-महाभागै-रन्यैश्चाप्यनेकै सुहृद्भिः तत्रत्यः सांस्कृतिकः परिचयः महत्या आत्मीयतया दत्त इत्येते सर्वे महानुभावा अपि एतद्रचनायां कारणीभूताः सन्ति। एतान् प्रति स्वकृतज्ञतां निवेदयामि। एतानि पद्यानि भारत-मौरीशस-साहित्य-सांस्कृतिक-मैत्रीभावाय समर्प्यन्ते। इयं रचना सर्वप्रथमम् अर्वाचीनसंस्कृतस्य षष्ठवर्षीये द्वितीयेऽङ्के १५.४.१९८४ तारिकायां प्रकाशिताभूत्।

'अहं स्वतन्त्रता भणामि' इत्येषा कविता मया १५.८.१९८३ तारिकायां प्रणीता। सर्वप्रथमं चास्याः पाठः २१.८.१९८३ तारिकायां देववाणी-परिषदायोजितेऽखिलभारतीयसंस्कृतकविसम्मेलनेऽभूत्। तदनु डा० शिवमंगलसिंह 'सुमन' महाभागस्याध्यक्ष्ये 'उ०प्र० संस्कृत अकादेमी' समायोजिते अ०भा० संस्कृतकविसम्मेलनेऽस्याः पाठोऽभूत् य आकाशवाण्या लखनऊ-केन्द्रतः प्रसारितोऽप्यभूत्। २५.१.१९८७ तारिकायामियम् आकाशवाण्याः सर्वभाषाकवि-

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.
सम्मेलनेऽपि प्रसारिताभूत्। अस्यां कवितायां वर्तमानकालिकटुयथार्थस्य मनाक् संकेतः क्रियते, किन्तु आशावादो नैव त्यज्यते।

'उज्जयिनीयं जयति' इत्येतस्यां कवितायां मया उज्जयिन्याः शोभा उपवर्णिता। वारत्रयं तत्र प्रयातेनानेन जनेन यथानुभूतं तदत्र समुपस्थापितम्। इयं रचनाः मया ३१.११.१९८२ तारिकायां रचिता।

'रौति ते भारतम्'-इतीयं रचना मया १२.१०.१९८५ ई० तारिकायां विलिख्य नागपुरविश्वविद्यालये संस्कृतविभागेनायोजिते अखिलभारतीयसंस्कृत-कविसम्मेलने पठिता। कानिचन पद्यानि अस्यां पश्चाद्योजितानि। **'भाति मे भारतम्'**- इतिशीर्षकस्य मम संस्कृतकाव्यस्य सञ्चारिभावत्वेनेयं रचना सहृदयैः स्वीकार्या। अत्र भारतस्य चिन्त्यदशा वर्णिता।

मेघमुद्दिश्य **'क्रूरहृदय मेघ !'** इतिशीर्षकेण मया रचितायाः कविताया अपि विचित्र इतिहासोऽस्ति। १९८७-८८ सत्रे शताब्द्या भीषणतमेन शोषेण भारते अत्याचरितम्। १९८७ तमस्येशवीयाब्दस्य अक्टूबरमासं यावत् प्रायः समस्तेऽपि भारते अवृष्टिः पदं चकार। यत्र च बिहारादिप्रदेशे वृष्टिः सञ्जाता तत्र जलप्लावनेन कृषिर्विनष्टा जनजीवनं च व्याकुलीभावमापन्नम्। अस्मिन्नेवान्तराले ६.१०.१९८७ तारिकायां मध्यप्रदेशसंस्कृत-अकादम्या जाबालिपुरे **'स्वरिता'** संस्कृतगीतसंध्या आयोजिता। अकादम्याः सचिवेन सुहृद्वर्येण त्रिपाठिना डॉ० भास्कराचार्येणाहमपि काव्यपाठाय समाहूतः। ५.१०.१९८७ तारिकायां 'कुतुब एक्सप्रेस' नाम्ना रेलयानेनाहं 'हजरतनिजामुद्दीन' रेलस्थानतः जाबालिपुरं प्रति प्रस्थितः। दिल्ल्यां नैककार्यव्यापृतत्वान्नूतनां काञ्चिद्रचनां रचयितुं समयो नैव लब्धः। अतो रेलयाने एव नूतनां रचनां कर्तुं प्रवृत्तः। आगरारेलस्टेशनं यावत् शोषविभीषिकां दर्शं दर्शं स्मारं स्मारं च कानिचन पद्यानि लिखितानि। आगरातो यदा रेलयानं चलितं तदाहं सुप्तः। प्रातःकाले यदा 'माणिकपुर'--स्टेशनं निकषा उत्थितस्तदा मया आकाशे मेघघटावलोकिता। जबलपुरं च यदाहं प्राप्तस्तदा मयावलोकितं यन्मेघमहोदयः वर्षितुं प्रवर्तते इति। अयं संयोग एवासीत् उताहो कवेर्धर्षणं मनसा निशम्य मेघस्य सद्बुद्धिलाभ-इति विनिश्चेतुं ज्ञानिनो विज्ञानिन एव वा प्रमाणम्। मया तु केवलमिदमेव कथयितुं शक्यते यत् **'क्रूरहृदय मेघ!'** इतिकविताविरचनकालानन्तरमेव मेघोदयस्तद्वर्षश्च समभूताम्। कवितेयं ६.१०.१९८७ तारिकायां जाबालिपुरस्थे 'शहीदस्मारकभवने'

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

समायोजितायां गीतगोष्ठ्यां सर्वप्रथमं पठिता। ततः परं यत्रापि श्राविता तत्रैव वृष्टिरजायत। १६.१०.१९८७ तारिकायाम् श्रद्धेयाचार्यश्रीरमेशचन्द्रशुक्लमहोदयानां पुरतः इयं कविता दिल्ल्यां पठिता। १७.१०.१९८७ तारिकायां दिल्ल्यामपि मेघाच्छन्न आकाशो दृष्टः। १८.१०.१९८७ तारिकायां दूरदर्शने दृष्टं यत् इन्दौरनगरे 'रिलायंसकप-क्रिकेटस्पर्धा' वृष्टिवशात्स्थगिता। एवमेव देववाणी-परिषत्समा- योजिते दशमेऽखिलभारतीयकविसम्मेलने १३.१२.१९८७ तारिकायां यदेयं कविता पठितासीत्तदनन्तरमपि वृष्टिः सञ्जाता। अस्तु, इयं कविता 'अर्वाचीनसंस्कृतस्य' नवमवर्षीये चतुर्थेऽङ्के प्रकाशिता जाता, या पाठकैरवलोकिता स्यात्।

यद्यपि **'क्रूरहृदय मेघ'** इतीयं रचना १९८७ तमेशवीयेऽब्दे शोषकाले रचितासीत् तथापि अस्यां सार्वकालिकी काचित् प्रासंगिकतापि सहृदयैः साक्षात्कर्तुं शक्यते। स्वनियोगं योऽशून्यं न करोति तस्मै इयं रचना कदापि कुत्रापि अन्योक्तिरूपेण श्रावयितुं शक्यते। एवमेव **'अकालजलद !'** इतीयमपि रचना अन्योक्तित्वेन ग्रहीतुं शक्यते।

'अकालजलद !'इत्येतस्यां कवितायां मया परिणतसस्यविनाशको मेघ उपालब्धः। १३.३.१९८८ तारिकायां रात्रौ उत्तरभारतस्य केषुचित्स्थानेषु कृषिविनाशकरी भयंकरी उपलवृष्टिः सञ्जाता। दिल्ल्यामनया वृष्ट्या यद्यपि आकाश उज्ज्वलीकृतः, हरीतिमा प्रवर्धितः, वृक्षाः प्रक्षालिताः वायौ मिश्रिते 'सल्फर डाई आक्साइड'-'कार्बन मोनो आक्साइड' नामधेये वाती च अपाकृते किन्तु गाजियाबादजनपदान्तर्गतषडशीतिग्रामस्थितानि परिणतगोधूम-यव-चणक-सर्षपवन्ति क्षेत्राणि भयंकरकरकानिपातेन ध्वस्तानि। सप्तोत्तरैकशतसंख्याकग्रामेषु पाकोन्मुखकृषिः बहुहानिं सोढवती। **'जनसत्ता'**-**'नवभारत टाइम्स'**-प्रभृति-दैनिकपत्रैरेतद्विषये दीर्घाः समाचारा अपि प्रकाशिताः। मया तु समाचारपठनात्पूर्वमेव मनसि मेघोऽधिक्षिप्तः। १३.३.१९८८ तारिकायां निशीथे **'अकालजलदम्'** (अकाले=असमये जलदम्) अभिलक्ष्य कवितायाः प्रथमं पद्यं विरचितम्। पृथिव्याः मनस्तापः 'पृथ्वी'च्छन्दसैवाभिव्यक्तः। १४-१५.३.८८ तारिकयोः अनेनाकाजलदेन कृता कृषिविनाशलीला वृत्तपत्रेषु सविशेषं प्रकाशिता पठिता। १६.८.८८ तारिकायां दिल्ली-प्रशासन-संस्कृत-अकादम्या नवदिल्लीस्थ-'फिक्की'--सभागारे आयोजिते अखिलभारतीयसंस्कृतकविसम्मेलने इयं कविता सर्वप्रथमं पठिता या १.४.१९८८ तारिकायां दिल्लीदूरदर्शनात् प्रसारिताप्यभूत्।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

संयोग एवायम् उताहो मेघेन कवेर्भाव आदृतः, परमेश्वर एव जानाति। अतः पर ग्रीष्मर्तौ कुत्रापि परिणतसस्यमयेषु क्षेत्रेषु उपलवृष्टिर्नैव जाता।

मया पूर्वम् **'अकालजलदे'**तिशीर्षकेण असमये करकानिपानतार्थं मेघ उपालब्ध आसीत्। अन्तिमे पद्ये च कथितमासीत्–

"यथासमयमस्तु ते जलद ! गर्जनं वर्षणम्
यथासमयमस्तु ते समुदयस्तथा विश्रमः ।"

संयोगतः १९८८ ई० तमे वर्षे आषाढस्य प्रथमदिवस एव मेघोदयः संजातः। जूनमासस्य २८–३० तारिकासु मध्यप्रदेशे मया दृष्टं यत्सुकाले समागतं मेघं कर्षकाः प्रमुदितेन मनसा अभिनन्दन्ति। इयं सुवृष्टिः देशस्य कृते अत्यन्तं लाभप्रदासीत्। जुलाईमासस्य सप्ताहद्वये देशस्य विभिन्नभागेषु सुवृष्टिर्भूता। श्रावणे भाद्रपदेऽपि सुवृष्टिः स्यादिति परमेशो मया प्रार्थितः।

मया सुकालवारिदाय **'स्वागतं पयोद ! ते'**इतिशीर्षकेण गीतेन स्वागतं व्याहृतम्। यदि कञ्चित् अनर्थकारिणं जनं वयमधिक्षिपामस्तर्हि सदर्थकारिण-मुपश्लोकयितुमप्यस्माभिस्तत्परैर्भाव्यमेव ! इयं रचना १.७.१९८८ तारिकायां प्रारब्धा, १५.७.८८ तारिकायां च पूर्तिं गता। दिल्लीदूरदर्शनतोऽस्या बहुधा प्रसारणमभूत्।

'एकं सद् बहुधा विलोक्यते भारतम्' इति शीर्षक-रचनायां भारतस्य अनितरसाधारणं वैशिष्ट्यम्–अनेकत्वे एकत्वम्–समुन्मीलितम् । यदि भारतस्य पादे कण्टकं निविशते, यदि वा शिरसि वेदना सञ्जायते, तर्हि अस्य निखिलतनौ मर्मान्तकपीडा भवति। यदि क्वचिदपि सुखसमृद्धिः समुन्नतिर्वा जायते तदा सम्पूर्णमपि भारतं हृष्यति। भारतं केवलं शासनमेव नास्ति अपितु कोटि-कोटिजनपरिश्रमो भारतं सन् द्योतते। सत्याहिंसार्जवश्रमादिगुणैर्विशिष्टं भारतं वैविध्येन विलसितमप्यखण्डमेवास्तीत्यस्या रचनाया हृदयम् । इयं रचना ३१.१.१९८९ ई० तारिकायां प्रणीय मया तस्मिन्नेव दिने कमानीसभागारे दिल्ली संस्कृत-अकादेमीसमायोजितेऽखिलभारतीयसंस्कृतकविसम्मेलने पठिता।

'जाबालिपुरं चल......' इतीयं रचना २२.१२.१९८८ ई० तारिकायां प्रणीतासीत्। जाबालिपुरे (जबलपुरे) मध्यप्रदेशसंस्कृताकादम्या रानीदुर्गावती-विश्वविद्यालयसंस्कृतपालिप्राकृतविभागेन च २२–२३.१२.१९८८ ई० तारिकयोः **'राजशेखरशोधसंगोष्ठी'** आयोजितासीत्। तस्मिन्नवसरे २३.१२.१९८८

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

ई०तारिकायां समायोजिते **'संस्कृतविसमवाये'** इयं रचना मया पठिता। कविसमवायस्याध्यक्ष्यमाचार्यबच्चूलालावस्थिभिः कृतम्। तत्र ये कवय आमन्त्रिता आसन् तेषां संकेतः पञ्चमे पद्ये कृतः किन्तु डा० रेवाप्रसादद्विवेद–डा० कमलेशत्रिपाठिनावपरिहार्यकारणैस्तत्र काव्यपाठाय न सुलभीभूतौ। शेषे सर्वेऽपि कवय उपस्थिता आसन् । डा० भास्कराचार्यत्रिपाठिना कविसमवायस्य सञ्चालनं कृतम्।

'वदत नेतारो मनाक्'–इतीयं रचना मया २९.१०.१९९० ई० तारिकायां दिल्ली-उज्जयिनीमार्गे रेलयाने कृता। ततः पूर्वं विगतमासत्रये अस्माकं नेतृभिः मण्डल- आयोगप्रसङ्गेन, रामजन्मभूमि–विवाद–प्रोद्दीपन–प्रसङ्गेन अन्यैश्च कपटकृत्यैः देशोऽयं यां दुर्दशां प्रापितस्तदर्थमस्मादृशैर्निरीहैस्ते कथं क्षन्तव्याः स्युः ! रेलयानानां निरसनैर्निरागसां निग्रहैः, पदे–पदे विभेदस्थापनैः, ग्रामीणानां नागरिकाणां च चेतस्सु वैमनस्योद्दीपनैः, दूरदर्शने च स्वभाषणैः राष्ट्रस्य अखण्डतायाः खण्डनैरद्यतननेतृभिः जनादेशदातारो यथा वञ्च्यन्ते तदर्थमेवास्यां रचनायामेते नेतारोऽधिक्षिप्यन्ते। अस्या रचनायाः प्रथमः पाठ उज्जयिन्यां त्रयस्त्रिंशत्तमकालिदाससमारोहावसरे समायोजिते संस्कृतकविसमवाये २.११.१९९० तारिकायामजायत। दीर्घेयं रचना न काञ्चिद्विशिष्टां व्यञ्जनां निदधाति, अभिधयैव प्रायः सर्वमत्र पृच्छ्यते दिश्यते च। यद्यस्माकं नेतारोऽभिधामपि अवगच्छेयुस्तदाप्यस्या रचनायाः साफल्यं स्यात्। आशास्यते, यत्कश्चिज्जनोऽवश्यमेवैतस्या अनुवादं विधाय नेतॄणां कर्णकुहरेषु पातयिष्यति। कालो ह्ययं निरवधिर्विपुला च पृथ्वी ! यद्यपीदमपि सत्यम्–स्वभावो दुरतिक्रम इति।अस्या रचनाया अनेकानि पद्यान्यप्रकाशितान्यवशिष्यन्ते; यथा–

आत्मादाहान् वीक्ष्य धरणी कम्पते शोकाकुला ।
किन्तु करुणा नो स्पृशति रे कौटिकाः युष्मान् ! मनाक् ॥

'किं जीवनं ते' इतीयं रचना मया २९.३.१९९१ तारिकायां 'नीलाचल एक्सप्रेस'–रेलयानेन नवदिल्लीतो रायबरेलीं गच्छता कृता। इयं हि मुक्तकानां समूहोऽस्ति यत्र प्रत्येकं मुक्तकं स्वतन्त्रं वर्तते। इयं हि उर्दूगजलशैलीमनुधावति। इयांस्तु विशेषो यदत्र मुक्तकानां संख्या गजलतोऽधिकतरी विद्यते। अत्र कवेरनुसारं जीवनस्य साफल्यसाधकानां तत्त्वानां संकेतो विधीयते क्वचिच्च हास्यव्यङ्ग्य-संस्पर्शोऽप्यत्र द्रष्टुं शक्यते। भाषा तु सरलैवेति मन्ये। अस्याः सर्वप्रथमः पाठो

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

मया रायबरेलीनगरस्थे फीरोजगान्धीमहाविद्यालये ३०.३.१९९१ तारिकायां कृतः। महाविद्यालयीयप्रेक्षागारे महाकविकालिदासविषयिण्याः संगोष्ठ्याः समापन-सत्रस्याध्यक्षतां कुर्वाणेन मयेयम् 'अभिराज' डा० राजेन्द्रमिश्रस्य मुख्यातिथित्वे किञ्च डा० इन्द्रदेव द्विवेद-डा० सुधाकराचार्य त्रिपाठि-डा० आर०पी० सिंह-डा० रसराज-डा० यदुनाथप्रसाददुबे-डा० कृष्णकुमार मिश्र-डा० जनार्दनप्रसाद पाण्डेय 'मणि'-डा० प्रशस्यमित्रशास्त्रि-प्रभृतीनां विद्वत्कवीनां समक्षं डा० शिववरण-शुक्लस्य संयोजकत्वे तत्रत्यच्छात्राध्यापकानामतिथीनां च पुरतः श्रावयित्वा तदाशिषां पात्रीकृता। तदनु ३१.३.१९९१ तारिकायां बरेली नगरे 'अल्पना' नाम्न्याः संस्थायास्तत्त्वावधानेऽस्याः पाठोऽभूत्। १४.४.१९९१ तारिकायामस्या केचनांशाः आकाशवाण्या दिल्लीकेन्द्रात् प्रसारितायां **'रक्षको यत्र भक्षकः'**, इति मे वार्तायामपि उद्धृता जाताः। राजधानीकालेजस्य प्राध्यापकबन्धुभिः, कर्मचारिभिश्छात्रैश्चापीयं श्रुता।

२१.५.१९९१ तारिकायां स्वराजनेतृधर्मं पालयन् पेरम्बदूरनाम्नि स्थाने निर्वाचन-प्रचारार्थं गतः श्रीराजीवगान्धी यया निर्ममतया अदृष्टाश्रुतपूर्वया च रीत्या कैश्चिन्नृशंसैर्मारितस्तेन को नाम न स्तब्धः को वा च न शोकाभिभूतः? सौम्यमूर्तेः श्रीगान्धिनो विरोधिनोऽपि अनया हत्यया दुःखिता एव। यत्र देशे अहिंसैव वास्तविकी हेतिर्मन्यते—तत्र हिंसाया उन्मुक्तं ताण्डवं वीक्ष्य लज्जा दुःखं चानुभूयेते। जातस्य मरणं ध्रुवमस्ति किन्तु यदि अहिंसामार्गोऽस्माभिः पालितोऽभविष्यत्तदा महात्मा गान्धी, श्रीमतीन्दिरा गान्धी, राजीव गान्धी, दीनदयाल उपाध्यायः, जनरलवैद्यः—एतादृशा जना अस्मन्मार्गदर्शनाय अधिकदिनानि यावत्सुलभा अभविष्येरन्। यः कोऽप्यस्मिन् देशे अस्थाने हिंसाकर्म प्रेरयति स नूनमेव देशस्य भारतीयसंस्कृतेश्च शत्रुरस्ति। **'ब्रूहि जगन्नाथस्वामिन्'** इत्यस्यां रचनायाम् श्रीराजीवगान्धिनो हत्याया निन्दया साकं तत्र शोको व्यज्यते। इयं रचना मया पुरीनगर्यां ६.६.१९९१ तारिकायां श्रीजगन्नाथ-संस्कृत- विश्वविद्यालये पठिता। इयं रचना मया उत्कलएक्सप्रेसनाम्नि रेलयाने ५.६.१९९१ तारिकायां प्रारभ्य ६.६.१९९१ तारिकायां पुर्यां पूरिता। अत्र 'माला भूता व्याली' 'प्रणतिर्भूता प्रहृतिः'-इति शब्दैः श्रीराजीवगान्धिनो हत्यायाः पूर्वं महिलया कृतस्य माल्यार्पणस्य चरणस्पर्शस्य च भयानकत्वं कपटपूर्णत्वं च संकेत्येते।

'धन्वतरि तमीडे' इति शीर्षका रचना मया नेपालदेशे काठमाण्डूनगरे १३-१५.९.१९९१ तारिकासु आयोजितस्य 'द्वितीय अन्तरराष्ट्रीयायुर्वेद-सम्मेलनस्य'

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

उद्घाटनाधिवेशने सर्वप्रथमं पठितासीत्। 'अन्तरराष्ट्रीयआयुर्वेद-संस्थानस्या'ध्यक्ष-वर्य्यैर्वैद्यराजपण्डितश्रीजगदीशप्रसादशर्मभिस्तदात्मजैः कविराजवेदव्रतशर्मभिश्चाहं काञ्चिद् धन्वतरिस्तुतिं तत्र पठनार्थमाहूतः। मया ८.९.१९९१ तारिकायामियं रचना प्रणीय तत्सकाशे प्रेषिता। तैश्च द्रागेव सम्मेलनस्य स्मारिकायामपीयं मुद्रापिता; विश्वस्यायुर्वेदविदां हस्तेषु च प्रापिता।

दिसम्बर १९९२तः सार्धमासं यावदपि भारतस्य नैकेषु स्थानेषु अशान्तिरदृश्यत। अयोध्यायां ६ दिसम्बर १९९२ ई० तारिकायां यज्जातम् तत्र सन्ति समीक्षकाणां विप्रतिपत्तयः । केषाञ्चिमतानुसारं मातृभूमेः कलंकमपसार्य कारसेवकैः स्तुत्यमाचरितम्, केषाञ्चिन्मतानुसारं विवादास्पदभवनेन साकं भारतस्य प्रजातन्त्रमेव भूमिसाज्जातम्, केषाञ्चिद् दृशा इदं कृत्यं राष्ट्रद्रोहि वर्तते, केचित् पुनरत्र धर्मनिरपेक्षतां प्रति संकटं वीक्षन्तेस्म। अस्माकं राजनेतारस्तु निर्गते सर्पे कञ्चुलं ताडयन्तिस्म। चत्वारो राज्यसर्वकारा भग्नाः। दिल्ली-कर्णपुर-अहमदाबाद-मुम्बई-सुरत- प्रभृतिषु स्थानेषु प्रथमं साम्प्रदायिकाः कलहास्तदनु च अन्यप्रकारका उपद्रवाः विजृम्भिताः यत्र निर्दोषनृणां हत्या जाता। केषाञ्चित् जिह्वा कृत्ताभूत्। कुत्रचित् निग्रहो भवतिस्म, कुत्रचित् कैश्चन निर्भयं गणतन्त्रदिवसस्य बहिष्कारः समुद्घोष्यतेस्म, कैश्चित्पुनः गृहयुद्धस्योद्घोषः क्रियतेस्म। भारतस्य राष्ट्रपतिना उच्चतमन्यायालयः किमप्यन्वेष्टुं प्रार्थितः।

अन्यदपि यद्देशे प्रतिवेशिदेशेषु विदेशेषु च जातं–तस्य परिचयोऽस्माभिः समाचारपत्रेभ्यः संचारमाध्यमैश्च लब्ध एव। उपद्रविणां कृते अन्यदेशीयः शस्त्रास्त्रसंघातो देशे प्रविष्ट इत्यपि वृत्तपत्रेषु पठितम् ! हन्त ! देशस्य दौर्भाग्यम्। कीदृशाः नेतारः ! कीदृशा बुद्धिजीविनः! कीदृशी सद्भावनायात्रा ! कीदृशी च भाविनी निर्वाचने दृष्टिः ! देशस्य पुनर्नास्ति कापि चिन्ता ! अस्यामेव पृष्ठभूमावनेन जनेन **'वन्दनीयास्ते !'** इत्येच्छीर्षकाणि पद्यानि लिखितानि। अत्र 'वन्दनीया आस्ते' 'वन्दनीयाः ते' 'वन्दनीयाः ते(तव)' इति त्रिधा अर्थो भवितुं शक्नोति। सहृदयैर्यथास्थानं ज्ञेयम्। एतेषां मुक्तकानां रचना १४.१.१९९३ ई० तः पूर्वमेव जाता। अनेकानि पद्यानिं अप्रकाशितान्येव तिष्ठन्ति। एतेषां प्रथमः पाठो मया १६.१.१९९३ ई० तारिकायाम् 'आर-६ वाणी विहार, नयी दिल्ली' इत्यत्र आयोजितायां **'मन्दाकिन्याः'** काव्यगोष्ठ्यामक्रियत। तदनु गणतन्त्रदिवसमुपलक्ष्य २०.१.१९९३ ई० तारिकायां दिल्लीस्थे हिमाचल-भवने दिल्लीसंस्कृताकादम्या समायोजितेऽखिलभारतीय-संस्कृतकविसम्मेलने कानिचन पद्यानि मया पठितानि। उभयत्रापि सहृदयैरेतानि पद्यानि स्वहृदयसंवादैर्लालितानि।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

'मदीय कविते! कुरुष्व गानम्' इत्येषा रचना मया उज्जयिन्यां कालिदाससमारोहे २६.१२.१९९३ ई० तारिकायां समायोजिते संस्कृतकविसमवाये, वाराणस्यां डा० सम्पूर्णानन्द-विश्वविद्यालययस्य महाभवने ४.१.१९९४ ई० तारिकायां रात्रौ समायोजिते 'डा० सम्पूर्णानन्द-जन्मशताब्दी-संस्कृतकविसम्मेलने' 'दिल्ली संस्कृत अकादम्या' २१.१.१९९४ ई० तारिकायां नवदिल्ल्यां हिमाचल-भवने समायोजितेऽखिलभारतीयसंस्कृतकविसम्मेलने च पठिता। अत्र जगणादि षोडशमात्रात्मकं वृत्तं मयानुवृत्तम्। अस्य नाम 'षोडशी' ति मया कल्पितम्।

१६.१२.१९९८ ई० तारिकायां दिल्लीसर्वकारस्य उर्दूहिन्दीसिन्धीपञ्जाबी-संस्कृतकादमीभिः 'शाह आडीटोरियम' इत्यत्र **'विजयदिवसस्य'** समायोजनं कृतम्। तत्र संस्कृतकविरूपेणाहमामन्त्रितोऽभूवम्। तत्र मया **'भारतस्य विजयोऽयम्'** नाम्नी रचना पठिता यस्यां भारतीयसैनिकानां शौर्यं गीतम्।

२४.१२.१९९९ ई० तारिकायां ख्रैष्टदिनाङ्कानुसारं मम एकोनषष्टितमो जन्मदिवस आपतितः। कैश्चन मित्रैरयं जनो दूरभाषेण वर्धापितः। तस्मिन्नेव दिने सायंकाले दूरदर्शनसमाचारतो ज्ञाता इण्डियनएयरलाइन्स-814-विमानापहरणस्य सूचना। जन्मदिवसोल्लासस्तिरोहितः। २५.१२.१९९९ ई० तारिकायां प्रधानमन्त्रिणः श्रीअटलबिहारीवाजपेयिनो जन्मदिवस आसीत्। तमवलम्ब्य प्रस्ताविताः सर्वेऽप्युत्सवाः निरस्ता जाताः। देशे चिन्तौत्सुक्यादिभावा आविरभूवन्। पुनः सञ्चारमाध्यमेभ्य आतङ्कवादिभिर्निर्दयं व्यापादितस्य रूपेनकतियालस्य वार्ताधिगता। चतुर्विंशतिसंख्याकानां यात्रिणां दुबई-विमानपत्तने मुक्तिः श्रुता, दृष्टा च। विमानापहर्तॄणां दुर्दान्तातङ्कवादिनां मोक्षण-विषयिणी कांक्षापि श्रुता। भोपाल- वास्तव्याया भट्टाचार्यबालिकाया दृढनिश्चयपरं वक्तव्यमपि श्रुतम्। अस्मिन्नेवान्तराले पूर्वराष्ट्रपतीनां डा० शङ्करदयालशर्मणां निधनवार्तापि श्रुता। भारतराष्ट्रे विचित्रा मनःस्थितिरदृश्यत लोकानाम्। अन्ते च भारतशासनेन यथातङ्कवादिनो मुक्ता यथा च विमानापहर्तारः कन्धारविमानपत्तने विमानान्निःश्रेण्या नीचैरवतीर्य वाहनेन स्वं लक्ष्यं प्रति प्रयाता यथा च बन्धकीकृता यात्रिणो दिल्लीं प्राप्तास्तत्सर्वमवलोकितम्। भारतशासनस्य प्रधानमन्त्रिणः सन्देशो दूरदर्शनतः प्रसारितो दृष्टः श्रुतश्च। एवमस्य काण्डस्य पटाक्षेपः १९९९ तमे एवे वर्षे सञ्जातः। आलोचना-प्रत्यालोचना अपि प्रावर्तन्त। विकटा स्थितिरासीत्। एतस्यां स्थितौ वीरमातरः, वीरविधवाः, वीराः किं किमनुभवन्ति स्म तदपि न कस्याप्यपोहितम्। यात्रिणो मुक्ता-इत्याश्वस्तिः सर्वस्यैव प्रियङ्करी किन्त्वस्माकं

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

सुरक्षाव्यवस्थां वञ्चयित्वा यथातङ्कवादिभिः प्रश्ना अस्मत्समक्षं स्थापितास्तत्रावश्यमेवावहितव्यमस्माभिः। **'वयं राष्ट्रे जागृयाम'**-इत्येतत्संस्कृत-वर्षादर्शवाक्यमवश्यं स्मर्तव्यम् पालनीयञ्चेति मतिरजायत।

१.२.२००० ई० तारिकायां पौषकृष्णदशमी तिथिरासीत्। इयं तिथिर्वैक्रमसंवत्सरानुसारं मम जन्मतिथिरासीत्। इत्थं मदीययोर्जन्मदिवसयोर्मध्ये एकतो देशेन आतङ्कभयवैवश्यदुःखस्थितयोऽवलोकिताः, अपरतश्च आश्वस्तिरपि काचिदधिगता। मयापि भावसिन्धरनुभूतः। भावसन्धेरियं दशा सप्तभिः पद्यैः वर्णिता यस्यां देशस्य शुभोदर्कः काम्यते, मनुजतायाश्च मङ्गलमिष्यते।

'त्वं चन्दनमसि' इतीयं रचना १३.२.२००० तारिकायां विरच्य तस्यामेव तारिकायां रात्रौ दिल्ल्यां प्यारेलालभवने समायोजिते सन्तरविदास जयन्ती-बहुभाषा-कविसम्मेलने मया श्राविता । अस्यां दोहाच्छन्दसि संतश्रीरविदासस्य 'प्रभुजी! तुम चन्दन हम पानी'ति रचनायाः संस्कृतरूपान्तरं प्रस्तोतुं प्रयासः कृतः ।

२००१ तमे खैष्टाव्दे जनवरी मासे तीर्थराजे प्रयागे महाकुम्भमेला आयोजिता। मकरसङ्क्रान्त्यवसरे महाकुम्भपर्वस्नामभूत्। मया १४.१.२००१ तारिकायां प्रातः दूरदर्शनतः प्रसारितं 'शाहीस्नान'-दृश्यमवलोकितम् तदनु च **'महाकुम्भे'** इत्येतच्छीर्षकयुता एका रचना प्रणीता। इयं रचना मया दिल्ली-संस्कृत-अकादम्या २०.१.२००१ तारिकायाम् इन्द्रप्रस्थविश्वविद्यालयप्रेक्षागारे समायोजिते अखिलभारतीयसंस्कृतसम्मेलने सर्वप्रथमं प्रस्तुता।

१४.७.२००१ तः १६.७.२००१ यावत् आगरानगरे 'भारतपाक-शिखरवार्ता' समायोजितासीत्। १४.७.२००१ तारिकायां पाकाधिपतेर्दिल्ल्यामवतरणमभूत् १६.७.२००१ तारिकायां च निशीथे विना कमपि निर्णयं वार्तावैफल्ये सः स्वदेशं प्रस्थितः। २०.७.२००१ तारिकायां तेन इस्लामाबादे 'प्रेससम्मेलनं' कृतम्। भारतीयपक्षतः भारतीयविदेशमन्त्रिणा १७.७.२००१ तारिकायां प्रेससम्मेलनं कृतम्। पर्वतखनननानन्तरं मृतमूषिकोपलब्धिन्यायेन किमेतया शिखरवार्तया लब्धमिति तु देशनायका एव जानीयुः किन्तु समग्रस्य राष्ट्रस्य दूरदर्शनावलोकनकाले परिणामं कमप्यलब्ध्वा रक्तचापस्तु वृद्धिं गत एव। **'शाम्येत्प्रत्यपकारेण नोपकारेण दुर्जनः'** इतीयमुक्तिर्न जाने किमिति विस्मर्यते। दिष्ट्या स्वातन्त्र्यदिवसे प्रधानमन्त्रिणा 'लालकिला' सम्बोधने जम्मूकश्मीरे आतंकवादमुन्मूलयितुं कठोरोपायानामवलम्बनमुद्घोषितम् येनाश्वस्तिं काञ्चिदलभत नश्चेतः। अस्मिन्

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

प्रसंगे मया आत्मयोक्तिशैल्या **'मित्रतां कामये शात्रवं चाश्रये'** इतीयं रचना प्रणीता यत्रास्माकमतिथिरस्माकमुत्तमाङ्गं वाञ्छन्नात्मानं चतुरशिरोमणिम्मन्यते !

'भारतस्य जनता समीक्षते' इतीयं रचना मया २४.१२.२००१ तमतारिकायां प्रणीता। अस्यां भारतस्य जनताया जागरूकता संकेतिता। अस्या सार्वजनिक: पाठो मया सर्वप्रथमं दिल्ली-संस्कृत-अकादम्या १०.८.२००२ ई० तमे दिनांके रघुवीरनगर-नवदिल्लीस्थ-श्री हनुमानसंस्कृतविद्यालये समायोजिते स्वातन्त्र्यपर्वसंस्कृतकविसम्मेलने कृत:।

'किं कुर्यात्' इतीयं रचना मया श्री ला.ब.शा.रा.सं. विद्यापीठेनायोजिते कविसमवाये २६.२.२००२ ई० तारिकायां पठिता यत्र विविधघटनाप्रसङ्गेषु वैवश्यव्यञ्जकानि मुक्तकानि संकलितानि सन्ति।

एतदतिरिक्तमपि मया विविधसंस्थाभिरायोजितेषु कार्यक्रमेष्वेता रचना पठिता:। प्रायोऽहं रचना: सस्वरमेव पठामि। वस्तुत: कस्याचिद्रचनाया आविर्भावस्य किञ्चिन्निमित्तं भवति, किञ्चित्स्थानं भवति, कश्चित्कालो भवति। किन्तु विनापि तदितिहासज्ञानं सहृदयास्तां रचनां स्वभावयित्र्या प्रतिभया स्वीकुर्वन्ति। सहृदयानामर्थबोधो भवति कश्चन लोकोत्तरोऽनुभव:। ते नेदं ज्ञातुं समुत्सुका भवन्ति कुत्र कदा वेयं रचना प्रसूतेति। तेषां प्रतिभया रचनाया अर्थान्तरेऽपि संक्रमणं संभवम्।

श्रोतॄणामभावो मया कदापि नानुभूत:। भगवत्या: सर्वशुक्लाया: सरस्वत्या: प्रसाद एवायम्। जयन्तु सहृदया:! जयताच्च कविवाणी !

अथ च, 'सर्वशुक्लाया:' प्रकाशनार्थं 'दिल्ली संस्कृत अकादमी' आर्थिकानुदानं प्रतिश्रुतवतीति तस्यै हार्दिकान् धन्यवादान् ज्ञापयामि।

देववाणी-परिषद: षण्णवतिसंख्याकग्रन्थरूपेणास्या: प्रकाशनं भवतीति तां प्रत्यपि कृतज्ञोऽस्मि।

'रमालय:' आर ६ वाणी विहार:,
नयी दिल्ली-११००५९
अक्षयतृतीया, वैशाख शुक्ल ३ वि०सं० २०६०
दि० ४.५.२००३ ई०

सहृदयाधीन:

(रमाकान्त शुक्ल:)

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

वाणीं वयं वन्दामहे !

कुन्देन्दुहिमधवलां धवलवस्त्रावृतां हंसस्थितां
वरकच्छपीझङ्कृतिपरां ब्रह्मेशनारायणनुताम् ।
मालाधरां पुस्तकधरां निःशेषजाड्यविलोपिनीम्
अक्षय्यविद्याविभवदां वाणीं वयं वन्दामहे ॥१॥

यस्याः स्मरणमात्रेण पुम्भिर्लभ्यते ज्ञानप्रभा
यस्याः कृपालवलेशतः सुलभा शुभा वाचो विभा ।
शब्दार्थगुणवृत्तिप्रदां रीतिप्रदां रसदायिनीम्
ध्वन्यौचितीवक्रोक्तिदां वाणीं वयं वन्दामहे ॥२॥

प्रतिभाप्रदां व्युत्पत्तिदामभ्यासदां रचनात्मिकाम्
गद्यात्मिकां पद्यात्मिकां स्वरताललयतानात्मिकाम् ।
श्रव्यात्मिकां दृश्यात्मिकां कविसहृदयाख्याधारिणीम्
वागात्मिकां नादात्मिकां वाणीं वयं वन्दामहे ॥३॥

निगमागमाकृतिधारिणीं सच्छास्त्रचिन्तनरूपिणीम्
विज्ञान-दर्शन-साहिती-भाषा-विभाषा-रूपिणीम् ।
शिक्षा-निरुक्त-व्याकरण-कल्पात्मिकां लिपिरूपिणीं
छन्दोमयीं ज्येतिर्मयीं वाणीं वयं वन्दामहे ॥४॥

विश्वं समस्तं मूकवज्जायेत यत्कृपया विना
भुवनं भवेदन्धं तथा यस्या दयालोकं विना ।
दूरेऽन्तिके वा तिष्ठतां तां योजयित्रीं प्राणिनां
लोकावलम्बनरूपिणीं वाणीं वयं वन्दामहे ॥५॥

यास्ते परा पश्यन्तिका या मध्यमा या वैखरी
सृष्टिस्थितिप्रलयेश्वरी सुयशस्करी मंगलकरी ।
तमसो जनान् ज्योतिर्नयति या, तां विधातुर्गेहिनीं
शुक्लां सुमतिदां मातरं वाणीं वयं वन्दामहे ॥६॥

(रचनातिथिः १४-९-१९९४)

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

सुरभारती विजयते

निगमागमैरुपेता विज्ञानरत्नरम्या ।
वेदाङ्गपूतकाया सुरभारती विजयते ॥

जयदेवशुभ्रगीतिः कविकालिदासकीर्तिः ।
सौमिल्लभासहासा सुरभारती विजयते ॥

तत्त्वं विचारयन्ती ज्ञानं प्रचारयन्ती ।
चित्तं विकाशयन्ती सुरभारती विजयते ॥

लोकं प्रबोधयन्ती शोकं विदारयन्ती ।
चिन्तां विनाशयन्ती सुरभारती विजयते ॥

'विद्या ददाति विनयं' 'सत्यं सदा विजयते' ।
इत्यादि कीर्तयन्ती सुरभारती विजयते ॥

अज्ञैर्मृतेति गदिता ह्यमरत्वभावभरिता ।
नित्यं प्रवर्धमाना सुरभारती विजयते ॥

गीतासुघोषदात्री लालित्यभावधात्री ।
नित्यं च सर्वशुक्ला सुरभारती विजयते ॥

(रचनातिथिः २४-१२-१९७५)

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.



भाति मे भारतम्

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

❋ समर्पणम् ❋

भारतं वर्तते मे परं सम्बलं,
भारतं नित्यमेव स्मरामि प्रियम् ।
भारतेनास्ति मे जीवनं जीवनं,
भारतायार्पितं मेऽखिलं चेष्टितम् ॥

भारताद्भाति मे भूतलं भूतलं,
भारतस्य प्रतिष्ठास्ति मे मानसे ।
भारतेऽहं प्रपश्यामि विश्वेश्वरं,
भारत! क्षोणिश्रृङ्गार ! तुभ्यं नमः॥

भारत मेरा परम सहारा है; मैं प्यारे भारत का नित्य ही स्मरण करता हूं; भारत से ही मेरा जीवन जीवन है; मेरी समस्त चेष्टाएं भारत के लिए समर्पित हैं; भारत से ही मुझे भूतल भूतल दिखाई देता है; भारत की प्रतिष्ठा मेरे मन में समायी है; मैं तो भारत में विश्वेश्वर भगवान् का दर्शन करता हूं। धरती के सिंगार भारत! तुझे नमस्कार है!

Bharat is my ultimate resort, I always remember my dear Bharat; my life is worth calling life by Bharat; all my actions are dedicated to Bharat. The world appears to world in true sense because of existence of Bharat; the glory of Bharat has occupied a permanent niche in the temple of my heart; in Bharat I visualise the embodiment of God; I salute you O Bharat, the ornament of the universe !

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

रमाकान्तशुक्ल-प्रणीतं संस्कृतकाव्यम्

'भाति मे भारतम्'

भाति मे भारतम्, भाति मे भारतम् ।
भूतले भाति मेऽनारतं भारतम् ॥ध्रुवकम्॥

विश्वबन्धुत्वमुद्घोषयत्पावनं
विश्ववन्द्यैश्चरित्रैर्जगत्पावयत् ।
विश्वमेकं कुटुम्बं समालोकयद्
भूतले भाति मेऽनारतं भारतम् ॥१॥

पवित्र विश्वबन्धुत्व-भावना की उद्घोषणा करने वाला, (राम, कृष्ण, गौतम, गाँधी आदि) विश्ववन्द्य चरित्रों से जगत् को पवित्र करने वाला और सम्पूर्ण विश्व को एक कुटुम्ब के रूप में देखने वाला मेरा भारत भूतल पर सदा प्रोद्भासित रहता है ॥१॥

Proclaiming the noble motto of world fraternity, sanctifying the world with all-venerable characters, and considering the Universe as one family, my Bharat ever glows on the earth. 1

'क्रुद्धहिंसाबले क्वास्त्यहिंसाजयः?
कुत्र मुच्येत बद्धश्च मामन्तरा ?'
प्रश्नमित्थं जगत्सम्मुखे स्थापयद्
भूतले भाति मेऽनारतं भारतम् ॥२॥

'मेरे अतिरिक्त क्रुद्ध हिंसा के बल पर अहिंसा की जय और कहां हो सकती है एवं बद्ध जीव और कहां मुक्ति प्राप्त कर सकता है?'-इस प्रश्न को दुनिया के सामने रखता हुआ मेरा भारत भूमण्डल में सदा सुशोभित हो रहा है ॥२॥

'Where, in the world, except me, voilence is subdued by non-voilence, and those suffering from bondage are liberated?'-posing this question to the universe, my Bharat ever glows on the earth. 2

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

मानवामानितं दानवाबाधितं
निर्जराराधितं सज्जनासाधितम् ।
पण्डितैः पूजितं पक्षिभिः कूजितं
भूतले भाति मेऽनारतं भारतम् ।।३।।

मनुष्यों के द्वारा अत्यन्त सम्मानित, दानवों के द्वारा अबाधित, देवताओं के द्वारा आराधित, सज्जनों के द्वारा आसाधित, पण्डितों के द्वारा पूजित तथा (अनेक) पक्षियों के कूजन में अभिव्यक्त मेरा भारत भूतल पर अनवरत सुशोभित हो रहा है ।।३।।

Honoured by the men, undisturbed by the demons, worshipped by the gods, desired by the noble persons, respected by the Pandits and warbled by the birds, my Bharat ever glows on the earth. 3

मानवैर्दानवैस्सज्जनैर्दुर्जनै-
स्सद्धनैर्निर्धनैस्सद्बलैर्निर्बलैः ।
निर्जरैर्योगिभिर्भोगिभिश्चार्थितं
भूतले भाति मेऽनारतं भारतम् ।।४।।

मानव, दानव, सज्जन, दुर्जन, धनवान्, निर्धन, बलवान्, निर्बल, देवता, योगी तथा भोगी–सभी जिसे चाहते हैं, ऐसा मेरा भारत भूमण्डल में अनवरत सुशोभित हो रहा है ।।४।।

Equally desired by gods, demons and men of all ranks-noble and wicked, the rich and the poor, the strong and the weak, the yogis and voluptous, my Bharat ever glows on the earth. 4

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

वेशभूषाशनोपासनापद्धति-
क्रीडनामोद-संस्कार-वृत्त्यादिषु ।
यद्धि भिन्नं सदप्यस्त्यभिन्नं सदा
भूतले भाति तन्मामकं भारतम् ॥५॥

वेशभूषा, खानपान, उपासनापद्धति, खेलकूद, आमोद-प्रमोद के साधन, धार्मिक-सामाजिक संस्कार एवं आजीविका के अनेक भेदों में (देश-कालानुरोध से) बंटा हुआ होने पर भी वस्तुतः (जो अन्दर से) एक है, वह मेरा भारत भूतल पर सुशोभित हो रहा है ॥५॥

Which is basically one in spite of its opparent diversity in dress, meals, modes of worship, sports, regalements, socio-religous ceremonies and occupations, that my Bharat ever glows on the earth. 5

वेदभाभासितं सत्कलालासितं
रम्यसङ्गीत-साहित्य-सौहित्य-भूः ।
भारती-वल्लकी-झङ्कृतैर्झङ्कृतं
भूतले भाति मेऽनारतं भारतम् ॥६॥

वेदों की प्रभा से भासुर, सत्कलाओं से विलसित, रमणीय संगीत और साहित्य के फलने फूलने की भूमि तथा सरस्वती की वीणा की झंकारों से झंकृत मेरा भारत भूमण्डल में सदा शोभा प्राप्त करता है॥६॥

Resplendent with the glory of Vedas, adorned with various Arts, the meeting ground of charming Music and Literature, resounding with the jingles of Sarasvati's veena, my Bharat ever glows on the earth. 6

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

यत्त्रयीसाङ्ख्ययोगादिमार्गैर्युतं
जीवनं मुक्तमाकर्तुमाकाङ्क्षति ।
शीलसन्तोषसत्यादिभी रक्षितं
भूतले भाति तन्मामकं भारतम् ॥७॥

जो त्रयी, सांख्य, योग (शैव, वैष्णव, शाक्त, जैन, बौद्ध, सिक्ख, ईसाई, मुस्लिम, सूफी) आदि मार्गों से युक्त होकर जीवन को मुक्त करने की चेष्टा करता है एवं जिसकी शील, सन्तोष तथा सत्य आदि (उदार वृत्तियों से) रक्षा होती आयी है, वह मेरा भारत भूतल पर सुशोभित हो रहा है ॥७॥

Endowed with three Vedas, Samkhya and Yoga etc. and well maintained with the modesty, patience and truth etc, anxious to make the life free from all worries, my Bharat glows on the earth.
7

दर्शनज्ञानचारित्र्यसम्मेलनं
यत्र मोक्षस्य मार्गं भणन्त्यागमाः ।
ज्ञानमास्ते च भारः क्रियां वै विना
भूतले भाति तन्मामकं भारतम् ॥८॥

जहां के आगमों ने दर्शन, ज्ञान और चारित्र्य का मोक्ष के मार्ग के रूप में उपदेश दिया है; जहां क्रिया के अभाव में ज्ञान एक बोझ ही माना गया है, वह मेरा भारत भूतल पर सुशोभित है ॥८॥

Wherein scriptures declare the unity of *Darśana* (Philosophy), *Jñāna* (Knowledge) and *Cāritrya* (Character) as the path to Salvation and whereian knowledge,without practice, is considered as burden, that my Bharat ever glows on the earth.
8

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

जाह्नवी-चन्द्रभागा-जलैः पावितं
भानुजा-नर्मदा-वीचिभिर्लालितम् ।
तुङ्गभद्रा-विपाशादिभिर्भावितं
भूतले भाति मेऽनारतं भारतम् ॥९॥

गंगा और चनाब के जल से पवित्र, यमुना और नर्मदा की लहरों से दुलराया गया, तुंगभद्रा और विपाशा (व्यास) आदि नदियों से प्रतिष्ठित मेरा भारत भूमण्डल में सदा सुशोभित हो रहा है ॥९॥

Made sacred by the waters of the Ganga and the Chenab, nourished by the ripples of Yamuna and Narmada, nurtured by the Tungabhadra and the *Vipāśā* (Bias) etc., my Bharat ever glows on the earth. 9

विन्ध्य-सह्याद्रि-नीलाद्रिमालान्वितं
शुभ्रहैमाद्रि-हासप्रभापूरितम् ।
अर्बुदारावलीश्रेणि-सम्पूजितं
भूतले भाति मेऽनारतं भारतम् ॥१०॥

विन्ध्याचल, सह्याद्रि तथा नीलगिरि की श्रेणियों से युक्त, शुभ्र हिमालय की हासच्छटा से पूरित तथा आबू और अरावली पर्वत की श्रेणियों से सम्पूजित मेरा भारत भूमण्डल में अनवरत शोभा पा रहा है॥१०॥

Enriched by the ranges of *Vindhyācala*, *Sahyādri* and *Nīlagiri*, brightened by the smile of the Himalayas, adored by the Abu and Aravali ranges, my Bharat ever glows on the earth. 10

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

भाखडाबन्ध-दामोदरीयोजना -
बाणगङ्गा-फरक्कादिसिक्तोर्जितम् ।
ब्रह्मपुत्रादिसन्दर्शिताम्बुच्छटं
भूतले भाति मेऽनारतं भारतम् ॥११॥

भाखड़ा बांध, दामोदर घाटी-योजना, बाणगंगा-योजना तथा फरक्का बांध आदि से सींचा गया और ऊर्जा प्राप्त करने वाला एवं ब्रह्मपुत्र आदि नदियाँ जिसमें अपने जल की छटा दिखाती हैं ऐसा मेरा भारत भूमण्डल में सदा शोभायमान रहता है ॥११॥

Iggirated by projects of Bhakhra Dam, Damodar valley project, Banganga and Farakka etc., having the Brahmaputra and other rivers, exhibiting the splendour of their waters, my Bharat ever glows on the earth. 11

विद्युदुत्पादने तैलसंशोधने,
इन्धनान्वेषणे लौहनिष्पादने ।
यन्त्रनिर्माणकार्ये समर्थं च सद्
भूतले भाति मेऽनारतं भारतम् ॥१२॥

बिजली के उत्पादन में, तेल के शोधन में, ईंधन के अन्वेषण में, इस्पात बनाने में तथा विविध मशीनें बनाने में समर्थ होता हुआ मेरा भारत भूतल पर लगातार शोभित हो रहा है ॥१२॥

Being self-dependant in power-production, oil-refining, fuel-searching, steel-production and machine-manufacturing, my Bharat ever glows on the earth. 12

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

रोगजालं चिकित्सालयस्थापनै-
रोषधोत्पादनैः शल्यशोधैस्तथा ।
नूतनाभिश्चिकित्साभिरुन्मूलयद्
भूतले भाति मेऽनारतं भारतम् ॥१३॥

अस्पतालों की स्थापना, औषधोत्पादन, शल्यचिकित्सा के क्षेत्र में नवीन शोध तथा नयी-नयी चिकित्सा पद्धतियों से रोगों के जाल को काटता हुआ मेरा भारत भूतल पर सदा सुशोभित रहता है ॥१३॥

Eradicating the diseases with various therapies, production of medicines, surgical researches and establishment of hospitals, my Bharat ever glows on the earth. 13

आर्यभट्टं वियन्मण्डले स्थापयत्
पोखरण्-भूमिगर्भेऽणुशक्तिं किरत् ।
शान्तिकार्येष्वणुं प्रेरयत्सन्ततं
भूतले भाति मेऽनारतं भारतम् ॥१४॥

'आर्यभट' (उपग्रह) को अंतरिक्ष में स्थापित करने वाला, पोखरण की पृथिवी के गर्भ में अणुविस्फोट करने वाला तथा शान्तिकार्यों में अणु-शक्ति को नियुक्त करने वाला मेरा भारत भूतल पर सतत सुशोभित रहता है ।

Launching the Aryabhatta in the orbit, exploding the Atomic energy underground in Pokharan and always engaging the Atom for peace-cause, my Bharat ever glows on the earth. 14

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

अग्निमूर्जस्वलं स्वत्वरक्षाकृते
साधनैरात्मनीनैः सुसंसाधयत् ।
युद्धपोताँश्च सिन्धूरसि स्थापयद्
भूतले भाति मेऽनारतं भारतम् ॥१५॥

अपने हीं सीमित किन्तु अमोघ साधनों से ऊर्जस्वल 'अग्नि' नामक प्रक्षेपास्त्र को भली प्रकार से (परीक्षण द्वारा) सिद्ध करता हुआ एवं (स्वनिर्मित) युद्धपोतों को समुद्र के वक्षःस्थल पर स्थापित करता हुआ मेरा भारत भूतल पर सुशोभित हो रहा है ।

To protect self existence launching AGNI MISSILE with her own limited but unfailing device and means and launching the warships on the bosom of the ocean, my Bharat glows on the earth. 15

रेल-नौका-विमानैस्तथा गन्त्रिभि-
र्यानकैस्तैश्च तैश्च प्रवेगान्वितैः ।
य"च्चरैवेति" नित्यं समुद्घोषयद्
भूतले भाति तन्मामकं भारतम् ॥१६॥

जो रेल, नौका, वायुयान तथा (बस, मोटर, कार, टैम्पू, बैलगाड़ी, घोड़ागाड़ी, भैंसागाड़ी) आदि गाड़ियों एवं सवारियों के द्वारा 'चरैवेति,चरैवेति' (चलते रहो, चलते रहो)- सिद्धान्त की मानो, घोषणा करता रहता है, वह मेरा भारत भूतल पर सुशोभित है ॥१६॥

Proclaiming the motto of *'Caraiveti'* (walk forward for ever) through the running railway trains, boats, aeroplanes, buses, motors, cars, tempos, and other vehicles, my Bharat ever glows on the earth. 16

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

यद्बरौनी-भिलाई-बुकारो-स्वनैः
स्वोन्नतिस्यन्दनोत्थं शुभं घर्घरम् ।
दिक्षु विस्तारयद् वीक्ष्यते सर्वदा
भूतले भाति तन्मामकं भारतम् ॥१७॥

जो बरौनी, भिलाई तथा बोकारो के संयन्त्रों की ध्वनि के बहाने अपनी उन्नति के रथ के शुभ घर्घर-स्वान (घड़घड़ाहट के शब्द) को दिशाओं में सर्वदा फैलाता हुआ सा दिखाई देता है, वह मेरा भारत भूतल पर सुशोभित है ॥१७॥

Where the rumble produced by the wheels of the chariot of progress is resounding in all the directions through the clatter of Barauni, Bhilai and Bokaro projects, that my Bharat glows on the earth. 17

कर्दमाक्रान्तवीथिषु सौधेषु वा
यस्य पादातमार्गेषु गेहेषु वा ।
जीवनं लोकसेवापरं लक्ष्यते
भूतले भाति तन्मामकं भारतम् ॥१८॥

जिसकी कीचड़ से भरी गलियों, महलों, पैदल-मार्गों (फुटपाथों) अथवा घरों में (लोगों का) जीवन लोक की सेवा में लगा हुआ दिखाई देता है, वह मेरा भारत भूतल पर सुशोभित हो रहा है ॥१८।

Where the life of the dwellers of slums, palacial buildings, footpaths and houses is equally dedicated to the service of the humanity, that my Bharat ever glows on the earth. 18

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

व्यावृतास्याः समस्याः समाधाय यत्
स्वावलम्बं समालब्धुमाकाङ्क्षति ।
मार्गमुच्चावचं लङ्घयित्वा चलद्
भूतले भाति तन्मामकं भारतम् ॥१९॥

मुँह फाड़े हुई समस्याओं का समाधान करके जो स्वावलम्बन प्राप्त करने की इच्छा कर रहा है एवं जो ऊबड़-खाबड़ रास्तों को पार करता हुआ (उन्नति के पथ पर आगे बढ़ा) चला जा रहा है, वह मेरा भारत भूतल पर सुशोभित हो रहा है ॥१९॥

Which aims at attaining the comprehensive selfdependence by solving burning problems and which goes ahead crossing the uneven path, that my Bharat glows on the earth. 19

विश्वनाथं महाकालमाराधयद्
एकलिङ्गं भजद् वेङ्कटेशं स्मरत् ।
कालिकां पूजयद् वैष्णवीं च स्तुवद्
भूतले भाति मेऽनारतं भारतम् ॥२०॥

(वाराणसी में) बाबा विश्वनाथ और (उज्जैन में) महाकालेश्वर की आराधना करता हुआ, (उदयपुर के निकट) एकलिंग जी का भजन करता हुआ, (तिरुपति में) भगवान् वेंकटेश्वर का स्मरण करता हुआ, (कालका तथा कलकत्ता में) काली की पूजा करता हुआ (कटरा जम्मू में) वैष्णवदेवी की स्तुति करता हुआ मेरा भारत भूमण्डल में सदा सुशोभित रहता है ॥२०॥

Worshipping *Viśvhanātha* (in Varanasi), *Mahākāleśvara* (in Ujjain), *Ekaliṅga* (in Udaipur) and *Venkaṭeśvara* (in Tirupati), eulogising *Kālikā* (in Calcutta and Kalka) and *Vaiṣṇava Devi* (in Jammu) my Bharat ever glows on the earth. 20

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

शम्प्रदं शङ्करं माधवं राघवं
पार्वतीं राधिकां जानकीं च स्तुवत् ।
विट्ठलं बुद्धदेवं जिनं च स्मरद्
भूतले भाति मेऽनारतं भारतम् ॥२१॥

जगत् के कल्याणकर्ता उमा-महेश, राधा-कृष्ण और सीता-राम की स्तुति करता हुआ तथा विट्ठल, बुद्धदेव तथा जिनेन्द्र का स्मरण करता हुआ मेरा भारत भूमण्डल में अनवरत सुशोभित रहता है ॥२१॥

Doxologizing the propitious Lord Shankara, Krishna and Rama alongwith Parvati, Radha and Sita respectively, and meditating Vitthala and Buddha, my Bharat ever glows on the earth. 21

अर्थकामान्वितं धर्ममोक्षान्वितं
भक्तिभावान्वितं ज्ञानकर्मान्वितम् ।
नैकमार्गैः प्रभुं चैकमाराधयद्
भूतले भाति मेऽनारतं भारतम् ॥२२॥

अर्थ और काम से युक्त, धर्म और मोक्ष से युक्त, भक्तिभाव से युक्त, ज्ञान और कर्म से युक्त तथा अनेक मार्गों से एक प्रभु की आराधना करता हुआ मेरा भारत भूतल पर सदा सुशोभित रहता है॥२२॥

Invested with *Artha* and *Kāma*, *Dharma* and *Mokṣa*, *Bhakti* and *Jñana*,worshipping the One Almighty God with so many paths, my Bharat ever glows on the earth. 22

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

संस्कृतं प्राकृतं तामिलं तेलुगुं
कन्नडं कैरलीं बाङ्गलामाङ्गलाम् ।
वाचमन्यां च तां तां ब्रुवद् वर्धते
राष्ट्रभाषायुतं मामकं भारतम् ॥२३॥

संस्कृत, प्राकृत, तमिल, तेलुगु, कन्नड, कैरली (मलयालम), बांगला, अंग्रेजी तथा (पंजाबी, गुजराती, महाराष्ट्री, उर्दू, उड़िया, असमिया, कोंकणी, सिन्धी, कश्मीरी, डोगरी मणिपुरी आदि) अनेक भाषाओं को बोलता हुआ राष्ट्रभाषा (हिन्दी) से युक्त मेरा भारत वर्धित हो रहा है॥२३॥

Speaking the Sanskrit, Prakrit, Tamil, Telugu, Kannada, Malayalam, Bangla English and many other languages alongwith Lingua Franca (Hindi), my Bharat ever glows on the earth. 23

व्यासवाल्मीकिरत्नाकरैरुज्ज्वलं
स्वादुकादम्बरीपानलुब्धं सदा ।
कालिदासेन भासेन संद्योतितं
भूतले भाति मेऽनारतं भारतम् ॥२४॥

(महाभारत तथा पुराणों के कर्ता) व्यास, (रामायण के कर्ता) बाल्मीकि एवं (हरविजय के कर्ता) रत्नाकर से समुज्ज्वल, (बाणभट्ट प्रणीत) स्वादु कादम्बरी के पान के लिए सदा लालायित तथा कालिदास और भास के द्वारा चमकाया गया मेरा भारत भूतल पर सदा सुशोभित रहता है ॥२४॥

Brightened with Vyasa, Valmiki and Ratnakara, always anxious to taste the Kadambari, illumminated with Kalidasa and Bhasa, my Btarat ever glows on the earth. 24

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

मूलरामायणं पम्परामायणं
कम्बरामयणं जैनरामायणम् ।
कृत्तिवासादिरामायणं श्रावयद्
भूतले भाति मेऽनारतं भारतम् ॥२५॥

मूलरामायण, पम्परामायण, कम्बरामायण, जैनरामायण, कृत्तिवास्ररामायण (तथा दिव्यरामायण, लोकरामायण, भुशुण्डिरामायण, अद्भुतरामायण तथा भावार्थरामायण) आदि अनेक रामायणों (की कथा) को सुनाता हुआ मेरा भारत भूतल पर अनवरत सुशोभित रहता है ॥२५॥

Reciting the story of Rama through Mularamayana, Pamparamayana, Kambarmayana, Jainaramayana, Krittivasaramayana and other Ramayanas, my Bharat ever glows on the earth. 25

योगवासिष्ठगीतामहाभारतै-
र्ग्रन्थरत्नैश्च तैस्तैः प्रबुद्धं तथा ।
मानसं बीजकं सूरसिन्धुं दधद्
भूतले भाति मेऽनारतं भारतम् ॥२६॥

योगवासिष्ठ, गीता, महाभारत तथा अन्यान्य श्रेष्ठ ग्रन्थों से प्रबुद्ध एवं रामचरितमानस, कबीर-बीजक तथा सूरसागर को धारण करने वाला मेरा भारत भूतल पर अनवरत सुशोभित रहता है ॥२६॥

Awakened with great books like Yogavasishtha, Gita, Mahabharata etc. and having the Ramacharitmanas, Kabir-beejak and Sursagar, my Btarat ever glows on the earth. 26

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

गद्यपद्याञ्जितं श्रव्यदृश्याञ्जितं
गीतनृत्याञ्जितं लोकवेदाञ्जितम् ।
सप्रसादं समाधुर्यमोजोन्वितम्
भूतले भाति मेऽनारतं भारतम् ॥२७॥

गद्य, पद्य, श्रव्य काव्य, दृश्य काव्यों, गीतों, विविध नृत्यों, लोक एवं वेदों में अभिव्यक्त तथा प्रसाद, माधुर्य और ओज से संवलित मेरा भारत भूतल पर सदा सुशोभित रहता है ॥२७॥

Revealad through the poetry and prose, audible and visual compositions, songs and dances, folklore and Vedas and replete with lucidity, sweetness and vigour,my Bharat ever glows on the earth. 27

यच्च तीर्थैः पवित्रैर्व्रतैरुत्सवैः
पर्वभिर्दर्शनीयैः स्थलैः शोभितम् ।
यच्च नानाजयन्तीगणै राजितं
भूतले भाति तन्मामकं भारतम् ॥२८॥

जो (हरिद्वार,मथुरा, प्रयाग, काञ्ची, काशी, द्वारका, रामेश्वर, बदरीनारायण, केदारनाथ, पुरी, पुष्कर, पावापुरी, बोधगया, पटना साहिब, अजमेर, अमृतसर, हेमकुण्ड, आदि अनेक) तीर्थों, (शिवरात्रि, जन्माष्टमी, रमजान आदि) व्रतों (हरियाली तीज आदि) उत्सवों (श्रावणी, पर्यूषण पर्व, पन्द्रह अगस्त, तथा गणतन्त्र-दिवस आदि धार्मिक तथा राष्ट्रीय) पर्वों (कुतुबमीनार, ताजमहल, खजुराहो, नालन्दा, राजगीर, कन्याकुमारी आदि) दर्शनीय स्थलों और (तुलसी-जयन्ती, तानसेन-जयन्ती, हरिदास-जयन्ती, त्यागराज-जयन्ती, कालिदास-जयन्ती आदि अनेक) जयन्तियों से सुशोभित है, वह मेरा भारत भूतल पर चमक रहा है ॥२८॥

Which is beautiful with many sacred Tirthas, vows, celibrations, festivals worthseeing places and Jayantis, that my Bharat glows on the earth. 28

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

द्वारकां सेतुबन्धं पुरीं बदरिकां
तिरुपतिं मधुपुरीं चाजमेरं दधत् ।
पुष्करामृतसरस्तीर्थराजैर्युतं
भूतले भाति मेऽनारतं भारतम् ॥२९॥

(पश्चिम में) द्वारका, (दक्षिण में) सेतुबन्ध रामेश्वर, (पूर्व में) जगन्नाथपुरी, (उत्तर में) बदरीनाथ, (तथा तत्तत्) (प्रदेशों में) बालाजी तिरुपति वेंकटेश्वर, मथुरा, अजमेर, पुष्कर, अमृतसर एवं तीर्थराज प्रयाग आदि पवित्र स्थानों से युक्त मेरा भारत भूमण्डल में सदा सुशोभित रहता है ॥२९॥

टि० इस पद्य में स्त्रग्विणी का मात्रिक रूप है ।

Sanctified with Dwaraka(in the west) Setubandha Rameswaram (in the south), Jagannatha Puri (in the east), Badrinarayana (in the north), BalajiTirupati, Mathura, Ajmer Sharif, Pushkara,Amritsar and Tirtharaja Prayag, my Bharat ever glows on the earth. 29

कुम्भसिंहस्थवैशाखिमुक्तेश्वर-
सोनपूरादिमेलापकै रञ्जितम् ।
रासलीलायुतं रामलीलायुतं
भूतले भाति मेऽनारतं भारतम् ॥३०॥

(प्रयाग, हरद्वार, नासिक तथा उज्जैन में होने वाले) कुम्भ, सिंहस्थ, वैसाखी, गढ़मुक्तेश्वर, सोनपुर (हरिहर क्षेत्र) आदि के बड़े बड़े मेलों से रंग बिरंगा तथा रासलीलाओं एवं रामलीलाओं से युक्त मेरा भारत भूमण्डल में सदा शोभायमान रहता है॥३०॥

Colourful with the fairs of Kumbha, Simhastha, Baisakhi, Garhmukteswar and Sonpur, showing the Ramalila and Rasalila, my Bharat ever glows on the earth. 30

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

हस्तिगुम्फामजन्तामलौरां दधत्
खर्जुराहो-गया-सारनाथैर्लसत् ।
ताज-कोणार्क-विष्णुध्वजैर्मण्डितं
भूतले भाति मेऽनारतं भारतम् ॥३१॥

हाथीगुम्फा, अजन्ता और ऐलोरा को धारण करने वाला, खजुराहो, बोध गया और सारनाथ से सुशोभित तथा ताजमहल, कोणार्क और (महरौली स्थित) विष्णुध्वज से मण्डित मेरा भारत भूतल पर अनवरत सुशोभित हो रहा है।।३१।।

Endorned with caves of Elephanta, Ajanta and Elora, adorned with Khajuraho, Bodhagaya and Sarnatha, resplendent with Taj Mahal, Konarka and Vishnudhvaja (Mehrauli Iron pillar, Delhi), my Bharat ever glows on the earth. 31

होलिका-दशहरा-पर्वकोजागरी-
पोङ्गल-श्रावणी-दीपमालामयम् ।
लोहडीदौणमाद्युत्सवैः पूरितं
भूतले भाति मेऽनारतं भारतम् ॥३२॥

होली, दशहरा, कोजागरी (शरत्पूर्णिमा), पोंगल, श्रावणी (रक्षाबन्धन), दीपावली, लोहड़ी, ईद तथा ओणम आदि उत्सवों से परिपूर्ण मेरा भारत भूतल पर सुशोभित हो रहा है।।३२।।

Splendent with Holi, Dussera, Kojagari (*Śaratpūrṇimā*), Shravani (Raksha-bandhan), Pongal, Dipavali, Lohri, Id, Onam and other festivals, my Bharat ever glows on the earth. 32

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

ओडिसीं मणिपुरीं कथक-गर्बादिकं
कूचिपूडिं च गिद्दां छऊं भङ्गडाम् ।
कथकलीं डाण्डियां भरतनाट्यं दधद्
भूतले भाति मेऽनारतं भारतम् ॥३३॥

ओडिसी, मणिपुरी, कथक, गरबा, कुचिपुडी, गिद्दा, छऊ, भंगड़ा, कथकली, डांडिया रास तथा भरतनाट्य,नृत्यों की शोभा का विस्तार करता हुआ मेरा भारत भूतल पर अनवरत सुशोभित रहता है।

टि० इस पद्य में स्रग्विणी का मात्रिक रूप है ।

Presenting beautifully various dances, namely, Oddissi, Manipuri, Kathak, Garba, Kuchipudi, Gidda, Chau, Kathakali, Dandia Rasa, and Bharatanatyam, my Bharat ever glows on the earth. 33

मन्दिरैर्मस्जिदैश्चैत्य-गिर्जागृहै-
रार्यगेहैर्गुरुद्वारकैर्भ्राजितम् ।
कर्मभूः शर्मभूर्धर्मभूर्मर्मभूः
भूतले भाति मेऽनारतं भारतम् ॥३४॥

मन्दिरों, मस्जिदों, मठों, गिर्जाघरों, आर्यसमाज मन्दिरों तथा गुरुद्वारों से शोभित, कर्म, शील, धर्म, तथा जीवन के मर्म को समझने की स्थली मेरा भारत भूतल पर अनवरत चमक रहा है॥३४॥

Adorned with Temples, Mosques, Monasteries (Budhist shrines), Churches, Arya Samajas, Gurudwaras and the meeting ground of the work, repose, duty and secrets of life, my Bharat ever glows on the earth. 34

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

यत्र मन्दाकिनी पापसंहारिणी
यत्र गोदावरी चारुसञ्चारिणी ।
देववाणी च यत्रास्ति मोदाकुला
भूतले भाति तन्मामकं भारतम् ॥३५॥

जहां मन्दाकिनी पापों का संहार करती है, जहां गोदावरी चारु संचरण करती है, और जहां मोदाकुल देववाणी (संस्कृत भाषा) निवास करती है, वह मेरा भारत भूतल पर सुशोभित हो रहा है।।३५।।

Where Mandakini extirpates all the sins,where flows Godawari and where mirthful Devavani (Sanskrit) resides,that my Bharat glows on the earth.
35

कृष्णलीलायुतं वेणुसन्नादितम्
पावनं भावनं यत्र वृन्दावनम् ।
शम्भुशूलस्थिता यत्र वाराणसी
भूतले भाति तन्मामकं भारतम् ॥३६॥

जहां भगवान् श्रीकृष्ण की लीलाओं से युक्त एवं उनकी मुरली से संनादित पवित्र प्यारा वृन्दावन है एवं जहां शिवजी के त्रिशूल पर टिकी (तीन लोक से न्यारी) वाराणसी है, वह मेरा भारत भूतल पर शोभित हो रहा है।।३६।।

Where lies the pious and beautiful Vrindavan witnessing Krishna exhibiting His Leelas and playing on His flute and where lies the Varanasi located on the trident of Lord Shiva, that my Bharat glows on the earth.
36

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

यत्र वृन्दावने गोधनं चारयन्
स्वीयमन्दस्मितैः पापमुन्मूलयन् ।
चारुकादम्बिनीनीलगोपालको
भूतले भाति तन्मामकं भारतम् ॥३७॥

जहां चारु मेघमाला के समान श्यामवर्ण गोपाल (कृष्ण) वृन्दावन में गोधन को चराता हुआ अपनी मधुर मुस्कान से समस्त पापों का उन्मूलन कर देता है, वह मेरा भारत भूतल पर सुशोभित हो रहा है॥३७॥

Where cloud-coloured Lord Krishna, while grazing His cows, extirpates all the sins with His sweet smile, that my Bharat glows on the earth. 37

भूधराकाशतोयेषु रक्षापरो
यत्र शत्रून् भटो हेलया नाशयेत् ।
यत्र वीराङ्गना युद्धभूमिं गता
भूतले भाति तन्मामकं भारतम् ॥३८॥

जहां पहाड़ों पर, आकाश में तथा समुद्र में तैनात (देश की) रक्षा करने में तत्पर वीर जवान खेल-खेल में शत्रु का मटियामेट कर सकता है और जहां (कैकेयी, लक्ष्मीबाई आदि अनेक) वीरांगनाएं युद्ध के मैदान में अपना पराक्रम दिखाने जाती हैं, वह मेरा भारत भूतल पर सुशोभित है॥३८॥

Posted on mountains, in the sky and on the ocean for the defence of Motherland, where, everready soldiers can liquidate the enemy in a trice, and where amazons used to go to the battle-fields, that my Bharat ever glows on the earth. 38

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

प्रेरणादायकं सत्कथागायकं
ज्ञानविज्ञानतेजोबलाधायकम् ।
दुःखदारिद्र्य-दग्धान् सदा पालय-
न्मोदते मे सदा पावनं भारतम् ॥३९॥

प्रेरणा देने वाला (राम, कृष्ण, सत्यनारायण, ध्रुव, प्रह्लाद, शिवि, दधीचि, हरिश्चन्द्र, भीष्म, लक्ष्मण, हनुमान् आदि से सम्बद्ध तथा हितोपदेश, कथासरित्सागर और अन्याय) सत्कथाओं (श्रेष्ठ जनों की गाथाओं अथवा अच्छी कथाओं) को गाने वाला, ज्ञान, विज्ञान, तेज और बल का निधान एवं दुःख और गरीबी से दग्ध लोगों का सदा पालन करने वाला मेरा पवित्र भारत सदा प्रसन्न रहता है॥३९॥

Giving inspiration to all, narrating the stories of saints (or narrating the good stories), repository of knowledge, science, splender and vitality and always providing refuge to the people scorched with the sorrow and poverty, my Bharat ever glows on the earth.

39

कोकिलैः कूजितं षट्पदैर्गुञ्जितं
केकिभिर्नृत्यपारङ्गतैर्नादितम् ।
सारिका-कीर-वादप्रवादैर्युतं
भूतले भाति मेऽनारतं भारतम् ॥४०॥

जिसमें कोकिले कूजती हैं, जिसमें भौंरे गूंजते हैं, जिसे नृत्यप्रवीण मयूर अपनी बोली (केका) से शब्दायमान करते है और जिसमें तोता-मैना वाद-विवाद करते रहते हैं, वह मेरा भारत भूतल पर अनवरत सुशोभित रहता है॥४०॥

Warbled by the kuckoos, buzzed by the bees, resounded by voice of dance-expert peacocks, made interesting by the altercation of Tota (parrot) and Maina (a black Indian bird famous for its melodious notes), my Bharat ever glows on the earth.

40

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

कुंकुमैश्चन्दनैः पुष्करैः पाटलैः
सर्वगं सच्चिदानन्दमाराधयत् ।
सर्वभूतेषु दृष्टिं समां धारयद्
भूतले भाति मेऽनारतं भारतम् ॥४१॥

केसर, चन्दन, कमलों एवं गुलाबों से जो सर्वव्यापी सत्, चित् एवं आनन्द स्वरूप भगवान् की आराधना करता है और जो (विद्याविनयसम्पन्न ब्राह्मण, गौ, हाथी, श्वान एवं चाण्डाल आदि) सभी प्राणियों को समदृष्टि से देखता है, वह मेरा भारत भूतल पर सदा सुशोभित रहता है॥४१॥

Adoring the Omnipresent Supreme Soul, the ultimate resort of Truth, Consciousness and Happiness, offering Him the sffron, sandalwood paste, lotuses and roses, seeing all the beings with same eyes my Bharat ever glows on the earth. 41

मेघमालाकुलं विद्युदुद्द्योतकं
काशहासान्वितं सर्षपश्रीयुतम् ।
पक्वगोधूमसस्यैश्च सम्पूरितं
भूतले भाति मेऽनारतं भारतम् ॥४२॥

जो (वर्षा ऋतु में) मेघमालाओं से युक्त और बिजली को चमकाने वाला है, (शरद् ऋतु में) कांस की हंसी से युक्त है, (वसन्त ऋतु में) सरसों की शोभा से युक्त है तथा (ग्रीष्म ऋतु में) पके हुए गेहूं तथा अन्य अनाजों से भरा रहता है, वह मेरा भारत भूतल पर सदा सुशोभित रहता है॥४२॥

Overcast with dark clouds, splendid with the streaks of lightning (in rainy season), resplendent with the smile of Kaśa (a particular grass Saccharum Spontaneum) (in winter season), beautiful with blosom of mustard (in spring days) and invested with the heaps of ripened wheatgrains (in summer), my Bharat ever glows on the earth. 42

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

श्यामलानोकहश्रीसमृद्धान्तरं
पद्मनेत्रैस्सरोभिस्समालोकितम् ।
निर्झरैः श्वेतफैनैस्समृद्धाञ्चलं
भूतले भाति मेऽनारतं भारतम् ॥४३॥

जो श्यामल वृक्षों की शोभा से समृद्ध है, जो कमलरूपी नेत्रों को धारण करने वाले तालाबों से देखा गया (अथवा प्रकाशित) है और सफेद झागों वाले झरनों से जिसके अंचल समृद्ध हैं, ऐसा मेरा भारत भूतल पर सदा शोभित रहता है॥४३॥

Where regions are enriched with the verdurous beauty of trees, which is glanced by the lotus-eyed ponds and where hilly areas are foaming with cascades, that my Bharat ever glows on the earth.
43

हंस-कारण्डवैस्सारसैर्वर्तकैः
क्रौञ्चकाकैः पिकैः खञ्जरीटैः शुकैः।
तित्तिरैष्टिट्टिभैः श्येनगृध्रैश्चितं
भूतले भाति मेऽनारतं भारतम् ॥४४॥

हंस, कारण्डव, सारस, बत्तक, कौंच,काक, कोयल, खंजन, तोता, तीतर, टिट्टिभ (टिटहरी), बाज तथा गिद्ध आदि (सात्त्विक, राजस तथा तामस स्वभाव वाले अनेक) पक्षियों से युक्त मेरा भारत भूतल पर सदा सुशोभित रहता है॥४४॥

Variegated with the swans, Karandavas, cranes, ducks, kraunchas, crows, cuckoos, wagtails, parrots, partridges, pewits, falcons and vultures, my Bharat ever glows on the earth. (The birds are also used here as the symbols of *Sattvika, Rajasa* and *Tamasa* beings).
44

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

पण्डितैर्योद्धृभिर्वाणिजैः कार्मिकैः
शस्त्रिभिः शास्त्रिभिर्वर्णिभिर्गेहिभिः ।
वानप्रस्थैश्च सन्न्यासिभिर्मण्डितं
भूतले भाति मेऽनारतं भारतम् ।।४५।।

विद्वानों, योद्धाओं, व्यापारियों, मजदूरों, शस्त्रविद्यों, शास्त्रविद्यों, ब्रह्मचारियों, गृहस्थों, वानप्रस्थों तथा संन्यासियों से मण्डित मेरा भारत भूतल पर सदा सुशोभित रहता है।।४५।।

Hallowed with the scholars, warriors, merchants, labourers, persons well-versed in armoury and scriptures, Brahmacharis, Grihasthas Vanaprasthas and Sannyasins, my Bharat ever glows on the earth. 45

यत्र हूणास्तुरुष्काः शका बर्बरा
म्लेच्छका यावना एत्य याता लयम् ।
यत्र चार्या अनार्या मुदैकत्रिता
भूतले भाति तन्मामकं भारतम् ।।४६।।

जहां हूण, तुर्क, शक, बर्बर, म्लेच्छ, यवन आदि अनेक जातियां आकर पच गयी एवं जहां आर्य और अनार्य प्रसन्नतापूर्वक इकट्ठे रहते हैं, वह मेरा भारत भूतल पर सुशोभित है।।४६।।

Where the congregations of the Hunas, Turks, Sakas, Barbaras, Mlechchhas and Yavanas etc. got absorbed and where Aryans and Non-Aryans are living mirthfully together, that my Bharat glows on the earth. 46

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

क्षारमम्भोधिमापीय यस्मिन् स्थितै-
नारिकेलैः सुधोद्गारिभिः श्यामलः ।
शङ्कराचार्यदः केरलो राजते
भूतले भाति तन्मामकं भारतम् ।।४७।।

जिसमें खारे समुद्र को पीकर अमृत के समान मधुर जल का उद्गिरण करने वाले नारियल के पेड़ों से श्यामल बना हुआ जगद्गुरु शंकराचार्य को देने वाला केरल विराजमान है, वह मेरा भारत भूतल पर सुशोभत हो रहा है।।४७।।

Wherein Kerala, the birthplace of Shankaracharya, green with the coconut trees absorbing the saline water of the sea and reproducing nectar (in the form of coconut water), exhibits its verdure, that my Bharat glows on the earth. 47

गोस्तनी-सेवपूर्णं मधुप्लावितं
देवदारूद्वहं नौगृहैः रञ्जितम् ।
सुन्दरं यस्य काश्मीरकं राजते
भूतले भाति तन्मामकं भारतम् ।।४८।।

जिसका द्राक्षा (अंगूरों) और सेवों से परिपूर्ण, मधु से प्लावित, देवदारुओं को धारण करने वाला तथा नौकागृहों से सुशोभित काश्मीर अत्यन्त खूबसूरत लगता है, वह मेरा भारत भूतल पर सुशोभित हो रहा है।।४८।।

Whose Kashmir appears graceful, replete with vine-yards and apple- orchards, overflowing with honey, encircled with pines and adorned with houseboats, that my Bharat ever glows on the earth.
48

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

रामकृष्णावतारस्थले विश्रुते
नेहरू-मालवीयादि-रत्नोज्ज्वले ।
उत्तरे यस्य देशेऽस्ति तीर्थाधिपो
भूतले भाति तन्मामकं भारतम् ॥४९॥

जिसके राम और कृष्ण के अवतार-स्थल तथा नेहरू और मालवीय जी आदि अनेक (नर) रत्नों से उज्ज्वल उत्तर प्रदेश में तीर्थराज प्रयाग विराजमान है, वह मेरा भारत भूतल पर सुशोभित हो रहा है ॥४९॥

Wherein, Uttar pradesh, the land of incarnations of Rama and Krishna, and brilliant with jewels like Nehru and Malaviya etc. is sanctified with the soverign Tirtha Prayaga, that my Bharat glows on the earth. 49

गण्डकी-शोण-गंगा-युता पाटली
लिच्छिवी-सेविता चापि वैशालिका ।
भूषयामासतुर्यस्य पूर्वाञ्चलं
भूतले भाति तन्मामकं भारतम् ॥५०॥

गण्डक, शोण और गंगा से सेवित पाटलिपुत्र (पटना) और लिच्छिवी गण के द्वारा सेवित वैशाली ने जिसके पूर्वांचल को अलंकृत किया है, वह मेरा भारत भूतल पर सुशोभित हो रहा है ॥५०॥

Where eastern region was graced with Pataliputra irrigated by Gandaka. Sona and Ganga and with Vaisali ruled by Licchivis, that my Bharat glows on the earth. 50

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

श्रीदयानन्द-गान्ध्युज्ज्वलं गुर्जरं
स्वर्णबङ्गं विवेकारविन्दोज्ज्वलम् ।
नानकाद्युज्ज्वलं पञ्चतोयं दधद्
भूतले भाति मेऽनारतं भारतम् ॥५१॥

स्वामी दयानन्द तथा महात्मा गांधी आदि से उज्ज्वल गुजरात, स्वामी विवेकानन्द तथा योगिराज अरविन्द से उज्ज्वल सोनार बंगाल एवं गुरु नानक आदि से उज्ज्वल पंजाब को धारण करता हुआ मेरा भारत भूतल पर सदा सुशोभित रहता है ॥५१॥

Consisting of Gujrat sublime with Swami Dayanand and Mahatma Gandhi, of Golden Bengal brilliant with Swami Vivekananda and Yogiraja Arobindo and of Punjab glorified with Guru Nanak etc., my Bharat glows on the earth. 51

गोखले-बालगङ्गाधराराधितं
श्रीशिवाजी-तुकाराम-सम्बोधितम् ।
यन्महाराष्ट्रकं सह्यशृङ्गोच्छ्रितं
भूतले भाति तन्मामकं भारतम् ॥५२॥

जिसका, गोखले तथा बालगंगाधर तिलक के द्वारा आराधित एवं शिवाजी और भक्त तुकाराम के द्वारा सम्बोधित महाराष्ट्र सह्याद्रि के शिखरों से समुन्नत है, वह मेरा भारत भूतल पर सुशोभित हो रहा है॥५२॥

Whose Maharashtra, worshipped by Gokhale and Balgangadhar Tilak, awakened by Shivaji and Tukaram, appears splendid with towering peaks of Sahyadri, that my Bharat glows on the earth. 52

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

त्यागराजस्वरैर्मोहितं तामिलं
मध्यदेशं तथा चम्बलालङ्कृतम् ।
यच्च सोल्लासमासाममङ्के दधद्
भूतले भाति तन्मामकं भारतम् ।।५३।।

जिसका तमिलनाडु त्यागराज के संगीतमय स्वरों से मोहित है, जिसका मध्यप्रदेश चम्बल नदी से अलंकृत है और जो सोल्लास आसाम को अपनी गोद में धारण करता है, वह मेरा भारत भूतल पर सुशोभित हो रहा है।।५३।।

Whose Tamil Nadu feels enchanted with the melodies of Thyagaraja whose Madhya Pradesh is girdled with Chambal river and who sustains enthusiastic Assam in her lap, that my Bharat glows on the earth. 53

गोम्मटेशानुभावप्रभापूरितं
यस्य कर्णाटकं चन्दनामोदितम् ।
यस्य राजस्थलं वीरगाथाङ्कितं
भूतले भाति तन्मामकं भारतम् ।।५४।।

जिसका कर्नाटक (श्रवणवेलगोल में) गोम्मटेश्वर की विशाल प्रतिमा की गरिमामय शोभा को धारण करने वाला एवं चन्दन से आमोदित है और जिसका राजस्थान वीरगाथाओं से अंकित है, वह मेरा भारत भूतल पर सुशोभित है ।।५४।।

Whose Karnataka is encompassed with the grandeur of the collosal idol of Gommteswar and is fragrant with sandal, whose Rajasthan is inscribed with the legends of valiance, that my Bharat ever glows on the earth. 54

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

आन्ध्रनागारुणादिप्रदेशेषु यत्
स्वीयभूतिं तनोति प्रभूतां सदा ।
यस्य सर्वस्थलेष्वस्ति प्रत्यग्रता
भूतले भाति तन्मामकं भारतम् ।।५५।।

जो आन्ध्रप्रदेश, नागालैण्ड, अरुणाचल प्रदेश (तथा हिमाचल प्रदेश) आदि राज्यों में अपनी प्रभूत विभूति का वितान करता है एवं जिसके सभी स्थानों में ताज़गी (नवीनता) व्याप्त है, वह मेरा भारत भूतल पर सुशोभित हो रहा है ।।५५।।

Which pleasantly reveals its fullsome beauty in all the states namely Andhra Pradesh, Nagaland, Arunachal Pradesh etc. and where every-where pervades an unabated freshness, that my Bharat ever glows on the earth. 55

विक्रमादित्यवेतालगाथाङ्किते
मालवे रेजतुर्यस्य लोकश्रुतौ ।
भर्तृपूर्वो हरिश्चाथ सान्दीपनि-
र्भूतले भाति तन्मामकं भारतम् ।।५६।।

जिसके विक्रमादित्य और वेताल की कहानियों से युक्त मालव प्रदेश में जगत्प्रसिद्ध भर्तृहरि और गुरु सान्दीपनि प्रतिष्ठा प्राप्त कर चुके हैं, वह मेरा भारत भूतल पर सुशोभित हो रहा है ।।५६।।

Wherein, Malwa, characterised with the tales of Vikramaditya and Vaital, had the famous Bhartrihari and Guru Sandipani, that my Bharat glows on the earth. 56

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

यत्कुरुक्षेत्रमध्ये स्वयं श्रीहरि-
निष्क्रियं पार्थमाश्वासयद् गीतया ।
स्वीयरूपेण तं च व्यधात्कर्मठं
भूतले भाति तन्मामकं भारतम् ॥५७॥

जिसके कुरुक्षेत्र में निष्क्रिय अर्जुन को स्वयं श्रीहरि ने गीता के माध्यम से आश्वासन दिया एवं अपने (विराट्) रूप (के दर्शन) से उसे कर्मठ बनाया, वह मेरा भारत भूतल पर सुशोभित हो रहा है ॥५७॥

Wherein, at the battlefield of Kurukshetra Lord Shrikrishna Himself inspired inactive Arjuna to regain his self-confidence with celestial song of Holy Gita and made him active exhibiting him His colossal appearance, that my Bharat glows on the earth. 57

शुक्रतालास्पदे यत्र वैयासकिः
पापहन्त्रीं कथामाह साप्ताहिकीम् ।
यत्र चाद्याप्यवृद्धो वटो राजते
भूतले भाति तन्मामकं भारतम् ॥५८॥

जिसके (जिला मुजफ्फरनगरान्तर्गत) शुक्रताल नामक स्थान में व्यास जी के पुत्र शुकदेव जी ने एक सप्ताह में पूर्ण होने वाली (श्रीमद्भागवत की) पापनाशक कथा (राजा परीक्षित को) सुनायी थी और जहां आज भी जटा रहित युवा वट वृक्ष विराजमान है, वह मेरा भारत भूतल पर सुशोभित हो रहा है॥५८॥

Wherein ShukDev, the son of Ved.Vyas, told the week-ending sin-expelling religious dicourse of Shrimadbhagavata (to King Parikshit) at the place known as Shukratal where even today ever juvenile banyan tree stands magnanimously, that my Bharat glows on the earth. 58

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

जन्वरीमासषड्विंशके वासरे
इण्डियागेट-पार्श्वस्थितो दर्शकः ।
यस्य शोभाप्रवाहे मुदा मज्जति,
भूतले भाति तन्मामकं भारतम् ॥५९॥

छब्बीस जनवरी के दिन, इण्डिया गेट के दोनों ओर बैठा हुआ दर्शक-समूह, जिसके, शोभाप्रवाह में मस्त होकर डुबकियां लगाता है, वह मेरा भारत भूतल पर सुशोभित हो रहा है ॥५९॥

Where, sitting on both sides of the path to India Gate, the spectators are absorbed in glamour on the 26th day of January, that my Bharat glows on the earth. 59

यस्य दिल्लीस्थिते रक्तदुर्गे शुभे
संसदश्चोत्तमाङ्गे त्रिरङ्गध्वजः ।
सार्वभौमीं स्वसत्तां वदत्युल्लसन्
भूतले भाति तन्मामकं भारतम् ॥६०॥

जिसके दिल्ली स्थित लालकिले पर तथा संसद भवन के ऊपर (फहराता) तिरंगा झण्डा अपनी सार्वभौम सत्ता की सोल्लास घोषणा करता है, वह मेरा भारत भूतल पर सुशोभित हो रहा है ॥६०॥

Wherein on the Red Fort and Parliament House of Delhi, Tricolour Flag, fluttering in the air, proclaims its Sovereignty, that my Bharat glows on the earth. 60

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

यन्मुनीनां तपस्यास्थली कथ्यते
यत्परब्रह्मलीलास्थली विद्यते ।
यच्च नानाकथानां निधी राजते
भूतले भाति तन्मामकं भारतम् ॥६१॥

जो मुनियों की तपस्या स्थली कहा जाता है, जो परब्रह्म (के नाना अवतारों) की लीलास्थली है और जो अनेक कथाओं का खजाना है, वह मेरा भारत भूतल पर सुशोभित हो रहा है ॥६१॥

Which is acclaimed as the penance-place of ascetics the Leela place of Parabrahman (Absolute) and the reservoir of various tales and legends, that my Bharat glows on the earth. 61

यस्य वैदेशिकैर्यात्रिभिः कीर्तिता
चारुकीर्तिः ककुब्व्यापिनी प्रोज्ज्वला ।
यस्य धर्मो विदेशैस्समालिङ्गितो
भूतले भाति तन्मामकं भारतम् ॥६२॥

जिसकी दिग्दिगन्तव्यापी समुज्ज्वल सुन्दर कीर्ति का (ह्वेनसांग फाह्यान आदि अनेक) विदेशी यात्रियों ने गान किया है और जिसके धर्म को विदेशों ने (सहर्ष) स्वीकारा है, वह मेरा भारत भूतल पर शोभायमान है ॥६२॥

Whose brilliant fame, spreading in all directions, is sung by foreign travellers and whose religions are embraced by foreign countries, that my Bharat glows on the earth. 62

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

यद्दरिद्रव्यथां हर्तुमाकाङ्क्षति
यच्च वैज्ञानिकीमुन्नतिं वाञ्छति ।
यन्निजाध्यात्मरत्नप्रभालोकितं
भूतले भाति तन्मामकं भारतम् ॥६३॥

जो गरीबों की पीड़ा को दूर करने का इच्छुक है, जो वैज्ञानिक उन्नति का अभिलाषुक है, एवं (साथ ही) जो अपने अध्यात्म-रत्नों की प्रभा से आलोकित रहता है, वह मेरा भारत भूतल पर सुशोभित हो रहा है॥६३॥

Which desires to remove the sufferings of the poor, which aims at the scientific progress and which is brilliant with the help of its spirituality, that my Bharat glows on the earth. 63

वह्निभूकम्पझञ्झाजलप्लावनै-
र्भीषितं चापि यत्साहसं न त्यजेत् ।
ईतिभीतिप्रभावांस्तथा तर्जयेत्
भूतले भाति तन्मामकं भारतम् ॥६४॥

जो आग, भूकम्प, झंझावात तथा बाढ़ से डराया जाने पर भी अपना साहस नहीं छोड़ता तथा (वक्त आने पर) ईति-भीतियों के प्रभाव को धमका सकता है, वह मेरा भारत भूतल पर सुशोभित हो रहा है ॥६४॥

Which does not give up courage even if threatened by the fire, earthquakes, tornadoes, inundation and which can snub all the dread and distress, that my Bharat glows on the earth. 64

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

यस्य विश्वे समस्तेऽपि विद्योतते
पावनं नाम दिव्यं यशश्चोज्ज्वलम् ।
प्राणिसङ्घं च प्रीणाति यद्दर्शनं
भूतले भाति तन्मामकं भारतम् ।।६५।।

जिसका पावन नाम और उज्ज्वल यश समस्त विश्व में चमकता है और जिसके दर्शन से प्राणियों के समूह प्रसन्नता पाते हैं, वह मेरा भारतवर्ष भूतल पर सुशोभित हो रहा है ।।६५।।

Whose sacred name and fame effulges in the entire universe and the vision of which pleases the congregation of humanity, that my Bharat glows on the earth. 65

यन्मया गीयते यद्भजामि प्रियं
येन मह्यं प्रदत्ताः शुभाः प्रेरणाः ।
किञ्च यस्मै नमो मेऽस्ति यस्माद्बलं
भूतले भाति तन्मामकं भारतम् ।।६६।।

जो मेरे द्वारा गाया जाता है, जिसको मैं अत्यन्त प्यारा समझ कर भजता हूं, जिसने मुझे प्रेरणाएं दी हैं, जिसके लिए मेरा प्रणाम समर्पित है और जिससे मुझे बल मिलता है, वह मेरा भारत भूतल पर सुशोभित हो रहा है ।।६७।।

Whihc is sung by me, whose dear image I worship, which has inspired me to perform goodness, before whom I bow and which vouchsafes me strength, that my Bharat glows on the earth. 66

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

यस्य संदृश्य संदृश्य शोभा नवा
यस्य संस्मृत्य संस्मृत्य गाथा शुभाः ।
रोमहर्षो नृणां जायते वै सतां
भूतले भाति तन्मामकं भारतम् ॥६७॥

जिसकी अभिनव शोभा देख-देख कर एवं कल्याणकारिणी गाथाओं को याद कर करके सज्जनों को रोमांच हो आता है, वह मेरा भारत भूतल पर सुशोभित हो रहा है ॥६७॥

Viewing whose ever a new charm over and over again, remembering whose auspicious stories over and over again people are enraptured, that my Bharat glows on the earth. 67

यत्र सत्यं शिवं सुन्दरं राजते
रामराज्यं च यत्राभवत्पावनम् ।
यस्य ताटस्थ्यनीतिः प्रसिद्धिं गता
भूतले भाति तन्मामकं भारतम् ॥६८॥

जहां सत्य, शिव और सुन्दर सुशोभित रहता है, जहां कभी पवित्र रामराज्य था और जिसकी तटस्थता की नीति जगत्प्रसिद्ध है, वह मेरा भारत भूतल पर सुशोभित हो रहा है ॥६८॥

Where effulges the Truth, the Good and the Beautiful, where Ramarajya, dedicated to social welfare, had its sway and whose policy of non-alignment has won fame in the world, that my Bharat glows on the earth. 68

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

वाजिराजिं गजालिञ्च न्यक्कुर्वता[१]
पण्डितेन्द्रेण यस्मिंल्लवङ्गी वृता ।
सुस्तनी[२] मस्तकन्यस्तकुम्भा प्रिया
भूतले भाति तन्मामकं भारतम् ॥६९॥

जिसमें घोड़ों के समूह एवं हाथियों की पंक्ति का तिरस्कार करते हुए पण्डितराज जगन्नाथ ने सिर पर कलश रखने वाली सुस्तनी प्यारी लंवगी को स्वीकार किया था, वह मेरा भारत भूतल पर चमकता है॥६९॥

Wherein rejecting the rows of horses and elephants Panditaraj Jagannath chose only Lavangi- his beloved with charming breast and bearing pitcher on her head, that my Bharat glows on the earth.
69

साधकैस्सद्भिरध्यात्मचिन्तापरै-
र्देशभक्तैर्विपश्चिद्भिरापूरितम् ।
कर्षकैः कार्मिकैः स्विन्नगात्रैर्युतं
भूतले भाति मेऽनारतं भारतम् ॥७०॥

जो (योग तथा तन्त्र आदि के) साधकों, (कबीर, नानक, ज्ञानेश्वर, रैदास, प्राणनाथ प्रभृति) सन्तों, (पतंजलि, कपिल, शंकर आदि) अध्यात्मचिन्तकों, (भक्तसिंह, ऊधम-सिंह, चन्द्रशेखर आजाद, मेजर आशाराम त्यागी, अब्दुल हमीद, अशफाकुल्ला, पं० रामप्रसाद बिस्मिल, गान्धी, नेहरू, सुभाषचन्द्र बोस, लाला लाजपतराय, श्रीलालबहादुरशास्त्री आदि) देश भक्तों तथा विद्वानों ये परिपूर्ण (रहा है ओर) है एवं जो पसीने से लथपथ शरीर वाले किसानों और मजदूरों से युक्त है, वह मेरा भारत भूतल पर सदा सुशोभित रहता है ॥७०॥

Overbrimmed with the meditators, saints spiritual thinkers, patriots, scholars and sweating peasants and labourers, my Bharat ever glows on the earth.
70

---

१. गजालिं तिरस्कुर्वता–इति पाठान्तरम्। २. सुन्दरी इति पाठान्तरम्।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

मातृभूमेर्विपज्जालमुच्छेदयन्
मृत्युपाशं च कण्ठे सहर्षं धरन् ।
भक्तसिंहोऽस्ति यत्रामरत्वं गतो
भूतले भाति तन्मामकं भारतम् ॥७१॥

जहां जननी जन्मभूमि के विपज्जाल को काटता हुआ और मौत की फांसी को अपने गले में सहर्ष पहनता हुआ भगतसिंह अमर हो गया, वह मेरा भारत भूतल पर सुशोभित है ॥७१॥

Wherein breaking the chains of Motherland's afflictions and inviting noose round his neck Bhagat Singh became immortal, that my Bharat glows on the earth. 71

'डोगराई' स्थले राम आशायुतः
शत्रुटैङ्कान् विभिन्दन् खलाँस्तर्जयन् ।
मातृपूजापरो यत्र नाकं गतो
भूतले भाति तन्मामकं भारतम् ॥७२॥

डोगराई रणक्षेत्र में शत्रु(पाकिस्तान) के टैंकों को तोड़ता हुआ एवं दुष्टों को ललकारता हुआ मेजर आशाराम त्यागी जहां मातृ-भूमि की पूजा करता हुआ स्वर्गगामी हुआ, वह मेरा भारत भूतल पर सुशोभित है॥७२॥

Wherein, Major Asha Ram Tyagi, worshipping Motherland, annihilating enemies' tanks and rebuking the malevolent persons, in Dogarai battlefield made his Heavenly abode, that my Bharata glows on the earth. 72

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

घर्घरस्वानपूर्वं पुरः प्रस्थितान्
शत्रुटैङ्कान् करीन्द्रानिव ध्वंसयन् ।
श्रीहमीदो बभौ केसरी यत्र तद्
भूतले भाति मेऽनारतं भारतम् ।।७३।।

घड़घड़ा कर सामने आते हुए शत्रु के टैंकों को ध्वस्त करने वाले युवक अब्दुल हमीद ने जहां हाथियों के झुण्ड को ध्वस्त करने वाले बबर शेर की शोभा धारण की, वह मेरा भारत भूतल पर सदा सुशोभित रहता है ।।७३।।

Wherein took birth lion-like Abdul Hamid who killed the forthcoming and rumbling tank-elephants of enemy, that my Bhart ever glows on the earth. 73

रक्तपातं विना शस्त्रपातं विना
यत्र सङ्क्रान्तिरायाति मन्दस्मिता ।
येन विश्वं सदा शिक्ष्यते प्रेर्यते
भूतले भाति तन्मामकं भारतम् ।।७४।।

जहां खून-खराबे और हथियारों के टकराने के बिना ही मन्द मुस्कान के साथ क्रान्ति आ जाती है एवं जो विश्व को सदा शिक्षा और प्रेरणा देता है, वह मेरा भारत भूतल पर सुशोभित रहता है ।

Where, without bloodshed or blows of weapons, the revolution comes with sweet smile, and which always inspires and educates the world, that my Bharat glows on the earth. 74

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

यत्र हिंस्त्रः स्वपापैः स्वयं हिंस्यते
यत्र साधुः समत्वाद्भयान्मुच्यते ।
यत्र सत्यं जयं याति नैवानृतं
भूतले भाति तन्मामकं भारतम् ॥७५॥

जहाँ हिंसक अपने पापों से स्वयं ही मर जाता है, जहाँ सज्जन अपनी धीरता और क्षमाशीलता से सभी भयों से मुक्त हो जाता है और जहाँ सत्य की जय होती है न कि झूठ की, वह मेरा भारत भूतल पर सदा सुशोभित है ।

Wherein ferocious killer is killed by his own sins, where virtuous overcomes all the fears by his virtuousness, where the Truth is victorious not the falsehood, that my Bharat glows on the earth.

75

यत्प्रजातन्त्ररक्षापरैर्मानवै-
र्नास्ति हीनं कदापि प्रभाभासुरम् ।
आत्मतेजोमयं तद्ध्यहिंसामयं
भूतले भाति मेऽनारतं भारतम् ॥७६॥

जो प्रजातन्त्र की रक्षा करने वाले मानवों से कभी विहीन नहीं रहता, जो अपनी प्रभा से चमकता रहता है, जो आत्मिक तेज से युक्त है, वह अहिंसामय मेरा भारत भूतल पर सदा सुशोभित रहता है ॥७६॥

Which is never devoid of the democracy-protecting persons and is brilliant, self-confident and non-violent, that my Bharat ever glows on the earth.

76

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

यत्र सर्वंसहा मेदिनी राजते
यत्र शीलं परं भूषणं भण्यते ।
यत्र मौनं चकास्ति व्रतेषूत्तमं
भूतले भाति तन्मामकं भारतम् ॥७७॥

जहाँ की धरती सब कुछ सहन कर लेती है, जहाँ शील ही परम भूषण कहा जाता है, जहाँ मौन सभी व्रतों में उत्कृष्ट है, वह मेरा भारत भूतल पर सदा सुशोभित है ॥७७॥

Where soil is all-forbearing, where modesty is called the best ornament, where silence is considered as the best vow, that my Bharat glows on the earth. 77

सज्जनान् दुर्गतान् दुर्जनान् सद्गतान्
मानिता वारनारीर्विपन्ना वधूः ।
वीक्ष्य चित्तं कवेर्दूयते यत्र तद्
भूतले भाति मेऽनारतं भारतम् ॥७८॥

जहाँ सज्जनों की दुर्गति एवं दुर्जनों के ठाठ-बाट और बाजारू औरतों के सम्मान एवं गृहवधुओं की विपत्तियों को देखकर कवि का चित्त व्यथा से भर उठता है, वह मेरा भारत भूतल पर सदा सुशोभित रहता है॥७८॥

Where, seeing the noble in miserable state and the wicked in prosperous condition, prostitutes honoured and housewives distressed, the poet's heart feels aggrieved, that my Bharat ever glows on the earth. 78

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

दुःखदावानलैर्दग्धदेहान्नरान्
क्षुत्पिपासाकुलान् वृत्तिकष्टार्दितान् ।
वीक्ष्य कारुण्यपूर्णा नरा यत्र तद्
भूतले भाति मेऽनारतं भारतम् ।।७९।।

दुःख-दावानल से झुलसे हुए शरीर वाले, भूख-प्यास से व्याकुल तथा बेरोजगार लोगों को देखकर जहाँ के लोग करुणा से भर जाते हैं, वह मेरा भारत भूतल पर सदा सुशोभित है ।।७९।।

Wherein men feel pity when they see the people roasted with the wild fire of sorrows, threatend by thirst and hunger and tormented with unemployment, that my Bharat ever glows on the earth. 79

चञ्चलां राजलक्ष्मीमुलूकश्रितां
सर्वशुक्लां च वाणीं मरालस्थिताम् ।
यत्र लोको यथेष्टं मुदा वन्दते
भूतले भाति तन्मामकं भारतम् ।।८०।।

जहाँ के लोग उल्लू की सवारी करने वाली चंचल राजलक्ष्मी अथवा हंस पर आरूढ़ सर्वशुक्ला सरस्वती की अपनी इच्छा के अनुसार प्रसन्नतापूर्वक आराधना करते हैं, वह मेरा भारत भूतल पर सुशोभित रहता है।।८०।।

Wherein the devotees worship flickering Rajalakshmi ascending on the chariot of owl, and all-white Saraswati ascending on the chariot of swan according to their own likings, that my Bharat glows on the earth. 80

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

लोकगीतेषु चित्तं यदीयं रतं
लोकनृत्येषु चित्तं यदीयं रतम् ।
लोककृत्येषु चित्तं यदीयं रतं
भूतले भाति तन्मामकं भारतम् ॥८१॥

जिसका मन लोकगीतों में लगा रहता है; जिसका दिल लोकनृत्यों में रमा रहता है; जिसका मन लोकाचारों में लगा रहता है; वह मेरा भारत भूतल पर सुशोभित रहता है ॥८१॥

Whose mind is absorbed in folk songs, folk dances and folk customs, that my Bharat glows on the earth. 81

यत्र पुण्याः सरित्सङ्गमा राजिता
यत्र पाषाणतश्चामृतं स्यन्दते ।
भावना यत्र बोधेन सङ्गच्छते
भूतले भाति तन्मामकं भारतम् ॥८२॥

जहाँ नदियों के पुण्य संगम सुशोभित हैं; जहाँ पत्थर से भी अमृत चू पड़ता है; जहाँ भावना ज्ञान से मिली रहती है; वह मेरा भारत भूतल पर सुशोभित रहता है।।८२।।।

Wherein sacred confluences of rivers look magnified; where nectar oozes from stones; where emotion is paired with intellect, that my Bharat glows on the earth. 82

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

अन्धकारात्प्रकाशं तथाज्ञानतो
ज्ञानमभ्येति मृत्योस्तथा चामृतम् ।
यत्र जीवः स्वरूपावबोधस्थितो
भूतले भाति तन्मामकं भारतम् ॥८३॥

जहाँ अपने स्वरूप का ज्ञान प्राप्त कर लेने वाला जीव अंधेरे से प्रकाश की, अज्ञान से ज्ञान की तथा मृत्यु से अमृत की स्थिति प्राप्त कर लेता है, वह मेरा भारत भूतल पर सुशोभित रहता है ॥८३॥

Where soul, reposed in self-realisation, is led from darkness unto light, from ignorance unto knowledge and from death unto immortality, that my Bharat glows on the earth 83

शासकानां मदं हेलयैव प्रजा
यत्र हन्ति प्रजातन्त्ररक्षापरा ।
त्यागिनो यत्र नैव म्रियन्ते क्वचिद्
भूतले भाति तन्मामकं भारतम् ॥८४॥

जहाँ प्रजातन्त्र की रक्षा करने में तत्पर जनता शासकों के नशे को खेल-खेल में उतार देती है और जहाँ त्यागी व्यक्ति कभी नहीं मरते(यशःकाय से सदा जीवित रहते हैं) वह मेरा भारत भूतल पर सुशोभित है॥८४॥

Where the people, engaged in safeguarding the democracy, deflate the swollen heads of the ruleres in a trice and where the renouncers prove their immortality forever, that my Bharat glows on the earth. 84

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

यत्र नग्नाः क्षुधार्ता अगेहा अपि
स्वाभिमानं जहत्येव नो मानवाः ।
यत्र दृप्तं निरीहस्तृणं मन्यते
भूतले भाति तन्मामकं भारतम् ॥८५॥

जहाँ नंगे, भूखे तथा बेघर लोग भी स्वाभिमान को नहीं छोड़ते तथा जहाँ निरीह (किसी से कुछ न चाहने वाले) प्राणी घमंडी को तिनके के बराबर समझते हैं, वह मेरा भारत भूतल पर सुशोभित हो रहा है॥८५॥

Where even naked, famished and houseless people do not give up their self-respect and where desireless persons count the conceited as nothing, that my Bharat glows on the earth. 85

शासनासन्दिकाराधनैकव्रतं
नेतृवृन्दं समालोक्य छद्मावृतम् ।
यत्र नित्यं हसन्ति प्रजानां गणाः
भूतले भाति तन्मामकं भारतम् ॥८६॥

जहाँ केवल कुर्सीपरस्त तथा छलकपट से पूर्ण(राजनीतिक) नेताओं के समूह को देखकर प्रजा के समूह को नित्य हँसी आती है, वह मेरा भारत भूतल पर सुशोभित हो रहा है ॥८६॥

Where the leaders dedicated only to ruling chair (not to public welfare) are rediculed by the people, that my Bharat glows on the earth. 86

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

यत्र नास्त्यङ्कुशो वाचि कस्यापि वै
यत्र नास्त्यङ्कुशो मानसे कस्यचित् ।
यत्र नास्त्यङ्कुशः कर्मणि क्वापि वै
भूतले भाति तन्मामकं भारतम् ॥८७॥

जहाँ किसी की वाणी पर कोई अंकुश नहीं है; जहाँ किसी के मन पर कोई अंकुश नहीं है; जहाँ किसी के कर्म पर किसी का अंकुश नहीं है; वह मेरा भारत भूतल पर सुशोभित हो रहा है ॥८७॥

Where speech (tongue), mind and action are unfettered, that my Bharat glows on the earth. 87

दुःखपूर्णं जगत्सौख्यपूर्णं भवेद्
यस्य रम्योपदेशैः सुधापूरितैः ।
जङ्गले मङ्गलं यच्च कर्तुं क्षमं
भूतले भाति तन्मामकं भारतम् ॥८८॥

जिसके सुधापूरित रमणीय उपदेशों से दुःखपूर्ण कहा जाने वाला जगत् सुखपूर्ण बन सकता है और जो जंगल में मंगल करने में समर्थ है, ऐसा मेरा भारत भूतल पर सुशोभित हो रहा है ॥८८॥

Whose charming and nectar-brimming sermons may convert the dolourous world into gay and mirthful universe and which can create a paradise in wilderness, that my Bharat glows on the earth. 88

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

आर्षवृन्देषु शान्तिप्रधानेषु वै
यत्र गूढं हि तेजः प्रदाहात्मकम् ।
साध्यते यत्र योगो मुदा साधकै-
र्भूतले भाति तन्मामकं भारतम् ॥८९॥

जहाँ के शान्तिप्रधान ऋषियों के समूह में दाहात्मक तेज भी छिपा रहता है, एवं जहाँ साधक प्रसन्नतापूर्वक योग की साधना करते हैं, वह मेरा भारत भूतल पर सुशोभित हो रहा है ॥८९॥

Wherein lies concealed an energy with inherent power of burning in ascetics, in whom tranquility predominates, and where practisers perform Yoga happily, that my Bharat glows on the earth.
89

यस्य दिल्लीस्थिते पण्डितैर्मण्डिते
भव्यवाणीविहारे मुदा तन्यते ।
श्रीरमाकान्तशुक्लेन काव्यप्रभा
भूतले भाति तन्मामकं भारतम् ॥९०॥

जिसके दिल्ली स्थित एवं विद्वानों से अलंकृत वाणी विहार (मुहल्ले) में रमाकान्त शुक्ल मस्त होकर काव्यप्रभा का विस्तार करता है, वह मेरा भारत भूतल पर सुशोभित हो रहा है ॥९०॥

Wherein Ramakant Shukla, sitting in the magnificent Vani Vihar, the congregation of talents and situated in Delhi, composes poetry mirthfully, that my Bharat glows on the earth.
90

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

मोदमानैः क्वचिद् वर्धमानैः क्वचिद्
वन्द्यमानैः क्वचिच्छोच्यमानैः क्वचित् ।
बाध्यमानैर्नरैः क्वापि सम्पूरितं
भूतले भाति मेऽनारतं भारतम् ॥९१॥

जिसमें कुछ व्यक्तियों की प्रसन्नता और बढ़ोतरी हो रही है, कुछ की वन्दना की जा रही है, वुछ शोचनीय दशा में पड़े हैं तथा कुछ बाधाओं से घिरे हैं-ऐसा मेरा भारत भूतल पर सुशोभित हो रहा है ! ॥९१॥

Where some are happy, some are prospering, some are saluted, some are being worshipped, some are in critical condition and some are aggrieved (even then), my Bharat ever glows on the earth ! 91

चीयमानैः क्वचिद् वर्धमानैः क्वचित्
सेच्यमानैः क्वचित्पात्यमानैः क्वचित् ।
छेद्यमानैः क्वचित्पादपैः शोभितं
भूतले भाति मेऽनारतं भारतम् ॥९२॥

जो कहीं क्षीण होते हुए, कहीं बढ़ते हुए, कहीं सींचे जाते हुए, कहीं पाले जाते हुए और कहीं काटे जाते हुए पादपों से शोभित हैं, वह मेरा भारत भूतल पर सदा चमकता रहता है ! ॥९२॥

Congested with the trees, some thin, some verdant and growing, some irrigated, some nurtured, and some mutilated, that my Bharat ever glows on the earth ! 92

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

जन्मजातैः क्वचित् कर्मजातैः क्वचिद्
दण्ड्यमानैः क्वचिन्मण्ड्यमानैः क्वचित्।
नेतृवर्गैः समाकीर्णमत्यद्भुतं
भूतले भाति मेऽनारतं भारतम् ॥९३॥

जो कहीं जन्म से और कहीं कर्मों से बने हुए, कहीं दण्डित किये जाते हुए और कहीं (माल्यार्पण आदि से) सजाये जाते हुए नेताओं के वर्गों से युक्त है तथा जो अत्यन्त अद्भुत हैं, वह मेरा भारत भूतल पर अनवरत सुशोभित हो रहा है ॥९३॥

Which is crowded with leaders amidst whom some are born great, some achieve recognition through their deeds, some have leadership thrust upon them and some are punished, that my wonderous, Bharat ever glows on the earth. 93

बुद्बुदाभा नृपा यत्र याता लयं
यत्र विद्वान् कविश्चामरो राजते ।
यत्र चेष्टं यशो नैव देहप्रभा
भूतले भाति तन्मामकं भारतम् ॥९४॥

जहाँ पानी के बुलबुले के समान राजागण विलीन हो गये; जहाँ विद्वान् और कवि अमर होकर शोभा पाते हैं और जहाँ शरीर की कान्ति से यश अधिक प्यारा माना गया है; वह मेरा भारत भूतल पर सुशोभित है॥९४॥

Where bubble-like many kings have disappeared but the scholars and poets are enjoying eternity (through their glorious works), where the glow of fame is prefered to the lustre of body, that my Bharat glows on the earth. 94

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

यस्य कीर्तिं प्रतिष्ठां च शोभां मुदा
गायति क्रान्तदर्शी कवीनां चयः ।
यस्य वाणी-विहारोऽतुलो राजते
भूतले भाति तन्मामकं भारतम् ॥९५॥

क्रान्तदर्शी कवियों का समूह जिसकी कीर्ति, प्रतिष्ठा एवं शोभा का प्रसन्नतापूर्वक गान करता है, और जिसके वाणी-विहार की जगत् में कोई तुलना नहीं है वह मेरा भारत भूतल पर सुशोभित हो रहा है॥९५॥

Whose fame, grandeur and beauty are sung by the poets gifted with preternatural vision and whose Vani-Vihar (pastime of learning) is unparalleled, that my Bharat glows on the earth. 95

यस्य वात्सल्यभावेन पूर्णं शुभं
दिव्यमुत्सङ्गमाश्रित्य वैदेशिकैः ।
शान्तिराध्यात्मिकी निर्भयैः पीयते
भूतले भाति तन्मामकं भारतम् ॥९६॥

जिसकी वात्सल्यभावपूर्ण, कल्याणकारी और दिव्य गोद में बैठकर वैदेशिक निर्भय होकर आध्यात्मिक शान्ति (की सुधा) का पान करते हैं, वह मेरा भारत भूतल पर सुशोभित हो रहा है ॥९६॥

Taking shelter in whose devine and affectionate lap, the foreigners fearlessly attain the spiritual tranquility, that my Bharat glows on the earth. 96

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

यस्य तिष्ठन्ति गेया अनेके गुणा
यस्य तिष्ठन्ति गेया अनेकाः क्रियाः ।
अस्ति यस्मिन्ननेकत्व एकस्थिति-
र्भूतले भाति तन्मामकं भारतम् ॥९७॥

जिसके (अभी भी) अनेक गुण गाने के लिए अवशिष्ट हैं, जिसकी अनेक क्रियाएं (अभी भी) गाने के लिए अवशिष्ट हैं, तथा जिसमें अनेकता में एकता व्याप्त है, वह मेरा भारत भूतल पर सुशोभित हो रहा है ॥९७॥

Despite eulogising whose innumerable attributes in divergent ways, many qualities still remain unrevealed, many excellences remain untold and where unity is witnessed in diversity, that my Bharat glows on the earth. 97

मामकीना गिरः शक्तिमत्योऽपि नो
वर्णनं पूर्णतो यस्य कर्तुं क्षमाः ।
वर्णनातीतमेवानुभूयेत यद्
भूतले भाति तन्मामकं भारतम् ॥९८॥

मेरी शक्तिशाली वाणी भी जिसका पूर्णरूप से वर्णन करने में अपने को असमर्थ अनुभव करती है एवं जो वर्णनातीत और अनुभवैकगम्य है, वह मेरा भारत भूतल पर सुशोभित हो रहा है ॥९८॥

My words, though powerful, cannot sing whose perfect beauty, which is indescribable and is the subject of realisation only, that my Bharat glows on the earth. 98

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

यस्य गेहेषु सत्यः स्त्रियः प्रत्यहं
दीपमुज्ज्वाल्य नीराजनं कुर्वते ।
स्वीयभक्त्या तथा तोषयन्ति प्रभुं
भूतले भाति तन्मामकं भारतम् ॥९९॥

जिसके घरों में सती स्त्रियाँ प्रतिदिन दीपक जलाकर भगवान् की आरती करती हैं तथा अपनी भक्ति से प्रभु को सन्तुष्ट रखती हैं, वह मेरा भारत भूतल पर सुशोभित हो रहा है ॥९९॥

Wherein virtuous ladies perform Arati daily by lighting lamp (Deepak) and please the Almighty with their devotion, that my Bharat glows on the earth. 99

प्रस्तरे शङ्करं मृत्तिकालोष्टके
विघ्नराजं गणेशं हृदा भावयत् ।
जीवनं कष्टजुष्टं मुदा यापयद्
भूतले भाति मेऽनारतं भारतम् ॥१००॥

जो अपने मन से पत्थर में शंकर भगवान् की एवं मिट्टी के ढेले में विघ्नराज गणेश की भावना कर लेता है और कष्टों से परिपूर्ण जीवन को मस्ती से काट लेता है, ऐसा मेरा भारत भूतल पर सदा सुशोभित रहता है ॥१००॥

Visualising Lord Shankara in stone and Vighneswar Ganesh in clad and cheerfully passing the sorrow-packed life, my Bharat ever glows on the earth. 100

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

यत्र देशान्तरं प्रस्थिते वल्लभे
ऊर्मिलेव व्यथापूरिता भामिनी ।
विप्रलम्भाम्बुधिं सश्रमं पारयेद्
भूतले भाति तन्मामकं भारतम् ॥१०१॥

जहां परदेश चले जाने पर ऊर्मिला के समान व्यथा से भरी हुई प्रोषितपतिका विरह के समुद्र को परिश्रम के साथ पार कर जाती है, वह मेरा भारत भूतल पर सुशोभित हो रहा है ॥१०१॥

Wherein Proshitapatika (woman whose husband is away) languishing but absorbed in hard work like Urmila (the wife of Lakshmana) could cross over the ocean of the agony of seperation, that my Bharat glows on the earth. 101

वञ्चकैस्तस्करैर्भञ्जकैः स्वार्थिभि-
र्वञ्चितं लुञ्चितं खण्डितं दण्डितम् ।
किन्तु नैजैरमेयैर्बलैर्वर्द्धितं
भूतले भाति मेऽनारतं भारतम् ॥१०२॥

ठगों के द्वारा ठगा जाने पर, तस्करों के द्वारा खसोटा जाने पर, घरफोड़ों के द्वारा खण्डित किया जाने पर तथा स्वार्थियों के द्वारा दण्डित किया जाने पर भी जो अपनी अपरिमित शक्ति से फलता-फूलता रहा है, वह मेरा भारत भूतल पर सदा सुशोभित रहता है॥१०२॥

Though deceived, exploited, devided and punished by the imposters, smugglers, intriguers and vested interests yet prospering with its own unlimited power, my Bharat ever glows on the earth. 102

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

जीवदास्ते न जानामि कस्माद्युगात्
साम्प्रतं निर्धनत्वेऽपि सञ्जीवति ।
मृत्युहीनं जराहीनमाशान्वितं
भूतले भाति मेऽनारतं भारतम् ॥१०३॥

न जाने, यह किस युग से जी रहा है, और यह गरीबी में भी आजकल (या भली प्रकार) जीता है। यह मृत्युहीन है; इसे बुढ़ापा नहीं व्यापता; यह आशान्वित है। मेरा भारत भूतल पर सदा चमकता रहता है॥१०३॥

From what immemorial times it holds its breath is not known to me; even today it lives despite its poverty (or it can live well in poverty too), unconquered by death or senility, my evergreen Bharat ever glows on the earth. 103

तिष्ठतोत्तिष्ठता गच्छता क्रीडता
कुर्वतानेककर्माणि मे जीवने ।
गीयतां गीयतां सप्रमोदं मया
भूतले भाति मेऽनारतं भारतम् ॥१०४॥

उठते हुए, बैठते हुए, चलते हुए, खेलते हुए तथा अपने जीवन में अनेक काम करते हुए मेरे द्वारा सप्रमोद यही गाया जाता रहे कि मेरा भारत भूतल पर सदा सुशोभित रहता है॥१०४॥

While sitting, standing, walking, playing and performing various duties in my life, let me sing mirthfully again and again that my Bharat ever glows on the earth. 104

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

कुत्र सीमातिगा अस्य दिव्या गुणाः ?
कुत्र सीमागतः शब्दराशिश्च मे ?
पारयेऽहं न हीतः परं भाषितुं,
भूतले भाति मेऽनारतं भारतम् ॥१०५॥

कहां तो इसके निःसीम दिव्य गुण और कहां मेरी सीमित शब्दराशि ? मुझसे तो इससे अधिक कुछ कहते नहीं बन पड़ता कि 'मेरा भारत भूतल पर सदा शोभित रहता है'॥१०५॥

On one hand are its limitless divine qualities and on the other hand, is my limited vocabulary. I cannot say more than this, that my Bharat ever glows on the earth. 105

निर्बलं निर्धनं कैश्चिदुक्तं सद-
प्यस्ति यत्स्वाभिमानेन पूर्णं सदा ।
इन्दिराशारदासाधनामन्दिरं[१]
भूतले भाति मेऽनारतं भारतम् ॥१०६॥

कुछ लोगों के द्वारा 'निर्बल' तथा 'निर्धन' कहा जाने पर भी जो सदा स्वाभिमान से परिपूर्ण है तथा जो इन्दिरा (लक्ष्मी) और शारदा (सरस्वती) का साधना- मन्दिर है वह मेरा भारत भूतल पर सदा सुशोभित रहता है॥१०६॥

Though propagated as feeble and famished by some persons yet which is full of self-respect and is the worship-temple of Indira (Lakshmi) and Sharada (Sarasvati), that my Bharat ever glows on the earth. 106

---

१. पाठान्तरम्–शारदाश्रीसपर्यापरं पावनं ।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

सन्तु दोषा अनेकेऽत्र कैश्चिन्मताः
किन्तु नाहं प्रपश्यामि तान् मन्दधीः ।
वन्दनीयं मया कीर्तनीयं मया
मोदतां वर्धतां राजतां भारतम् ॥१०७॥

बेशक इसमें कुछ (चतुर) लोगों के विचार से (गरीबी, बेरोजगारी, अन्ध विश्वास, पिछड़ापन आदि) अनेक दोष विद्यमान हों किन्तु मैं उन्हें देख नहीं पाता, यदि इसके लिए लोग मुझे मन्दबुद्धि कहते हैं तो कहें, इसकी मुझे चिन्ता नहीं। मैं तो अपने भारत की वन्दना करता रहूंगा और इसकी कीर्ति का गान करता रहूंगा। मेरा भारत प्रसन्न रहे ! मेरा भारत फले-फूले ! मेरा भारत शोभा प्राप्त करता रहे !॥१०७॥

Let there be many flaws here in somebody opinion but being dullwitted I cannot see them. It is to be worshipped by me; it is to be sung by me. May my Bharat be happy ! May it prosper ! My it be glorified !
107

शोषितो नात्र कश्चिद्भवेत्केनचिद्
व्याधिना पीडितो नो भवेत्कश्चन ।
नात्र कोऽपि व्रजेद्दीनतां हीनतां
मोदतां मे सदा पावनं भारतम् ॥१०८॥

यहां कोई किसी का शोषण न करे; यहां कोई भी रोग से पीड़ित न हो; यहां कोई भी दीन और हीन न रहे; मेरा पवित्र भारत सदा प्रसन्न रहे!॥१०८॥

Let nobody be exploited by anybody here; let nobody suffer from deseases here; let nobody be humiliated here; let nobody feel inferiority here. May my pious Bharat be happy and gay !
108

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

दूरदर्शने प्रस्तुतं 'भाति मे भारतम्'

(प्रणेता, निर्देष्टा-डा० रमाकान्त शुक्लः)

भाति मे भारतम्, भाति मे भारतम् ।
भूतले भाति मेऽनारतं भारतम् ।।ध्रुवपदम्।।

प्रथमो भागः

विश्वबन्धुत्वमुद्घोषयत्पावनं विश्ववन्द्यैश्चरित्रैर्जगत्पावयत् ।
विश्वमेकं कुटुम्बं समालोकयद् भूतले भाति मेऽनारतं भारतम् ।।
'क्रुद्धहिंसाबले क्वास्त्यहिंसाजयः? कुत्र मुच्येत बद्धश्च मामन्तरा ?'
प्रश्नमित्थं जगत्सम्मुखे स्थापयद् भूतले भाति मेऽनारतं भारतम् ।।
वेशभूषाशनोपासनापद्धति - क्रीडनामोद - संस्कार - वृत्त्यादिषु ।
यद्धि भिन्नं सदप्यस्त्यभिन्नं सदा भूतले भाति तन्मामकं भारतम् ।।
दुःखपूर्णं जगत्सौख्यपूर्णं भवेद् यस्य रम्योपदेशैः सुधापूरितैः ।
जङ्गले मङ्गलं यच्च कर्तुं क्षमं भूतले भाति तन्मामकं भारतम् ।।
यत्र पुण्याय मान्यं परेषां हितं यत्र पापाय पीडा परेषां मता ।।
यत्र सत्यं जयं याति नैवानृतं भूतले भाति तन्मामकं भारतम् ।।ध्रुव०।।

द्वितीयो भागः

जाह्नवी-चन्द्रभागा-जलैः पावितं भानुजा-नर्मदा-वीचिभिर्लालितम् ।
तुङ्गभद्रा-विपाशादिभिर्भावितं भूतले भाति मेऽनारतं भारतम् ।।ध्रुव०।।
विन्ध्य-सह्याद्रि-नीलाद्रिमालान्वितं शुभ्रहैमाद्रि-हासप्रभापूरितम् ।
अर्बुदारावलीश्रेणि-सम्पूजितम् भूतले भाति मेऽनारतं भारतम् ।।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

यत्र मन्दाकिनी पापसंहारिणी यत्र गोदावरी चारुसञ्चारिणी ।
देववाणी च यत्रास्ति मोदाकुला भूतले भाति तन्मामकं भारतम् ।।ध्रुव०।।
यत्प्रकृत्याः सुलीलास्थलं राजते पक्षिणां यद्विहारस्थलं विद्यते ।
यच्च षण्णामृतूणां विलासैर्युतं भूतले भाति-तन्मामकं भारतम् ।।ध्रुव०।।

तृतीयो भागः

गोस्तनी-सेवपूर्णं मधुप्लावितं देवदारूद्वहं नौगृहैः रञ्जितम् ।
सुन्दरं यस्य काश्मीरकं राजते भूतले भाति तन्मामकं भारतम् ।।
क्षारमम्भोधिमापीय यस्मिन् स्थितैर्नारिकेलैः सुधोद्गारिभिः श्यामलः ।
शङ्कराचार्यदः केरलो राजते भूतले भाति तन्मामकं भारतम् ।।ध्रुव०।।
गण्डकी-शोण-गङ्गा-युता पाटली लिच्छिवी-सेविता चापि वैशालिका ।
भूषयामासतुर्यस्य पूर्वाञ्चलं भूतले भाति तन्मामकं भारतम् ।।ध्रुव०।।
श्रीदयानन्द-गान्ध्युज्ज्वलं गुर्जरं स्वर्णबङ्गं विवेकारविन्दोज्ज्वलम् ।
नानकाद्युज्ज्वलं पञ्चतोयं दधद् भूतले भाति मेऽनारतं भारतम् ।।ध्रुव०।।

चतुर्थो भागः

रामकृष्णावतारस्थले विश्रुते नेहरू-मालवीयादि-रत्नोज्ज्वले ।
उत्तरे यस्य देशेऽस्ति तीर्थाधिपो भूतले भाति तन्मामकं भारतम् ।।
गोखले-बालगंगाधराराधितं श्रीशिवाजी-तुकाराम-सम्बोधितम् ।
यन्महाराष्ट्रकं सह्यशृङ्गोच्छ्रितं भूतले भाति तन्मामकं भारतम् ।।
आलवारस्वरैर्मोहितं तामिलं मध्यदेशं तथा चम्बलाद्युज्ज्वलम् ।
यच्च सोल्लासमासाममङ्के दधद् भूतले भाति तन्मामकं भारतम् ।।ध्रुव०।।
गोम्मटेशानुभावप्रभापूरितम् यस्य कर्णाटकं चन्दनामोदितम् ।
यस्य राजस्थलं वीरागाथांकितं भूतले भाति तन्मामकं भारतम् ।।
आन्ध्रनागारुणादिप्रदेशेषु यत् स्वीयभूतिं तनोति प्रभूतां सदा ।
यस्य सर्वस्थलेष्वस्ति प्रत्यग्रता भूतले भाति तन्मामकं भारतम् ।।ध्रुव०।।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

पञ्चमो भागः

भाखडाबन्ध-दामोदरीयोजना - बाणगङ्गा-फरक्कादिसिक्तोर्जितम् ।
ब्रह्मपुत्रादिसन्दर्शिताम्बुच्छटं भूतले भाति मेऽनारतं भारतम् ।।ध्रुव०।।
विद्युदुत्पादने तैलसंशोधने, इन्धनान्वेषणे लौहनिष्पादने ।
यन्त्रनिर्माणकार्ये समर्थं च सद् भूतले भाति मेऽनारतं भारतम् ।।
यद्बरौनी-भिलाई-बुकारो-स्वनैः स्वोन्नतिस्यन्दनोत्थं शुभं घर्घरम् ।
दिक्षु विस्तारयद् वीक्ष्यते सर्वदा भूतले भाति तन्मामकं भारतम् ।।ध्रुव०।।
आर्यभट्टं वियन्मण्डले स्थापयत् पोखरण्-भूमिगर्भेऽणुशक्तिं किरत् ।
शान्तिकार्येष्वणुं प्रेरयत्सन्ततं भूतले भाति मेऽनारतं भारतम् ।।
यद्दरिद्रव्यथां हर्तुमाकाङ्क्षति यच्च वैज्ञानिकीमुन्नतिं वाञ्छति ।
यन्निजाध्यात्मरत्नप्रभालोकितं भूतले भाति तन्मामकं भारतम् ।।ध्रुव०।।

षष्ठो भागः

एशियाडं सुभव्यं समायोजयद् अन्तरिक्षे नरान् निर्भयान् प्रेषयत् ।
निर्गुटं राष्ट्रसम्मेलनं योजयत् भूतले भाति मेऽनारतं भारतम् ।।
रोगजालं चिकित्सालयस्थापनैरोषधोत्पादनैः शल्यशोधैस्तथा ।
नूतनाभिश्चिकित्साभिरुन्मूलयद् भूतले भाति मेऽनारतं भारतम् ।।ध्रुव०।।
अग्निमूर्जस्वलं स्वत्वरक्षाकृते साधनैरात्मनीनैः सुसंसाधयत् ।
युद्धापोतांश्च सिन्धूरसि स्थापयद् भूतले भाति मेऽनारतं भारतम् ।।ध्रुव०।।
रेल-नौका-विमानैस्तथा गन्त्रिभिर्यानकैस्तैश्च तैश्च प्रवेगान्वितैः ।
य''च्चरैवे'' ति नित्यं समुद्घोषयद् भूतले भाति तन्मामकं भारतम् ।।ध्रुव०।।

सप्तमो भागः

मेघमालाकुलं विद्युदुद्द्योतकं काशहासान्वितं सर्षपश्रीयुतम् ।
पक्वगोधूमसस्यैश्च सम्पूरितं भूतले भाति मेऽनारतं भारतम् ।।ध्रुव०।।
कोकिलैः कूजितं षट्पदैर्गुञ्जितं केकिभिर्नृत्यपारङ्गतैर्नादितम् ।
सारिका-कीर-वादप्रवादैर्युतं भूतले भाति मेऽनारतं भारतम् ।।ध्रुव०।।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

हंस-कारण्डवैस्सारसैर्वर्तकैः कौञ्चकाकैः पिकैः खञ्जरीटैः शुकैः।
तित्तिरैष्टिट्टिभैः श्येनगृध्रैश्चितं भूतले भाति मेऽनारतं भारतम् ।।ध्रुव०।।
श्यामलानोकहश्रीसमृद्धान्तरं पद्मनेत्रैस्सरोभिस्समालोकितम् ।
निर्झरैः श्वेतफैनैस्समृद्धाञ्चलं भूतले भाति मेऽनारतं भारतम् ।।ध्रुव०।।

अष्टमो भागः

द्वारकां सेतुबन्धं पुरीं बदरिकां तिरुपतिं मधुपुरीं चाजमेरं दधत् ।
पुष्करामृतसरस्तीर्थराजैर्युतं भूतले भाति मेऽनारतं भारतम् ।।
हस्तिगुम्फामजन्तामलौरां दधत् खर्जुराहो-गया-सारनाथैर्लसत् ।
ताज-कोणार्क-विष्णुध्वजैर्मण्डितं भूतले भाति मेऽनारतं भारतम् ।।
होलिका-दशहरा-पर्वकोजागरी-पोङ्गल-श्रावणी-दीपमालामयम् ।
लोहडीदौणमाद्युत्सवैः पूरितं भूतले भाति मेऽनारतं भारतम् ।।ध्रुव०।।
ओडिसीं मणिपुरीं कथक-गर्बादिकं कूचिपूडिं च गिद्दां छऊं भङ्गडाम् ।
कथकलीं डाण्डियां भरतनाट्यं दधद् भूतले भाति मेऽनारतं भारतम् ।।
मन्दिरैर्मस्जिदैश्चैत्य-गिर्जागृहै-रार्यगेहैर्गुरुद्वारकैर्भ्राजितम् ।
कर्मभूः शर्मभूर्धर्मभूर्मर्मभूः भूतले भाति मेऽनारतं भारतम् ।।ध्रुव०।।

नवमो भागः

वेदभाभासितं सत्कलालासितं रम्यसङ्गीत-साहित्य-सौहित्य-भूः ।
भारती-वल्लकी-झङ्कृतैझङ्कृतं भूतले भाति मेऽनारतं भारतम् ।।ध्रुव०।।
संस्कृतं प्राकृतं तामिलं तेलुगुं कन्नडं कैरलीं बाङ्गलामाङ्गलाम् ।
वाचमन्यां च तां तां ब्रुवद् वर्धते राष्ट्रभाषायुतं मामकं भारतम् ।।
यत्र पुण्याः सरित्सङ्गमा राजिता यत्र पाषाणतश्चामृतं स्यन्दते ।
भावना यत्र बोधेन सङ्गच्छते भूतले भाति तन्मामकं भारतम् ।।ध्रुव०।।
आर्षवृन्देषु शान्तिप्रधानेषु वै यत्र गूढं हि तेजः प्रदाहात्मकम् ।
साध्यते यत्र योगो मुदा साधकैर्भूतले भाति तन्मामकं भारतम् ।।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

यस्य वात्सल्यभावेन पूर्णं शुभं दिव्यमुत्सङ्गमाश्रित्य वैदेशिकैः ।
शान्तिराध्यात्मिकी निर्भयैः पीयते भूतले भाति तन्मामकं भारतम् ।।ध्रुव०।।

दशमो भागः

भूधराकाशतोयेषु रक्षापरो यत्र शत्रून् भटो हेलया नाशयेत् ।
यत्र वीराङ्गना युद्धभूमिं गता भूतले भाति तन्मामकं भारतम् ।।
यत्प्रजातन्त्ररक्षापरैर्मानवैर्नास्ति हीनं कदापि प्रभाभासुरम् ।
आत्मतेजोमयं तद्धयहिंसामयं भूतले भाति मेऽनारतं भारतम् ।।ध्रुव०।।
साधकैस्सद्भिरध्यात्मचिन्तापरैर्देशभक्तैर्विपश्चिद्भिरापूरितम् ।
कर्षकैः कार्मिकैः स्विन्नगात्रैर्युतं भूतले भाति मेऽनारतं भारतम् ।।ध्रुव०।।
प्रेरणादायकं सत्कथागायकं ज्ञानविज्ञानतेजोबलाधायकम् ।
दुःखदारिद्र्य-दग्धान् सदा पालयन्मोदते मे सदा पावनं भारतम् ।।ध्रुव०।।
यत्र नास्त्यङ्कुशो वाचि कस्यापि वै यत्र नास्त्यङ्कुशो मानसे कस्यचित् ।
यत्र नास्त्यङ्कुशः कर्मणि क्वापि वै भूतले भाति तन्मामकं भारतम् ।।ध्रुव०।।
जीवदास्ते न जानामि कस्माद्युगात् साम्प्रतं निर्धनत्वेऽपि सञ्जीवति ।
मृत्युहीनं जराहीनमाशान्वितं भूतले भाति मेऽनारतं भारतम् ।।ध्रुव०।।

एकादशो भागः

मानवामानितं दानवाबाधितं निर्जराराधितं सज्जनासाधितम् ।
पण्डितैः पूजितं पक्षिभिः कूजितं भूतले भाति मेऽनारतं भारतम् ।।
यस्य संदृश्य संदृश्य शोभा नवा यस्य संस्मृत्य संस्मृत्य गाथा शुभा ।
रोमहर्षो नृणां जायते वै सतां भूतले भाति तन्मामकं भारतम् ।।ध्रुव०।।
यच्च विश्रामभूमिर्मतं प्राणिनां यस्य चित्ते प्रभूतोऽवकाशस्तथा ।
यत्र चागत्य गन्तुं न कोऽपीच्छुको भूतले भाति तन्मामकं भारतम् ।।
पण्डितैर्योद्धृभिर्वाणिजैः कार्मिकैः शस्त्रिभिः शास्त्रिभिर्वर्णिभिर्गेहिभिः ।
वानप्रस्थैश्च सन्न्यासिभिर्मण्डितं भूतले भाति मेऽनारतं भारतम् ।।ध्रुव०।।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

यस्य चेतोहरा भान्ति लोके कला यस्य शिल्पान्यपूर्वाणि चैवासते ।
यत्पुराणैर्नवैर्वैभवैः पूरितं भूतले भाति तन्मामकं भारतम् ।।ध्रुव०।।

द्वादशो भागः

यत्त्रयीसाङ्ख्ययोगादिमार्गैर्युतं जीवनं मुक्तमाकर्तुमाकाङ्क्षति ।
शीलसन्तोषसत्यादिभी रक्षितं भूतले भाति तन्मामकं भारतम् ।।
दर्शनज्ञानचारित्र्यसम्मेलनं यत्र मोक्षस्य मार्गं भणन्त्यागमाः ।
ज्ञानमास्ते च भारः क्रियां वै विना भूतले भाति तन्मामकं भारतम् ।।ध्रुव०।।
व्यासवाल्मीकिरत्नाकरैरुज्ज्वलं स्वादुकादम्बरीपानलुब्धं सदा ।
कालिदासेन भासेन संद्योतितं भूतले भाति मेऽनारतं भारतम् ।।
योगवासिष्ठगीतामहाभारतैर्ग्रन्थरत्नैश्च तैस्तैः प्रबुद्धं तथा ।
मानसं बीजकं सूरसिन्धुं दधद् भूतले भाति मेऽनारतं भारतम् ।।
यत्र माता पिताचार्य आराध्यते देवतेव प्रधीभिर्जनैस्सादरम् ।
यत्र दुःखी दरिद्रोऽस्ति नारायणो भूतले भाति तन्मामकं भारतम् ।।ध्रुव०।।
यस्य विश्वे समस्तेऽपि विद्योतते पावनं नाम दिव्यं यशश्चोज्ज्वलम् ।
प्राणिसङ्घं च प्रीणाति यद्दर्शनं भूतले भाति तन्मामकं भारतम् ।।ध्रुव०।।

त्रयोदशो भागः

यत्स्वतन्त्रं विधातुं हुतं जीवनं देशभक्तैरसङ्ख्यैर्विलम्बं विना ।
यस्य सौख्यं समृद्धिश्च साध्ये सदा भूतले भाति तन्मामकं भारतम् ।।
यत्र झञ्झेव झांसीश्वरी कुर्वती क्रूरदुर्नीतिदुष्टैः सहायोधनम् ।
कर्तुमैच्छत्स्वदेशं स्वतन्त्रं द्रुतं भूतले भाति तन्मामकं भारतम् ।।
'जन्मसिद्धाधिकारः स्वराज्यं हि मे तं गृहीत्वैव तुष्टिं गमिष्याम्यहम् ।'
बालगङ्गाधरो यत्र घोषं ददौ भूतले भाति तन्मामकं भारतम् ।।
'दीयतां मे स्वरक्तं भवद्भिस्समैरात्मतन्त्र्यं भवद्भ्यो मया दास्यते ।'
घोषमित्थं सुभाषस्य संश्रावयत् भूतले भाति मेऽनारतं भारतम्।।ध्रुव०।।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

स्वीयदार्ढ्येन कार्यैस्तथा नीतिभिर्लौहवीरः पटेलः सदा धीरधीः ।
एकतां रक्षितुं यस्य संस्मर्यते भूतले भाति तन्मामकं भारतम् ॥
'सैनिकाः कर्षकाश्चाप्नुयुर्वै जयम्' इत्थमुद्घोषयन् शास्त्रिवर्यः प्रधीः ।
यत्र चक्रे समुत्साहदीप्तान् जनान् भूतले भाति तन्मामकं भारतम् ॥ध्रुव०॥
नायकाश्चापरे नूतनैर्नूतनैर्यैश्च घोषैर्जनान्दोलनं चक्रिरे ।
स्मारयत्तान् यथाकालमाशाप्रदान् भूतले भाति मेऽनारतं भारतम् ॥ध्रुव०॥

चतुर्दशो भागः

मातृभूमेर्विपज्जालमुच्छेदयन् मृत्युपाशं च कण्ठे सहर्षं धरन् ।
भक्तसिंहोऽस्ति यत्रामरत्वं गतो भूतले भाति तन्मामकं भारतम् ॥
'स्मो नु विक्रेतुकामा वयं स्वं शिरः, दर्शनीयं बलं किं नु हन्तुः करे' ।
इत्थमाभाषते बिस्मिलो यत्र तद् भूतले भाति मेऽनारतं भारतम्॥ध्रुव०॥
शेखरश्चन्द्रपूर्वोऽशफाकस्तथाऽन्येप्यनेके हुतात्मान उत्साहिनः ।
जीवनं स्वं यदर्थं बलिं चक्रिरे भूतले भाति तन्मामकं भारतम् ॥
घर्घरस्वानपूर्वं पुरः प्रस्थितान् शत्रुटैङ्कान् करीन्द्रानिव ध्वंसयन् ।
श्रीहमीदो बभौ केसरी यत्र तद् भूतले भाति मेऽनारतं भारतम् ॥
'डोगराई' स्थले राम आशायुतः शत्रुटैङ्कान् विभिन्दन् खलांस्तर्जयन् ।
मातृपूजापरो यत्र नाकं गतो भूतले भाति तन्मामकं भारतम् ॥ध्रुव०॥
देशभक्तान् प्रति स्वादरं व्यञ्जयद् भीषणं युद्धदावानलं वारयत् ।
कालकूटं पिबच्चापि मोदं वहद् भूतले भाति मेऽनारतं भारतम्॥ध्रुव०॥

पञ्चदशो भागः

देहली राजधानी यदीया प्रिया नूतना नूतना प्रत्यहं स्पन्दते ।
स्वाङ्कमाप्तान् जनान् पालयन्ती सदा भूतले भाति तन्मामकं भारतम् ॥
जन्वरीमासषड्विंशके वासरे इण्डियागेट-पार्श्वस्थितो दर्शकः ।
यस्य शोभाप्रवाहे मुदा मज्जति, भूतले भाति तन्मामकं भारतम् ॥ध्रुव०॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

यस्य दिल्लीस्थिते रक्तदुर्गे शुभे संसदश्चोत्तमाङ्गे त्रिरङ्गध्वजः ।
सार्वभौमीं स्वसत्तां वदत्युल्लसन् भूतले भाति तन्मामकं भारतम् ॥
वाजिराजिं गजालिं च न्यक्कुर्वता पण्डितेन्द्रेण यस्मिंल्लवङ्गी वृता ।
सुस्तनी मस्तकन्यस्तकुम्भा प्रिया भूतले भाति तन्मामकं भारतम् ॥ध्रुव०॥
यस्य दिल्लीस्थिते पण्डितैर्मण्डिते भव्यवाणीविहारे मुदा तन्यते ।
श्रीरमाकान्तशुक्लेन काव्यप्रभा भूतले भाति तन्मामकं भारतम् ॥
यस्य वैदेशिकैर्यात्रिभिः कीर्तिता चारुकीर्तिः ककुब्व्यापिनी प्रोज्ज्वला ।
यस्य धर्मो विदेशैस्समालिङ्गितो भूतले भाति तन्मामकं भारतम् ॥ध्रुव०॥

षोडशो भागः

यच्च तीर्थैः पवित्रैर्व्रतैरुत्सवैः पर्वभिर्दर्शनीयैः स्थलैः शोभितम् ।
यच्च नानाजयन्तीगणै राजितं भूतले भाति तन्मामकं भारतम् ॥
प्राच्यपाश्चात्त्यशिक्षाप्रणालीयुतैर्बालबालायुवप्रौढविद्यालयैः ।
विश्वविद्यालयैः शोधगेहैर्युतं भूतले भाति मेऽनारतं भारतम् ॥
यद्रसालं रसालैस्तथान्यैः फलैः षड्रसैर्भोजनैर्लोकतृप्तिप्रदम् ।
यत्र पूज्या लताः पादपा देववद् भूतले भाति तन्मामकं भारतम् ॥
यत्र दृश्या वनानी (वनाली) मनोमोहिनी यत्र दृश्या हिमानी मनोमोहिनी।
वाटिकोद्यानसत्क्षेत्रशोभावहं भूतले भाति मेऽनारतं भारतम् ॥
सागरीयैस्तटैर्गोचरैः प्राञ्जलैः पक्षिणां वा पशूनां विहारस्थलैः ।
सौम्यरौद्रस्वरूपैः प्रकृत्याः युतं भूतले भाति मेऽनारतं भारतम् ॥
पर्वतीयान् प्रदेशान् जगन्मोहनान् यत्र पर्यट्य यात्रिव्रजो मोदते ।
पर्वतारोहिणां यच्छरण्यस्थलं भूतले भाति तन्मामकं भारतम्॥ध्रुव०॥
आहिमाद्रेस्तथैवा च कन्याकुमार्यन्तरीपाद्यदास्ते जनानां तपः ।
तेन विश्वस्य सौख्यं सदा साधयद् भूतले भाति मेऽनारतं भारतम्॥ध्रुव०॥

सप्तदशो भागः

अर्थकामान्वितं धर्ममोक्षान्वितं भक्तिभावान्वितं ज्ञानकर्मान्वितम् ।
नैकमार्गैः प्रभुं चैकमाराधयद् भूतले भाति मेऽनारतं भारतम् ॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

शम्प्रदं शङ्करं माधवं राघवं पार्वतीं राधिकां जानकीं च स्तुवत् ।
विट्ठलं बुद्धदेवं जिनं च स्मरद् भूतले भाति मेऽनारतं भारतम् ॥
विश्वनाथं महाकालमाराधयद् एकलिङ्गं भजद् वेङ्कटेशं स्मरत् ।
कालिकां पूजयद् वैष्णवीं च स्तुवद् भूतले भाति मेऽनारतं भारतम् ॥
कुंकुमैश्चन्दनैः पुष्करैः पाटलैः सर्वगं सच्चिदानन्दमाराधयत् ।
सर्वभूतेषु दृष्टिं समां धारयद् भूतले भाति मेऽनारतं भारतम् ॥
कृष्णलीलायुतं वेणुसन्नादितम् पावनं भावनं यत्र वृन्दावनम् ।
शम्भुशूलस्थिता यत्र वाराणसी भूतले भाति तन्मामकं भारतम् ॥
यन्मुनीनां तपस्यास्थली कथ्यते यत्परब्रह्मलीलास्थली विद्यते ।
यच्च नानाकथानां निधी राजते भूतले भाति तन्मामकं भारतम् ॥ध्रुव०॥
मामकीना गिरः शक्तिमत्योऽपि नो वर्णनं पूर्णतो यस्य कर्तुं क्षमाः ।
वर्णनातीतमेवानुभूयेत यद् भूतले भाति तन्मामकं भारतम् ॥ध्रुव०॥

अष्टादशो भागः

लोकगीतेषु चित्तं यदीयं रतं लोकनृत्येषु चित्तं यदीयं रतम् ।
लोककृत्येषु चित्तं यदीयं रतं भूतले भाति तन्मामकं भारतम् ॥
कुम्भसिंहस्थवैशाखिमुक्तेश्वर-सोनपूरादिमेलापकै रञ्जितम् ।
रासलीलायुतं रामलीलायुतं भूतले भाति मेऽनारतं भारतम्॥ध्रुव०॥
यत्कुरुक्षेत्रमध्ये स्वयं श्रीहरिर्निष्क्रियं पार्थमाश्वासयद् गीतया ।
स्वीयरूपेण तं च व्यधात्कर्मठं भूतले भाति तन्मामकं भारतम् ॥
शुक्रतालास्पदे यत्र वैयासकिः पापहन्त्रीं कथामाह साप्ताहिकीम् ।
यत्र चाद्याप्यवृद्धो वटो राजते भूतले भाति तन्मामकं भारतम् ॥
यत्कवीनां गणैरस्ति संशोभितं यच्च वैज्ञानिकानां गणैः राजितम् ।
यस्य सङ्गीतकारा जगद्विश्रुता भूतले भाति तन्मामकं भारतम् ॥ध्रुव०॥
यस्य शिष्यास्तथाध्यापका विश्रुताः यस्य विद्याप्रशाखाश्च विश्वश्रुताः ।
संस्कृतं संस्कृतिर्यस्य विश्वश्रुते भूतले भाति तन्मामकं भारतम् ॥ध्रुव०॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

तिष्ठतोत्तिष्ठता गच्छता क्रीडता कुर्वतानेककर्माणि मे जीवने ।
गीयतां गीयतां सप्रमोदं मया 'भूतले भाति मेऽनारतं भारतम्' ।।ध्रुव०।।

एकोनविंशो भाग:

कर्दमाक्रान्तवीथिषु सौधेषु वा यस्य पादातमार्गेषु गेहेषु वा ।
जीवनं लोकसेवापरं लक्ष्यते भूतले भाति तन्मामकं भारतम् ।।
वह्निभूकम्पझञ्झाजलप्लावनैर्भीषितं चापि यत्साहसं न त्यजेत् ।
ईतिभीतिप्रभावांस्तथा तर्जयेत् भूतले भाति तन्मामकं भारतम्।।ध्रुव०।।
वञ्चकैस्तस्करैर्भञ्जकैः स्वार्थिभिर्वञ्चितं लुञ्चितं खण्डितं दण्डितम् ।
किन्तु नैजैरमेयैर्बलैर्वर्द्धितं भूतले भाति मेऽनारतं भारतम् ।।
शासनासन्दिकाराधनैकव्रतं नेतृवृन्दं समालोक्य छद्मावृतम् ।
यत्र नित्यं हसन्ति प्रजानां गणाः भूतले भाति तन्मामकं भारतम् ।।
व्यावृतास्याः समस्याः समाधाय यत् स्वावलम्बं समालब्धुमाकाङ्क्षति ।
मार्गमुच्चावचं लङ्घयित्वा चलद् भूतले भाति तन्मामकं भारतम् ।।
यत्र हत्याबलात्कारसम्पीडिता दस्युतोत्कोचमाहार्घ्यसंशोषिताः ।
नो हताशा जना आयतिप्रेक्षका भूतले भाति तन्मामकं भारतम् ।।ध्रुव०।।
आर्तरक्षार्थमस्त्राणि शस्त्राण्यथो यत्र मान्यानि हन्तुं न चानागसः ।
जागरूका यदीयाः सदा सैनिका भूतले भाति तन्मामकं भारतम् ।।
यत्र नग्नाः क्षुधार्ता अगेहा अपि स्वाभिमानं जहत्येव नो मानवाः ।
यत्र दृप्तं निरीहस्तृणं मन्यते भूतले भाति तन्मामकं भारतम् ।।ध्रुव०।।

विंशो भाग:

रक्तपातं विना शस्त्रपातं विना यत्र सङ्क्रान्तिरायाति मन्दस्मिता ।
येन विश्वं सदा शिक्ष्यते प्रेर्यते भूतले भाति तन्मामकं भारतम् ।।ध्रुव०।।
शासकानां मदं हेलयैव प्रजा यत्र हन्ति प्रजातन्त्ररक्षापरा ।
त्यागिनो यत्र नैव म्रियन्ते क्वचिद् भूतले भाति तन्मामकं भारतम् ।।
निर्बलं निर्धनं कैश्चिदुक्तं सदप्यस्ति यत्स्वाभिमानेन पूर्णं सदा ।
शारदाश्रीसपर्यापरं पावनं भूतले भाति मेऽनारतं भारतम् ।।ध्रुव०।।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

यस्य तिष्ठन्ति गेया अनेके गुणा यस्य तिष्ठन्ति गेया अनेकाः क्रियाः ।
अस्ति यस्मिन्ननेकत्व एकस्थितिर्भूतले भाति तन्मामकं भारतम् ॥
सन्तु दोषा अनेकेऽत्र कैश्चिन्मताः किन्तु नाहं प्रपश्यामि तान् मन्दधीः ।
वन्दनीयं मया कीर्तनीयं मया मोदतां वर्धतां राजतां भारतम् ॥
शोषितो नात्र कश्चिद्भवेत्केनचिद् व्याधिना पीडितो नो भवेत्कश्चन ।
नात्र कोऽपि व्रजेद्दीनतां हीनतां मोदतां से सदा पावनं भारतम् ॥
एत बालाः किशोर्यो युवत्यस्समा एत बालाः किशोरा युवानस्तथा ।
प्रौढवृद्धाः ! समैः गीयतां गीयतां 'भूतले भाति मेऽनारतं भारतम्' ॥ध्रुव०॥

(१-१० भागानां प्रथमं प्रसारणं २१-१-१९९० तः २१-४-१९९० यावत् प्रातः ८-३६ वादनवेलायां जातम्। ११-२० भागानां प्रथमं प्रसारणं दिल्लीदूरदर्शनकेन्द्रात् २३-१-१९९२ तः ३-२-१९९२ यावत् रविवारवर्जं ३१-१-१९९२ तमतारिकावर्जं च प्रतिदिनं प्रातःकालीनराष्ट्रियकार्यक्रमे ७-१५ वादनवेलायां जातम्। पुनःप्रसारणमनेकधा जातम्)

'भाति मे भारतं' काव्यं राष्ट्रप्रगतिहेतवे ।
श्रीरमाकान्तशुक्लस्य नवला जपमालिका ॥
दूरदर्शनसश्रीका सूरिसंसद्बहुश्रुता ।
सेयं कवयितुर्जीयात् कविताकल्पवल्लरी ॥
–त्रिपाठिनो भास्कराचार्यस्य

⌘⌘⌘

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

('**भाति मे भारतम्**'इत्यस्य काव्यस्य कृते रचितानि बहूनि पद्यानि काव्ये नैव प्राकाश्यं गतानि १०८ पद्यसंख्यारक्षानुरोधात्। किन्तु कतिपयानि पद्यानि इतस्ततः प्रकाशितानि जातानि। अनेकानि अप्रकाशितावस्थायां तिष्ठन्ति। अत्र परिशिष्टे डा० एम०आइ० खान-सम्पादिते 'राष्ट्रियमैक्यम्'इत्येतन्नामधेये ग्रन्थे प्रकाशितानि कानिचन पद्यानि दीयन्ते।)

भाति मे भारतम्

भाति मे भारतम् भाति मे भारतम्
भूतले भाति मे ऽनारतं भारतम् ॥

वेदपाठं क्वचित्सामगानं क्वचित्,
श्रीगुरुग्रन्थपाठं कुरानं क्वचित् ।
नैकधर्मोपदेशाँश्च संश्रावयद्,
भूतले भाति मेऽनारतं भारतम् ॥

कुत्रचिल्लावनीं क्वापि काव्यालिकां,
कुत्रचिच्चाक्षरश्लोकमायोजयत् ।
कीर्तनं क्वापि दिव्यध्वनि श्रावयद्,
भूतले भाति मेऽनारतं भारतम् ॥

काव्यपाठं क्वचित्तत्समीक्षां क्वचित्,
क्वापि नृत्योत्सवं क्वापि नाट्योत्सवम् ।
नित्यनूत्नोत्सवाँश्चाथ संयोजयद्,
भूतले भाति मेऽनारतं भारतम् ॥

स्तोत्रगानं क्वचिद् वीरगानं क्वचित्,
सन्त-सूफी-पदानां च गानं क्वचित् ।
क्वापि कारुण्यगीतिं जनाँच्छ्रावयद्,
भूतले भाति मेऽनारतं भारतम् ॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

कूडियाट्टं भवाईं तमाशां क्वचिद्,
वृन्दगानं क्वचिद् वृन्दवाद्यं क्वचित् ।
स्वांग-संगीत-यात्राः क्वचिद् योजयद्,
भूतले भाति मेऽनारतं भारतम् ॥

वार्तया यत्र शान्तो विवादो भवेत्,
पञ्चनॄणां समक्षं तरूणामधः ।
पञ्चमूर्तौ वसेदीश्वरो यत्र तद्,
भूतले भाति मेऽनारतं भारतम् ॥

यच्छ्रुतं कीर्तितं संस्मृतं सेवितं,
स्वामिभावं गतं सख्यभावं गतम् ।
अर्चितं वन्दितं वेदितं पुण्यदं,
भूतले भाति तन्मामकं भारतम् ॥

भारतं धर्म आस्ते मदीयः शुभो,
भारतं जातिरास्ते मदीया शुभा ।
भारतं वर्ण आस्ते मदीयः शुभो,
भूतले भाति मेऽनारतं भारतम् ॥

नो निराशा यदीयः स्वभावो मतो,
नान्धकारे लयो यस्य भाग्यं मतम् ।
संकटान्यन्धकारांश्च भेत्तुं क्षमं,
भूतले भाति मेऽनारतं भारतम् ॥

त्याग-सत्य-श्रमोत्साह-सेवा-दया,
मानवीयानि मूल्यानि यस्यासते ।
यत्र हिंसा पराभूयतेऽहिंसया,
भूतले भाति तन्मामकं भारतम् ॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

श्रीः

२२३, हरिनगर,
होश्यारपुर (पंजाब)
११-३-१९९४

अभ्यर्चनीयाचार्य-मचर्चिकाः !

सर्वात्मना नमांसि भूयांसि ।

व्यापारान्तर-व्यापृति-हेतोः, भवत्प्रणीतं देशभक्त्युपनीतम् सश्रद्धं स्रग्विण्या बद्धम् १०८ पद्यमालामयम् **'भाति मे भारतम्'** इत्यधिवचनं रोचनं स्ताव्यञ्च भवत्काव्यम् प्राक् परिशीलयितुमक्षमः क्षमां भिक्षमाणस्तावदस्मि।

एतर्हि द्वित्र-दिवसेभ्य एव प्रागामूलचूलमपाठि तत्। तदिदम्प्रथमं कविकर्म कालिदासीयां वैदर्भीं स्मारयत् पदे-पदे प्रसाद-माधुर्ययोः प्रपातायमानं सौकुमार्य-सारल्य-स्वदिम-संस्तुतम्, मधुरिमोद्गार-निर्भरं सत् सुतरां सततं सचेतसां स्वान्तान्यावर्जयति, अङ्कुरयति च किमप्यनिर्वचनीयमानन्दातिरेकम्।

एतत्कृते कृतिनः श्रीजुषः क्रियासमभिहारेणाऽभिनन्द्याः वन्द्याश्चेति शश्वत् श्रीमतां श्वःश्रेयसमाशंसन् श्रीमतः सौम्य-स्मेरां मुखमुद्रामद्यापि च संस्मरन्

प्रेक्षावत्-पाद-पाथोज-पुष्पन्धयः

श्यामदेवः पाराशरः

प्रो० क० र० डॉ० श्यामदेव पाराशरः, साहित्यशिरोमणिः
शास्त्री, एम०ए०, पीएच्०डी०, एम्०ओ०एल०, पी०ई०एस० (से०नि०)
मुख्य सम्पादकः-**'विश्वसंस्कृतम्'**
साधु आश्रम, होश्यारपुर (पंजाब)

डॉ० रमाकान्त शुक्लः (एम०ए०, पीएच्०डी०)
देववाणी-परिषद्, ६, वाणी-विहारः, नयी दिल्ली-११००५९

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.



Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

अनुक्रमः

१. जय भारतभूमे ! ७५-८८

२. भजे भारतम् ८९-१०२

३. मम भारतं विजयते १०३-१०५

४. भारतभूमिर्विलसति १०६-१०९

५. जय भारतमेदिनि! ११०-११४

६. भारताख्यः स्वदेशः ११५-१२०

७. दिव्यं मम भारतम् १२१-१२४

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

जय भारतभूमे !

(१)

गङ्गायमुनाकावेरी-
कृष्णागोदाचलवीचियुते !
शिप्राशाबरमतीनर्मदा-
गण्डकतुङ्गतरङ्गयुते !
शोणचनाबविपाशासरयू-
ब्रह्मपुत्रकल्लोलकरे !
जय जय जय हे भारतभूमे !
जय जय जय भारतभूमे !

गंगा, यमुना, कावेरी, कृष्णा, गोदावरी की चंचल लहरों से युक्त! शिप्रा, साबरमती, नर्मदा तथा गंडक की उत्तुंग तरंगों से युक्त ! सोन, चनाब, विपाशा(व्यास) सरयू एवं ब्रह्मपुत्र की कल्लोलों को धारण करने वाली हे भारत भूमि ! तुम्हारी जय हो, जय हो, जय हो ।

(२)

पूर्वापरजलनिधिप्रक्षालित-
केरलतामिलनाडुपदे !
एलाललितलवङ्गलता-
परिवर्द्धितविहगामोदमदे !
विन्ध्यहिमालयसह्यमलय-
पारसगिरिनारावलीधरे !
जय जय जय हे भारतभूमे !
जय जय जय भारतभूमे !

केरल और तमिलनाडु तुम्हारे दो चरण हैं जिन्हें पश्चिम जलधि (अरब सागर) और पूर्व समुद्र (बंगाल की ख़ाड़ी) पखारते हैं। तुममें इलायची और ललित लौंग की डालियों के द्वारा पक्षियों के आमोद और मस्ती का परिवर्धन किया जाता है। तुम विंध्य, हिमाचल, सह्याद्रि, मलयाचल, पारस एवं गिरिनार की पहाड़ियों को धारण करने वाली हो। हे भारतभूमि ! तुम्हारी जय हो, जय हो, जय हो।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(३)

बोकारो-राउरकेला-स्वन-
बधिरीकृतदिग्गजकर्णे !
तारापुरसंयन्त्र-भिलाई-
वीरभद्र - भास्वरवर्णे !
भव्य-बरौनी-मथुरा-
तैलविशोधककीर्तिप्रकाशयुते !
जय जय जय हे भारतभूमे !
जय जय जय भारतभूमे !

जब तुम्हारे बोकारो एवं राउरकेला संयत्रों से घड़घड़ाहट की ध्वनि निकलती है तो उससे दिग्गजों के कान बहरे हो जाते हैं। तारापुर के संयंत्र, भिलाई के इस्पात कारखाने एवं वीरभद्र के औषध संयंत्र से तुम्हारा रंग निखर उठता है। भव्य, बरौनी और मथुरा के तेल विशोधक (रिफाइनरी) की कीर्ति के प्रकाश को तुम धारण करने वाली हो । हे भारत भूमि ! तुम्हारी जय हो, जय हो, जय हो ।

(४)

वृत्तिहीन-निर्धन-शोषित-
मानवपरिसान्त्वनयत्नपरे !
भिन्नजातिकुलधर्मवर्ण-
लोकैक्यापादनयत्नपरे !
लोकतन्त्रपरिरक्षणशीले !
अशरणशरणविधानकरे !
जय जय जय हे भारतभूमे !
जय जय जय भारतभूमे !

जिन्हें वृत्ति (रोजगार) सुलभ नहीं है, जो निर्धन हैं, जो शोषित हैं ऐसे मनुष्यों को तुम सात्वना देने का प्रयास करती हो। जिनकी जाति, कुल, वंश, धर्म और वर्ण भिन्न-भिन्न हैं, ऐसे लोगों में एकता के भाव को स्थापित करने का तुम यत्न करती हो । तुम्हारा स्वभाव लोकतंत्र की सर्वात्मना रक्षा करने का है। तुम अशरणों को शरण देने वाली हो। हे भारत भूमि ! तुम्हारी जय हो, जय हो, जय हो ।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(५)

ग्रामयुते ! पुरखेटयुते !
बहुनगरयुते ! नरनारियुते !
नेतृयुते ! अभिनेतृयुते !
कविकोविदविद्वद्यूथयुते !
योगियुते ! बहुभोगियुते
ऽमितकलायुते ! बहुपर्वधरे !
जय जय जय हे भारतभूमे !
जय जय जय भारतभूमे !

तुममें अनेक गांव हैं; तुममें कस्बे और खेड़े हैं; तुम बहुत से नगरों को धारण करती हो; नर और नारियों से युक्त हो । तुममें कितने ही नेता हैं और कितने ही अभिनेता हैं । कवियों, चतुर जनों एवं विद्वानों के समूह के समूह तुममें व्याप्त हैं । तुम में योगी जन भी रहते हैं और बहुत से भोगों में लिप्त प्राणी भी रहते हैं । तुम अपरिमित कलाओं का भण्डार हो । तुम अनेक पर्वों को धारण करती हो । हे भारत भूमि ! तुम्हारी जय हो, जय हो, जय हो ।

(६)

काशीमथुरापुरीद्वारका-
हरिद्वारमाहात्म्ययुते !
सेतुबन्धकन्याकुमारिका-
गङ्गासागरकीर्तियुते !
बदरीनाथ-वैष्णवी-ज्वाला-
हेमकुण्डशुभयशोधरे !
जय जय जय हे भारतभूमे !
जय जय जय भारतभूमे !

तुममें काशी, मथुरा, पुरी, द्वारका और हरिद्वार आदि अनेक तीर्थ हैं । तुम उनके माहात्म्य को धारण करने वाली हो । तुममें सेतुबंध रामेश्वर, कन्या कुमारी एवं गंगा सागर जैसे पवित्र स्थान हैं । इनकी कीर्ति को तुम धारण करती हो । तुम बदरीनाथ, वैष्णवी देवी, ज्वाला देवी, हेमकुण्ड के शुभ यश को धारण करने वाली हो । हे भारत भूमि ! तुम्हारी जय हो, जय हो, जय हो ।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(७)

नवजलधरवर्षितकीलाल-
समेधितकर्षकवृन्दवृते !
शरणागतपरिपालनशीले
शस्यश्यामलवसनवृते !
सर्षपपुष्प-रसालमुकुल-
संवर्द्धितप्रियपिकमोदमदे !
जय जय जय हे भारतभूमे !
जय जय जय भारतभूमे !

तुम पर जब नव जलधर (तरुण बादल) जल की वर्षा करते हैं तो किसानों की समृद्धि का सूत्रपात हो जाता है। ऐसे किसानों के समूह से तुम घिरी रहती हो। जो भी तुम्हारी शरण में आता है, उसको पालन करने का तुम्हारा स्वभाव है। तुम फसलों के हरे-हरे वस्त्रों को अपने शरीर पर धारण करती हो। जब वसंत ऋतु में सरसों के फूल खिलते हैं एवं आम के वृक्षों में बौर आ जाता है तो कोकिलों की प्रसन्नता और मस्ती बढ़ जाती है। इसलिए वे कोकिल और अधिक प्रिय लगने लगते हैं। हे भारत भूमि ! तुम्हारी जय हो, जय हो, जय हो।

(८)

ताशकन्दशिमलानुबन्ध-
दर्शितशान्त्यनुरागोद्रेके !
सीमान्तेषु प्रख्यापितनिज-
भटरणविजगीषोद्रेके !
हरिकोट्टा-पोखरणप्रसारित-
निजविज्ञानोन्नतिगाथे !
जय जय जय हे भारतभूमे !
जय जय जय भारतभूमे !

तुमने ताशकंद और शिमला के समझौतों के द्वारा यह दिखा दिया है कि शांति के प्रति तुम्हारो मन में कितना प्रेमातिरेक है। किन्तु सीमांत पर तुम्हारे सैनिक विजय के लिए कितने उत्सुक हैं यह भी तुम प्रमाणित कर चुकी हो। हरिकोट्टा और पोखरण के परीक्षण के द्वारा तुम्हारी वैज्ञानिक उन्नति की गाथा दिग्दिगंत में फैल चुकी है। हे भारत भूमि ! तुम्हारी जय हो, जय हो, जय हो।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(९)

कालिदासतुलसीकम्बन-
गालिबरवीन्द्ररसखानयुते !
पम्परन्नजयदेवसूर-
विद्यापतिपन्तप्रसादनुते !
ब्रह्मानन्दसहोदररस-
मज्जनकोविदकविकाव्यधरे !
जय जय जय हे भारतभूमे !
जय जय जय भारतभूमे !

तुममें कविकुलगुरु कालिदास हुए । तुममें लोक समन्वयकारी तुलसीदास हुए । तुममें तमिल भाषा में रामायण की रचना करने वाले महाकवि कंबन ने जन्म लिया । उर्दू के प्रसिद्ध कवि मिर्ज़ा ग़ालिब तुममें हुए । कवीन्द्र, रवीन्द्र ने तुममें जन्म लेकर अपनी रचनाएं की । रसखान ने तुममें जन्म लेकर भक्ति की सरिता प्रवाहित की । पंप, रन्न, जयदेव, सूर, विद्यापति, प्रसाद और पंत जैसे कवियों ने अपनी काव्य साधना के माध्यम से तुम्हे प्रणाम किया है । तुम ऐसे अनेक काव्यों को धारण करने वाली हो जिन्हें ब्रह्मानंद के सहोदर रस में निमग्न देने में प्रवीण कवियों ने रचा है । हे भारत भूमि ! तुम्हारी जय हो, जय हो, जय हो ।

(१०)

शेषमहेशदिनेशसुरेश-
रमेशप्रदर्शितनिजलीले !
मधुकैटभदशवदनकंसमुर-
वृत्रासुरशिशुपालकले !
शिबिदधीचिप्रह्लादहरि-
श्चन्द्रादिचरित्रोज्ज्वलशोभे !
जय जय जय हे भारतभूमे !
जय जय जय भारतभूमे !

तुममे अनंत शेष, महेश, दिनेश, सुरेश तथा रमेश ने अपनी लीलाओं को प्रदर्शित किया है । तुममें मधु-कैटभ, दशानन (रावण), कंस, मुर, वृत्रासुर एवं शिशुपाल जैसे तामसी और आसुरी वृत्ति वाले व्यक्तियों ने अपनी कलाएं दिखाई हैं । तुममें शिबि, दधीचि, प्रह्लाद तथा हरिश्चन्द्र आदि के चरित्रों की उज्ज्वल शोभा व्याप्त हैं । हे भारत भूमि ! तुम्हारी जय हो, जय हो, जय हो ।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(११)

गिद्दा-भँगड़ा-रास-चर्चरी-
लोकनृत्यहृतजनचित्ते !
भरतनाट्य-कत्थक-कथाकली-
नृत्यतरङ्गितनिजचित्ते !
घेर-डाँडियारास-विनर्तित-
नरनारीचयकेलिधरे !
जय जय जय हे भारतभूमे !
जय जय जय भारतभूमे !

तुममें जब गिद्दा, भंगड़ा, चर्चरी रास आदि लोकनृत्य प्रस्तुत किए जाते हैं तो वे लोगो का मन हर लेते हैं । जब भरतनाट्य, कथक, कथकली आदि शास्त्रीय नृत्यों की प्रस्तुति की जाती हैं तो उन्हें देखकर तुम्हारा चित्तं तरंगित होने लगता है । घेर, डांडिया रास आदि लोकनृत्यों में जब नर-नारी भाग लेते हैं तो वे अनेक प्रकार की क्रीडाएं करने लगते हैं । तुम उन नृत्य कलाओं की निधान हो । हे भारत भूमि ! तुम्हारी जय हो, जय हो, जय हो ।

(१२)

कुम्भ-सोनपुर-नासिकमेला-
रथयात्राविस्तृतकृत्ये !
वैशाखी-विजया-पोङ्गल-
होली-दीपालीकृतनृत्ये !
क्रिसमस-ईदमुबारक-कोजा-
गरीपूर्णिमाह्लादयुते !
जय जय जय हे भारतभूमे !
जय जय जय भारतभूमे !

प्रयाग, हरिद्वार, उज्जैन एवं नासिक में लगने वाले कुंभ मेले में, सोनपुर (हरिहर क्षेत्र) के मेले में, नासिक़ के मेले में तथा पुरी में आयोजित होने वाली रथयात्रा में तुम अपने क्रियाकलाप की विस्तार करती हो । वैशाखी, विजयादशमी (दशहरा), पोंगल, होली तथा दीपावली के दिनों में तुम अनेक नृत्यों का विधान करती हो । क्रिस्मस, ईद मुबारक तथा कोजागरी (शरद पूर्णिमा) के अवसर पर तुम आह्लाद से परिपूर्ण हो उठती हो । हे भारत भूमि ! तुम्हारी जय हो, जय हो, जय हो ।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(१३)

अगणितमन्दिरमस्जिद-
गिरिजागृहजिनगेहगुरुद्वारे !
नवनवमठसमाजसंस्थे
नानाविधकुललोकाचारे !
अगुणसगुणप्रणिधानशुभे
जय भक्तिज्ञानकर्मभूमे !
जय जय जय हे भारतभूमे !
जय जय जय भारतभूमे !

तुममें अनगिनत मंदिर, मस्जिद, गिरजाघर, जैन मंदिर तथा गुरुद्वारे हैं। तुममें अनेक मठ, समाज एवं संस्थाएँ हैं। तुममें अनेक प्रकार के कुलाचार एवं लोकाचार विद्यमान हैं। तुममें लोग अपनी रुचि के अनुकूल निर्गुण एवं सगुण ब्रह्म का ध्यान करते हैं इस कारण तुम अत्यन्त शुभ प्रतीत होती हो। तुम भक्ति, ज्ञान और कर्मों की भूमि हो। हे भारत भूमि ! तुम्हारी जय हो, जय हो, जय हो।

(१४)

हीराकुण्ड-भाखडा-नागल-
नागार्जुनसागरबन्धे !
प्रसृतकुशेशयकेतकपाटल-
ललितलवङ्गलतागन्धे !
जीवनदायिनि ! विद्युद्दायिनि !
प्रकृतिप्रमोदकलाभूमे !
जय जय जय हे भारतभूमे !
जय ज़य जय भारतभूमे !

तुममें हीराकुंड, भाखड़ा नागल तथा नार्गाजुन सागर जैसे अनेक बाँध हैं। तुममें कमल, केवड़ा, गुलाब एवं सुंदर लौंग की सुगंध फैलती है। तुम जीवनदायिनी हो। तुम बिजली को देने वाली हो। तुम प्रकृति के प्रमोद एवं कलाओं की भूमि हो। हे भारत भूमि ! तुम्हारी जय हो, जय हो, जय हो।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(१५)

रामकृष्णगौतमगान्धी-
नहरूरवीन्द्रप्रेरितलोके !
मानस-बीजक-थिरुक्कुरल-
भारत-रामायण-हृतशोके !
सत्त्वोद्रेकयुते कविकर्म -
युते लोकाराधनभूमे !
जय जय जय हे भारतभूमे !
जय जय जय भारतभूमे !

तुममें श्री राम, कृष्ण, गौतम, गांधी, नेहरू, रवीन्द्रनाथ टैगोर आदि ने लोगों को प्रेरित किया है । तुम्हारे रामचरितमानस, कबीर बीजक, थिरुक्कुरल, रामायण एवं महाभारत आदि सद्ग्रंथ लोगों के शोक का हरण करने वाले हैं । सत्त्व का उद्रेक करने वाले अनेक काव्य नाटक विद्यमान हैं । तुम लोकाराधन की भूमि हो। हे भारत भूमि ! तुम्हारी जय हो, जय हो, जय हो ।

(१६)

नवलरसालमुकुलसौरभ-
भावितभृङ्गलीगानधरे !
चम्पकबकुलनागकेसर-
पाटलपाटीरामोदधरे !
शीतलमन्दसुगन्धसमीरे
धृतकेकीकोकिलकीरे !
जय जय जय हे भारतभूमे !
जय जय जय भारतभूमे !

तुममें जब आमों पर नया-नया बौर आता है तो उसके सौरभ से भौरों का समूह मस्त होकर गीत गुनगुनाने लगता है । तुम चंपा, मौलसिरी, नाग केसर, गुलाब एवं चंदन की सुगंध को धारण करने वाली हो । तुममें शीतल मंद सुगंध, समीर प्रवाहमान रहता है । तुममें मोर, कोयल एवं तोते आश्रय लिये हुए हैं । हे भारत भूमि ! तुम्हारी जय हो, जय हो, जय हो ।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(१७)

आम्रलकुचकदलीनारङ्गक-
सेवास्वादकविहगयुते !
अभ्रंलिहयन्त्रालयचिमनी-
धूमैर्मलिनीकृतककुभे !
यवगोधूमशालिचणक-
क्षेत्रैः शस्यश्यामलैर्युते !
जय जय जय हे भारतभूमे !
जय जय जय भारतभूमे !

तुममें ऐसे अनेक पक्षी निवास करते हैं जो आम, लीची, केला नारंगी तथा सेब का आस्वाद लेते हैं। गगनचुंबी कारखानों की चिमनियों के धुएं से तुम दिशाएँ मलिन करती हो। तुम्हारे खेतों में जौं, गेहूं, चावल और चने उत्पन्न होते हैं। उन फसलों के हरे भरे खेतों से तुम बड़ी रमणीय लगती हो। हे भारत भूमि ! तुम्हारी जय हो, जय हो, जय हो।

(१८)

नग्नबुभुक्षितवासविहीन-
जनानामेकाश्रयभूते !
जटिलप्रपञ्चप्रताडित-
वृत्तिविहीनजनैकाश्रयभूते !
अशरणशरणास्पदभूते
सन्तोषमौनमौखर्ययुते !
जय जय जय हे भारतभूमे !
जय जय जय भारतभूमे !

वस्त्रहीन, भूखे तथा बेघर लोगों की तुम आश्रयस्थली हो। जटिल, प्रपंचों से प्रताड़ित बेरोजगार लोगों की तुम अवलंब हो। तुम अशरणों को शरण देने वाली हो। तुम संतोष, मौन एवं मुखरता से युक्त हो। हे भारत भूमि ! तुम्हारी जय हो, जय हो, जय हो।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(१९)

द्रारिद्र्यानलदग्धदेह-
जीवौघोद्धारणयत्नपरे !
शोषितकर्षककार्मिकपीडो-
न्मूलनहेत्वाक्रन्दकरे !
जय जय हे युद्धाग्निविरोधिनि !
जय जय पञ्चशीलभूमे !
जय जय जय हे भारतभूमे !
जय जय भारतभूमे !

गरीबी की आग ने जिनकी देह को झुलसा दिया है ऐसे प्राणियों के उद्धार के लिए तुम प्रयास करने में तत्पर हो । शोषित, किसान एवं मजदूरों की पीड़ा के उन्मूलन के हेतु आक्रन्दन करने वाली हो । तुम युद्ध की अग्नि का विरोध करने वाली हो एवं पंचशील का पालन करने वाली हो । हे भारत भूमि ! तुम्हारी जय हो, जय हो, जय हो ।

(२०)

जागृतिशीले ! क्रान्तिविलासे !
कान्तियुते ! सम्मानयुते !
विद्वत्तोषिणि ! मानसपोषिणि !
समरविरोषिणि ! शान्तियुते !
सत्याहिंसापरहितकरुणा-
सर्वंसहता - प्रीतिधरे !
जय जय जय हे भारतभूमे !
जय जय जय भारतभूमे !

सतत जागते रहना तुम्हारा स्वभाव है । क्रांति तुम्हारी अदा है। तुम प्रभामयी हो । विश्व तुम्हारा सम्मान करता है । तुम विद्वज्जनों को संतोष देने वाली हो । तुम प्राणियों के मन का पोषण करने वाली हो । जब युद्ध अपरिहार्य हो तो तुम्हारा क्रोध देखते ही बनता है । इतना होने पर भी तुम शांति की आराधना में ही संलग्न रहती हो । सत्य, अंहिसा, परोपकार, करुणा, सर्वंसहता एवं प्रसन्नता तुम्हारे शाश्वत मूल्य हैं जिन्हें तुम धारण करती हो। हे भारत भूमि ! तुम्हारी जय हो, जय हो, ज़य हो।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(२१)

जय हरिनामामृततृप्ते
जय प्रेयःश्रेयःसाधनिके !
ब्राह्मक्षात्रप्रभापूरे
व्यापारयुतेऽमितकर्मयुते !
त्यागभोगभूमे जय जय जय
'जनगणमन' जयगानयुते !
जय जय जय हे भारतभूमे !
जय जय जय भारतभूमे !

तुम हरि के नाम रूपी अमृत से तृप्त रहने वाली हो । तुम प्रेय और श्रेय दोनों की सम्यक् साधना करने वाली हो । तुम ब्रह्म तेज एवं क्षात्र तेज से परिपूर्ण हो । तुममें अनेक व्यापार चलते रहते हैं । तुम अपरिमित कर्मों को धारण करने वाली हो । तुम त्याग सहित भोग की भूमि हो। तुममें जन-गन मण का जयगान होता है । हे भारत भूमि ! तुम्हारी जय हो, जय हो, जय हो।

(२२)

गङ्गायमुनासरयूवरुणा-
वीचिपवित्रीकृततीर्थे !
उपकाशी-काशी-प्रयाग-
लक्षितविहसद्विद्यातीर्थे !
विश्वनाथ - बदरीविशाल-
राघवयादवपूजाशीले !
जय जय जय हे भारतभूमे !
जय जय जय भारतभूमे !

तुममें ऐसे अनेक तीर्थ हैं जिनको गंगा, यमुना, सरयू वरुणा आदि नदियों की लहरों ने पवित्र किया है । तुम्हारे काशी, उपकाशी तथा प्रयाग आदि नगरों में प्रसन्नता से युक्त सद्विद्याओं के तीर्थ दिखाई देते हैं। तुम बाबा विश्वनाथ, बदरीनारायण, श्री रामचन्द्र एवं श्री कृष्णचन्द्र की पूजा में लगी रहती हो । हे भारत भूमि ! तुम्हारी जय हो, जय हो, जय हो।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(२३)

वायु-भूमि-जलयानगणै-
दर्शितनिजशक्तिभरालोके !
टैङ्कतोपगर्जनप्रख्यापित-
निजबलभूतिभरालोके !
नित्यनवीनोपग्रहमोक्षण-
प्रभृतिप्रदर्शितसामर्थ्ये !
जय जय जय हे भारतभूमे !
जय जय जय भारतभूमे !

तुम अपनी शक्ति का आभास वायुयानों, भूमि पर चलने वाले अनेक यानों एवं जल यानों के समूह से करा देती हो । जिस समय तुम्हारे टैंक और तोप गरजते हैं तो तुम्हारे सैन्यबल का वैभव प्रकाशित हो जाता है । नित्य नवीन् उपग्रहों के छोड़ने आदि कार्यों से तुम अपने सामर्थ्य और तेज का परिचय देती हो । हे भारत भूमि ! तुम्हारी जय हो, जय हो, जय हो।

(२४)

तव वृन्दाविपिने विहरति
कृष्णो गोपीजनमुदकारी ।
तव कैलासे हरति हरो
मन्मथविषमहिमालाधारी ।
तव साकेते क्रीडति रामो
मिथिलायां जनककुमारी ।
जय जय जय हे भारतभूमे !
जय जय जय भारतभूमे !

तुम्हारे वृंदावन में गोपीजनों को प्रसन्नता देने वाले श्री कृष्ण विहार करते हैं । तुम्हारे कैलाश में सर्पों की माला धारण करने वाले (शिवजी) कामदेव रूपी विष को हर लेते हैं । तुम्हारी अयोध्या में श्री राम क्रीड़ा करते हैं एवं मिथिला में जनकतनया सीता जी खेलती हैं । हे भारत भूमि ! तुम्हारी जय हो, जय हो, जय हो।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(२५)

दलपरिवर्तनकारिनेतृ-
निन्दां कुर्वाणास्तव लोकाः ।
राष्ट्रभक्तिमीश्वरपूजा-
मनिशं मन्वानास्तव लोकाः ।
दुरवस्थां समूलमुन्मूलयितुं
कृतकल्पास्तव लोकाः ।
जय जय जय हे भारतभूमे !
जय जय जय भारतभूमे !

तुम्हारे निवासी दलबदलू नेताओं की निन्दा करते हैं । तुम्हारे पुत्र राष्ट्रभक्ति को ईश्वर पूजा मानते हैं । तुमसे उत्पन्न जन तुम्हारी दुरवस्था को समूल उन्मूलित करने के लिए कृतसंकल्प हैं। हे भारत भूमि ! तुम्हारी जय हो, जय हो, जय हो।

(२६)

त्वयि गायति शंकरपादश्रीः
'भज गोविन्दं मूढमते' !
'सिया राममय सब जग जानी'
त्वयि तुलसीदासो ब्रूते ।
भक्तास्त्वयि गायन्ति निमीलित-
नेत्रा 'जय जगदीश हरे' !
जय जय जय हे भारतभूमे !
जय जय जय भारतभूमे !

तुममें आदि शंकराचार्य 'भज गोविन्दं, मूढमते' गीत को गाते हैं । तुममें गोस्वामी तुलसीदास, 'सियाराम मय सब जग जानी' का कथन करते हैं । तुममें भक्तजन भगवान् के ध्यान में आँखें बंद कर 'जय जगदीश हरे' की आरती प्रतिदिन गाते हैं । हे भारत भूमि ! तुम्हारी जय हो, जय हो, जय हो।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(२७)

गौरवशालिनि मोदप्रदायिनि
प्रकृतिनटीलीलाभूमे !
चतुर्वर्गफलदायिनि
भगवन्नामरूपलीलाभूमे !
श्रमशक्तेरुल्लासविधायिनि
रमाकान्तशुक्लाभिनुते !
जय जय जय हे भारतभूमे !
जय जय जय भारतभूमे !

तुम गौरवशाली हो, तुम प्राणियों को प्रसन्नता देती हो । तुममें प्रकृति रूपी नटी अपनी लीला का विस्तार करती है । तुम धर्म, अर्थ, काम और मोक्ष– इस चतुर्वर्ग का फल देने वाली हो । तुम भगवान् के नाम और रूप की लीलाभूमि हो । श्रम की शक्ति को तुम उल्लास प्रदान करतीं हो । रमाकान्त शुक्ल तुम्हें बारंबार प्रणाम करता है। हे भारत भूमि ! तुम्हारी जय हो, जय हो, जय हो।

(२८)

परिमितशब्दैरमितगुणान्
गायामि कथं ते वद पुण्ये !
चुलुके जलधिं तुङ्गतरङ्गं
करवाणि कथं वद धन्ये !
जय सुजले सुफले वरदे
विमले कमला-वाणी-वन्द्ये !
जय जय जय हे भारतभूमे !
जय जय जय भारतभूमे !

तुम्हारे गुणों की कोई सीमा नहीं है। वे अपरिमित हैं। और मेरे शब्द तो परिमित हैं अर्थात् गिने चुने हैं । हे पुण्य स्वरूप भारत भूमि ! मैं इनसे तुम्हारे गुणों को यथावत् किस प्रकार गा सकता हूँ? मेरे पास तो एक चुल्लू है । बताओ तो सही उसमें समुद्र को कैसे धारण करूँ। तुम धन्य हो । हे सुजले! सुफले! वरदात्रि! विमले! लक्ष्मी और सरस्वती से वन्दित! तुम्हारी जय हो । हे भारत भूमि ! तुम्हारी जय हो, जय हो, जय हो।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

भजे भारतम् !

(१)

सदाज्ञानविध्वंसकारी मनोज्ञः
समालोक्यते यत्र वाणी-विहारः ।
विधत्ते स्वमित्रं च यः प्राणिमात्रं
भजेऽहं मुदा भारतं तं स्वदेशम् ।

जिसमें अज्ञान का विध्वंस करने वाली वाणी (सरस्वती) का विहार भले रूप में सदा दिखाई देता है और जो प्राणिमात्र को अपना मित्र बना लेता है उस दिव्य देश, अपने भारत देश को मैं प्रसन्नता पूर्वक नमन करता हूँ।

(२)

कुटुम्बं धरित्री दया यस्य मित्रं
मनुष्यत्वसेवा यदीयोऽस्ति धर्मः ।
असत्यं च शत्रुः समस्तेऽपि लोके
भजेऽहं मुदा भारतं तं स्वदेशम् ।
भजे तं मुदा भारतं दिव्यदेशम् ॥

धरती जिसका कुटुम्ब है, दया जिसकी मित्र है, मानवता की सेवा जिसका धर्म है और समस्त लोक में विद्यमान असत्य जिसका शत्रु है उस दिव्य देश, अपने भारत देश को मैं प्रसन्नता पूर्वक नमन करता हूँ ।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(३)

प्रजातन्त्ररक्षा यदीयं हि लक्ष्यं
तितिक्षा यदीयास्ति संसारगीता ।
तथैवार्जवं यस्य वित्तं वरेण्यं
भजेऽहं मुदा भारतं तं स्वदेशम् ।
भजे तं मुदा भारतं दिव्यदेशम् ॥

प्रजातंत्र की रक्षा जिसका लक्ष्य है, जिसकी तितिक्षा (सहन शक्ति) को पूरे संसार नें गाया है और ऋजुता जिसका रमणीय धन है उस दिव्य देश, अपने भारत देश को मैं प्रसन्नता पूर्वक नमन करता हूँ।

(४)

स्वकीयां बुभुक्षां पिपासां नियम्य
सदा रक्षिता येन भीताः प्रपन्नाः ।
यमाहुर्विदग्धास्तथा शान्तिदूतं
भजेऽहं मुदा भारतं तं स्वदेशम् ।
भजे तं मुदा भारतं दिव्यदेशम् ॥

जिसने अपनी भूख और प्यास को मारकर शरण में आये भयभीत प्राणियों की सदा रक्षा की है और जिसे विदग्ध (चतुर एवं जले हुए) जनों नें शांति दूत कहा है उस दिव्य देश, अपने भारत देश को मैं प्रसन्नता पूर्वक नमन करता हूँ।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(५)

न मम्लौ यदीयं मुखं निःस्वतायाम्
विमूढं न चित्तं च वित्तोपलाभे ।
सदा दानशीलश्च यो याचकेभ्यो
भजेऽहं मुदा भारतं तं स्वदेशम् ।
भजे तं मुदा भारतं दिव्यदेशम् ॥

जिसका मुख गरीबी में मलिन नहीं हुआ और वैभव पाकर विमूढ़ नहीं हुआ तथा जो याचकों के प्रति सदैव दानशील है उस दिव्य देश, अपने भारत देश को मैं प्रसन्नता पूर्वक नमन करता हूँ।

(६)

स्फुरद्रत्नसङ्काशविद्वद्वरेण्यैः
समाराधितानेकशास्त्रैश्च शिष्यैः ।
गभीरैश्च चित्तैः सदालङ्कृतो यो
भजेऽहं मुदा भारतं तं स्वदेशम् ।
भजे तं मुदा भारतं दिव्यदेशम् ॥

चमकते हुए रत्नों के सदृश श्रेष्ठ विद्वानों से और अनेक शास्त्रों की आराधना करने वाले शिष्यों एवं गम्भीर चित्तों से जो सदा अलंकृत है उस दिव्य देश, अपने भारत देश को मैं प्रसन्नता पूर्वक नमन करता हूँ ।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(७)

क्वचिज्जाह्नवी तुङ्गवीचिः प्रसन्ना
क्वचिद्भानुजागोमतीव्यासशिप्राः ।
क्वचिन्नर्मदायौवनश्रीर्यदन्तो
भजेऽहं मुदा भारतं तं स्वदेशम् ।
भजे तं मुदा भारतं दिव्यदेशम् ॥

जिसमें कहीं तो तुग तरंगों से युक्त प्रसन्न जाह्नवी (गंगा) प्रवहमान है, कहीं यमुना, गोमती, व्यास और शिप्रा बहती हैं तथा कहीं पर जवानी की शोभा लिए नर्मदा प्रवहमान है उस दिव्य देश, अपने भारत देश को मैं प्रसन्नता पूर्वक नमन करता हूँ।

(८)

क्वचिद्वीरपुञ्जः समुत्साहधीरः
क्वचिन्नेतृवर्गः प्रजोद्बोधरक्तः ।
क्वचिच्छीलवान् यत्र सङ्घो मुनीनां
भजेऽहं मुदा भारतं तं स्वदेशम् ।
भजे तं मुदा भारतं दिव्यदेशम् ॥

जिसमें कहीं तो उत्साह से धीर वीरों का समूह है, कहीं जनता को समझाने में तत्पर नेताओं का समूह हैं और कहीं शीलवान (चरित्र सम्पन्न) मुनियों का समूह है उस दिव्य देश, अपने भारत देश को मैं प्रसन्नता पूर्वक नमन करता हूँ ।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(९)

क्वचिद्विज्ञगोष्ठी क्वचिच्छास्त्रचर्चा
क्वचित्काव्यसन्ध्या क्वचिन्नाट्यवेला ।
क्वचिद्गीतिगानं च यस्य स्वभावो
भजेऽहं मुदा भारतं तं स्वदेशम् ।
भजे तं मुदा भारतं दिव्यदेशम् ॥

कहीं पर विद्वानों की गोष्ठी, कहीं पर शास्त्र की चर्चा, कहीं काव्य संध्या, कहीं नाट्य वेला और कहीं गीतियों का गान जिसका स्वभाव है उस दिव्य देश, अपने भारत देश को मैं प्रसन्नता पूर्वक नमन करता हूँ।

(१०)

कला कालिदासस्य बाणस्य वाणी
रवीन्द्रस्य गीतिर्विवेकस्य वाणी ।
लता-तानसेन-स्वरा यत्र मुग्धाः
भजेऽहं मुदा भारतं तं स्वदेशम् ।
भजे तं मुदा भारतं दिव्यदेशम् ॥

कालिदास की कला, बाण भट्ट की वाणी, रवीन्द्रनाथ टैगोर के गीत, विवेकानन्द की वाणी, तानसेन और लता मंगेशकर के मुग्ध स्वर जहां आविर्भूत हुए उस दिव्य देश, अपने भारत देश को मैं प्रसन्नता पूर्वक नमन करता हूँ ।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(११)

निवासः सतामाश्रयः सद्गुणानाम्
जरामृत्युहीनः प्रकृत्या विलासः ।
तथा सच्चिदानन्दसेवापरो यो
भजेऽहं मुदा भारतं तं स्वदेशम् ।
भजे तं मुदा भारतं दिव्यदेशम् ॥

जो सज्जनों का निवास स्थान है, जो सद्गुणों का आश्रय है, जो जरा मरण रहित प्रकृति का विलास है और जो सत्, चित् और आनन्द की सेवा में तत्पर है उस दिव्य देश, अपने भारत देश को मैं प्रसन्नता पूर्वक नमन करता हूँ।

(१२)

धनं विद्यतेऽध्यात्मसंज्ञं यदीयं
जगद्दुःखसङ्घातविध्वंसदक्षम् ।
कला यस्य चेतोहरा भान्ति लोके
भजेऽहं मुदा भारतं तं स्वदेशम् ।
भजे तं मुदा भारतं दिव्यदेशम् ॥

जिसके पास जगत् के दुःखों के समूह का विध्वंस करने में दक्ष अध्यात्म विद्या नामक धन विद्यमान है और पूरे संसार में जिसकी कलाएँ दर्शकों का चित्त हरने वाली हैं उस दिव्य देश, अपने भारत देश को मैं प्रसन्नता पूर्वक नमन करता हूँ ।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(१३)

कलाज्ञानविज्ञानवाणिज्यशोधै-
स्तथा कल्पनाभावनातर्कबोधैः ।
त्रिलोक्यां त्रिकाले प्रभाभासुरो यो
भजेऽहं मुदा भारतं तं स्वदेशम् ।
भजे तं मुदा भारतं दिव्यदेशम् ॥

कला, ज्ञान, विज्ञान एवं वाणिज्य परक संशोधनों एवं कल्पना, भावना, तर्क एवं बोध के कारण जो तीनों लोकों में एवं तीनों कालों (भूत, वर्तमान एवं भविष्य) में जो अपनी प्रभा से चमकता है उस दिव्य देश, अपने भारत देश को मैं प्रसन्नतापूर्वक नमन करता हूँ ।

(१४)

अतीतं भविष्यत्तथा वर्तमानं
जगत्प्रेरणादायकं वै यदीयम् ।
चतुर्वर्गसिद्धिं दिशन् यः प्रसिद्धो
भजेऽहं मुदा भारतं तं स्वदेशम् ।
भजे तं मुदा भारतं दिव्यदेशम् ॥

जिसका अतीत, वर्तमान तथा भविष्य जगत् को प्रेरणा देने वाला है और जो चतुर्वर्ग-धर्म, अर्थ, काम और मोक्ष की राह दिखाता हुआ संसार में प्रसिद्ध है उस दिव्य देश, अपने भारत देश को मैं प्रसन्नतापूर्वक नमन करता हूँ।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(१५)

पवित्रैर्व्रतैरुत्सवैस्तीर्थसंघै-
स्तथा दर्शनज्ञानचारित्र्यपुञ्जैः ।
नवाभिः कथाभिस्समृद्धश्च योऽस्ति
भजेऽहं मुदा भारतं तं स्वदेशम् ।
भजे तं मुदा भारतं दिव्यदेशम् ॥

पवित्र व्रतों, उत्सवों, तीर्थ समूह, दर्शन, ज्ञान और चारित्र्य के समूहों और नई नई कथाओं से जो समृद्ध है उस दिव्य देश, अपने भारत देश को मैं प्रसन्नतापूर्वक नमन करता हूँ।

(१६)

क्षिपन्नैपलं भास्करं चार्यभट्टं
हसन् - भाखडाभा-नरौरा-मिषेण ।
भिलाई-बुकारोस्वनैर्यश्च गर्जन्
भजेऽहं मुदा भारतं तं स्वदेशम् ।
भजे तं मुदा भारतं दिव्यदेशम् ॥

जिसने अंतरिक्ष में आर्यभट्ट, भास्कर तथा ऐपल आदि उपग्रह छोड़े जो भाखड़ा एवं नरौरा संयंत्र के बहाने से विद्युत्प्रभा सी हंसी हंसता है और जो भिलाई और बोकारो संयंत्रों के शब्द के रूप में अपनी गर्जना करता है उस दिव्य देश, अपने भारत देश को मैं प्रसन्नतापूर्वक नमन करता हूँ।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(१७)

क्वचिच्चञ्चलायाः नवीनैर्विलासैः
क्वचिच्छारदायास्तथा शुक्लहासैः ।
सदा नूतनो मोदते राजते यो
भजेऽहं मुदा भारतं तं स्वदेशम् ।
भजे तं मुदा भारतं दिव्यदेशम् ॥

जो कहीं लक्ष्मी के नवीन विलासों से और कहीं सरस्वती के शुभ्र हास से सदा नयी छवि को धारण करता हुआ प्रसन्न एवं शोभित होता है उस दिव्य देश, अपने भारत देश को मैं प्रसन्नतापूर्वक नमन करता हूँ।

(१८)

क्वचिद्राजनीतेर्वितानैः प्रपूर्णः
क्वचिद्गृध्रगोमायुसंवादपूर्णः ।
क्वचिद्यश्च साहित्यसंगीतपूर्णः
भजेऽहं मुदा भारतं तं स्वदेशम् ।
भजे तं मुदा भारतं दिव्यदेशम् ॥

जिसमें कहीं राजनीति के जाल फैलाए गये और कहीं गिद्ध और गोमायु (सियार) का (वंचनापूर्ण) संवाद सुनाई देता है एवं कहीं जो साहित्य और संगीत से परिपूर्ण है उस दिव्य देश, अपने भारत देश को मैं प्रसन्नतापूर्वक नमन करता हूँ ।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(१९)

क्वचिच्चाटुकारैः क्वचिन्मानवित्तैः
क्वचिन्मित्रघातैः क्वचिद्भीतचित्तैः ।
क्वचित्सिंहनादैश्च यश्चित्रवर्णो
भजेऽहं मुदा भारतं तं स्वदेशम् ।
भजे तं मुदा भारतं दिव्यदेशम् ॥

जो कहीं चापलूसों से, कहीं मानधन मनस्वियों से, कहीं मित्रघातों से, कहीं भयभीत चित्तों से और कहीं सिंहनादों से विचित्र वर्ण हैं उस दिव्य देश, अपने भारत देश को मैं प्रसन्नतापूर्वक नमन करता हूँ।

(२०)

नितान्तं विहीनः कदाचित्तु यः स्याद्
गृहस्फोटकैर्दस्युभिः षिड्गसंघैः ।
तथा वञ्चकैस्तस्करैर्भ्रष्टकृत्यैः
भजेऽहं मुदा भारतं तं स्वदेशम् ।
भजे तं मुदा भारतं दिव्यदेशम् ॥

जो कभी न कभी तो घरफोड़ों, दस्युओं, गुण्डों के समूहों, वंचकों, तस्करों तथा भ्रष्टाचारियों से नितान्त रहित होगा ही उस दिव्य देश, अपने भारत देश को मैं प्रसन्नतापूर्वक नमन करता हूँ।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(२१)

बलात्कारहत्यापहारप्रहाराः
अशिक्षावधूदाहभिक्षाप्रचाराः ।
कदाचित्तु लुप्ताः भविष्यन्ति यस्मात्
(अवश्यं विलुप्ता भविष्यन्ति यस्मात्)।
भजेऽहं मुदा भारतं तं स्वदेशम् ।
भजे तं मुदा भारतं दिव्यदेशम् ॥

बलात्कार, हत्या, अपहरण, हमले, अशिक्षा, वधूदाह तथा भिक्षा वृत्ति जिससे कभी न कभी तो मिटेंगी ही (अवश्य मिटेगी) उस दिव्य देश, अपने भारत देश को मैं प्रसन्नतापूर्वक नमन करता हूँ।

(२२)

'मदीयः स्वदेशः', 'प्रियं भारतं मे'
'मदीया प्रिया मातृभूमिः पवित्रा'।
इतीत्थं त्रिलिङ्ग्यां जनैर्गीयते यो
भजेऽहं मुदा भारतं तं स्वदेशम् ।
भजे तं मुदा भारतं दिव्यदेशम् ॥

'मेरा अपना देश', 'मेरा प्रिय भारत', 'मेरी प्यारी पवित्र मातृभूमि' इस प्रकार से तीनों लिंगों में लोग जिसे गाते हैं उस दिव्य देश, **अपने भारत देश** को मैं प्रसन्नतापूर्वक नमन करता हूँ।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(२३)

न यत्राङ्कुशः कस्यचिद्वाचि शक्यो
न वा कार्यजाते, न वा चित्तवृत्तौ ।
विनीतोऽपि यः स्वाभिमानव्रतोऽस्ति
भजेऽहं मुदा भारतं तं स्वदेशम् ।
भजे तं मुदा भारतं दिव्यदेशम् ॥

जहां किसी की वाणी पर अथवा कार्यकलाप पर अथवा चित्तवृत्ति पर अंकुश लगाना सम्भव नहीं है और जो विनम्र रहता हुआ भी स्वाभिमान के व्रत का पालन करता है उस दिव्य देश, अपने भारत देश को मैं प्रसन्नतापूर्वक नमन करता हूँ ।

(२४)

मदीया परिच्छिन्नवाणी यदीयान्
अशेषान् विशेषान् यथार्थं प्रगातुम् ।
अशक्तास्त्यशक्तास्त्यशक्तास्ति नूनं
भजेऽहं मुदा भारतं तं स्वदेशम् ।
भजे तं मुदा भारतं दिव्यदेशम् ॥

जिसकी समस्त विशेषताओं को वास्तविक रूप में गाने के लिए मेरी सीमित वाणी निश्चय ही अशक्त है, अशक्त है, अशक्त है उस दिव्य देश, अपने भारत देश को मैं प्रसन्नतापूर्वक नमन करता हूँ।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(२५)

अहो यस्य लोकोत्तरैः स्तोत्रपुञ्जैः
रमाकान्तशुक्लोऽपि धन्योऽद्य जातः ।
विदग्धाशिषां राशिभिर्लाल्यते च
भजेऽहं मुदा भारतं तं स्वदेशम् ।
भजे तं मुदा भारतं दिव्यदेशम् ॥

देखो तो सही, जिसके लोकोत्तर स्तोत्रों के कारण रमाकान्त शुक्ल भी आज धन्य हो गया एवं सहृदय विद्वानों के आशीर्वादों से दुलराया जा रहा है, उस दिव्य देश, अपने भारत देश को मैं प्रसन्नतापूर्वक नमन करता हूँ ।

(२६)

न यत्रास्तु कश्चिद्बुभुक्षापरो ना
न वा वासहीनो न वासोविहीनः ।
न वा शोषितः क्वापि केनापि कोऽपि
भजेऽहं मुदा भारतं तं स्वदेशम् ।
भजे तं मुदा भारतं दिव्यदेशम् ॥

जिसमें कोई भी भूखा न रहे, जिसमें कोई भी बेघर और वस्त्रहीन न रहे, ना ही जिसमें किसी के द्वारा कोई भी शोषित हो उस दिव्य देश, अपने भारत देश को मैं प्रसन्नता पूर्वक नमन करता हूँ।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(२७)

प्रणम्यः प्रणम्यो मया यः स्वदेशः
सदा कीर्तनीयः सदा वन्दनीयः ।
सदा वर्धतां मोदतां राजतां यो
भजेऽहं मुदा भारतं तं स्वदेशम् ।
भजे तं मुदा भारतं दिव्यदेशम् ॥

जो कि मेरा स्वदेश है और जो मेरे द्वारा बारंबार प्रणाम करने योग्य, कीर्तन करने योग्य एवं वन्दना करने योग्य है; जिसकी सदा बढ़ोतरी होती रहे तथां जो सदा प्रसन्न एवं सुशोभित रहे उस दिव्य देश, अपने भारत देश को मैं प्रसन्नतापूर्वक नमन करता हूँ ।

(२८)

उपेक्ष्येत नो यत्र वैदुष्यपुञ्जो
न वै वर्धतां यत्र दारिद्र्यपुञ्जः ।
तथा दुर्बलाघात आस्तां न यत्र
भजेऽहं मुदा भारतं तं स्वदेशम् ।
भजे तं मुदा भारतं दिव्यदेशम् ॥

जहां वैदुष्य समूह की कभी उपेक्षा न हो और जहां गरीबी अपने पांव न पसारे, जहां गरीबमार न हो उस दिव्य देश, अपने भारत देश को मैं प्रसन्नतापूर्वक नमन करता हूँ ।

✡

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

मम भारतं विजयते

(१)

निगमागमैरुपेतं विज्ञानरत्नरम्यम् ।
वेदाङ्गपूतगात्रं मम भारतं विजयते॥

जो निगम एवं आगमों से युक्त है, विज्ञान के रत्नों से रमणीय है, वेदांगों से जिसकी काया पवित्र है उस मेरे भारत की जय हो ।

(२)

लोकप्रबोधशीलं शोकप्रणाशशीलम् ।
चेतोविकाशकुशलं मम भारतं विजयते॥

जो लोक को जगाने वाला, शोक का नाश करने वाला एवं चित्त का विकास करने में कुशल है उस मेरे भारत की जय हो ।

(३)

सह्याद्रिविन्ध्यहिमवत्सप्ताद्रिकीर्तितश्रि ।
गंगाजलैः पवित्रं मम भारतं विजयते ॥

सह्याद्रि, विन्ध्याचल, हिमाचल एवं सप्ताद्रि के द्वारा जिस की शोभा कीर्तित है एवं जो गंगाजल से पवित्र है उस मेरे भारत की जय हो ।

(४)

क्वापि श्रमेण सहितं क्वापि प्रमोदभरितम् ।
नानाक्रियाकलापं मम भारतं विजयते ॥

जो कहीं श्रम से सहित है और कहीं प्रमोद से भरा हुआ है, जिसमें नाना प्रकार के क्रियाकलाप होते रहते हैं उस मेरे भारत की जय हो।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(५)

गांधीरवीन्द्रगौतमनहरूप्रभृत्यनेकैः ।

जननायकैः समृद्धं मम भारतं विजयते ॥

गांधी, रवीन्द्र, गौतम, नेहरू आदि अनेक जननायकों से समृद्ध है उस मेरे भारत की जय हो ।

(६)

कम्बन्कबीरतुलसीकविकालिदासगीतम् ।

विबुधैः सदैव चेष्टं मम भारतं विजयते ॥

जिसके गीत कालिदास, कम्बन, कबीर, तुलसी आदि ने गाये हैं एवं जो विबुधों (देवताओं तथा विद्वज्जनों) का सदैव अभीष्ट रहा है उस मेरे भारत की जय हो ।

(७)

कोणार्कताजसाँचीखजुराहसारनाथैः ।

कुतुबादिना च महितं मम भारतं विजयते ॥

कोर्णाक, ताजमहल, सांची, खजुराहो, सारनाथ एवं कुतुब मीनार आदि से जिसकी प्रतिष्ठा है उस मेरे भारत की जय हो ।

(८)

श्रुतभाखडानरौराकोटाभिलाइकल्पैः ।

संयन्त्रकैः समिद्धं मम भारतं विजयते ॥

प्रसिद्ध भाखड़ा, नरौरा, कोटा तथा भिलाई जैसे संयंत्रों से जो दीप्त है उस मेरे भारत की जय हो ।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(९)

सिंहस्थकुम्भसारणनवचण्डिकादिभव्यैः ।
मेलापकैः प्रसन्नं मम भारतं विजयते ॥

सिंहस्थ, कुंभ, सारण, नौचंदी आदि भव्य मेलों से जो प्रसन्न है उस मेरे भारत की जय हो ।

(१०)

विश्वस्य बन्धुभूतं मोक्षस्य साधकं यत् ।
गायच्च पञ्चशीलं मम भारतं विजयते ॥

जो विश्व का बंधु है, जो मोक्ष का साधक है और जिसने पंचशील को गाया उस मेरे भारत की जय हो ।

(११)

निन्दन्तु नीतिनिपुणाः यदि वा स्तुवन्तु कामम् ।
नित्यं विकाशमानं मम भारतं विंजयते ॥

नीति में निपुण लोग निंदा करें अथवा स्तुति करें इससे जिसे कोई अन्तर नहीं पड़ता एवं जो नित्य विकास कर रहा है उस मेरे भारत की जय हो ।

☼

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

भारतभूमिर्विलसति

(१)

वैदिक-सौगत-नास्तिक-
चार्वाकार्हत-प्रभृतिबहुधर्माः ।
वादे वादे बोधं,
यत्र लभन्ते मुदोत्फुल्लाः ॥

जगती तल में वह श्रेष्ठ भारत भूमि सुशोभित होती है जहां वैदिक, बौद्ध, नास्तिक, चार्वाक, जैन आदि बहुत से धर्म वाद-वाद में ज्ञान प्राप्त करते हैं एवं प्रसन्न रहते हैं ।

(२)

औदार्यं धार्मिक्यम्,
आध्यात्म्यं नित्यप्रगतिशीलत्वम्।
अन्ये चापि यदीयाः,
विश्वस्मिन् सद्गुणाः ख्याताः ॥

उदारता, धार्मिकता, अध्यात्मपरकता, नित्य प्रगतिशीलता एवं ऐसे ही और भी जिसके सद्गुण संसार में प्रसिद्ध हैं ।

(३)

प्रकृतिविलासो यस्यां,
विकिरति हासं स्वकीयमवदातम् ।
कष्टसहिष्णुत्वं च,
यस्याः प्रकृतौ सहजसिद्धम् ॥

जिसमें प्रकृति का विलास अपनी स्वच्छ हंसी को बिखेरता है और जिसके स्वभाव में कष्ट सहिष्णुता जन्मसिद्ध है ।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(४)

विरोधिनां तत्त्वानां,
सत्त्वानाञ्चापि विषमवृत्तीनाम् ।
समन्वयं या कुरुते,
नवनवशोभाभिवृद्ध्यर्थम्॥

जो नयी-नयी शोभा की अभिवृद्धि के लिए विरोधी तत्त्वों का एवं विषम व्यवहार वाले प्राणियों का समन्वय करती है ।

(५)

आशावादरतायाः,
आदर्शोद्घोषसुनिपुणायाः।
यस्या निखिलापीयं,
वसुधैव कुटुम्बकं भवति ॥

जो आशावाद में निरत है एवं जो आदर्शों की उद्घोषणा करने में अत्यन्त निपुण हैं और जिसके लिए यह सम्पूर्ण धरती ही एक कुटुम्ब है।

(६)

लोकोत्तरचरितानां,
लोकाराधननियुक्तमनुजानाम् ।
या जन्मभूमिरुदिता,
रुदिता अपि यत्र हसिताः स्युः ॥

जो लोकोत्तर चरित वाले तथा लोक की आराधना में नियुक्त मनुष्यों की जन्मभूमि कही जाती है एवं जहां रोते हुए प्राणी भी हंसने लगें।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(७)

स्नेहं दयां च सौख्यं,
जायामपि यत्र लोकपूजार्थम् ।
मुञ्चन् रामोऽद्यापि,
भगवानिव पूज्यते लोकैः ॥

जहां लोक की आराधना के लिए स्नेह, दया, सुख तथा पत्नी को भी त्याग देने वाले राम आज भी लोगों के द्वारा भगवान् के समान पूजे जाते हैं।

(८)

गीता गङ्गा गावो,
गीर्वाणगवी तथा च गीतानि ।
ग्रामाः गुरवो ग्रन्थाः,
यस्या गरयन्ति गरिमाणम् ॥

जिसके गौरव को गीता, गंगा, गौएं, गीर्वाणवाणी (संस्कृत), गीत, गांव, गुरु तथा ग्रन्थ बढ़ाते हैं।

(९)

अक्रोधेन क्रोधं,
साधुतया चाप्यसाधुतासरणिम् ।
दानेन या कदर्यं,
जयेदहिंसाबलेन हिंसां च ॥

जो अक्रोध से क्रोध पर, साधुता से असाधुता पर, दान से कंजूस पर एवं अहिंसा से हिंसा पर जय प्राप्त करती है।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(१०)

सत्पुत्राणां हि यथा,
कुपुत्रकाणां तथैव या चेष्टाः ।
समबुद्ध्या किल सहते,
यतो न माता कुमाता स्यात् ॥

जो जिस प्रकार सत्पुत्रों की चेष्टाओं को सहन करती है उसी प्रकार कुपुत्रों की भी चेष्टाओं को समान बुद्धि से सह लेती है क्योंकि माता तो कुमाता हो ही नहीं सकती।

(११)

वाणीविहारशीला,
शीलाब्धितरङ्गिता जलधिरशना ।
सुजला सुफला शस्य-
श्यामा सुखदा तथा वरदा ॥

जिसमें वाणी का विहार होता है; जो शील के सागर से तरंगित है; समुद्र की जिसने मेखला धारण की हुई है; जिसमें अनेक नदियां, निर्झर एवं जलाशय हैं; जो अनेक फलों से समृद्ध रहती है; जो शस्य श्यामला है; जो सुख देने वाली एवं वरदात्री है।

(१२)

अगणितगुणगणपूर्णा,
चित्रविचित्रैर्जनैस्सदा लसिता ।
आर्या भारतभूमि-
र्विलसति जगतीतले सेयम् ॥

जिसके असंख्य गुण हैं और जो चित्र -विचित्र जलों से सदा सुशोभित है।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

जय भारतमेदिनि विश्वनुते !

(१)

हिमवत्कलहासमरीचिसिते !
यमुनाजलनीलविभामहिते !
रविचुम्बितकोकनदारुणिते !
जय भारतमेदिनि विश्वनुते !

विश्ववन्द्य भारतभूमि ! तुम्हारी जय हो ! हिमालय की मनोरम हँसी की किरणों से तुम श्वेत हो, यमुना के जल की नीली छटा से तुम महनीय हो। जब प्रातःकाल सूरज लाल कमलों को चूमता है, तो उनके खिलने पर उनसे तुम अरुण हो उठती हो। विश्ववन्द्य भारत भूमि ! तुम्हारी जय हो।

(२)

नवसर्षप-पीतदुकूलयुते
बहुशस्यसमूहविभाहरिते !
मलयानिलमोदकलाकलिते !
जय भारतमेदिनि विश्वनुते !

जब खेतों में नयी-नयी सरसों खिलती है, तो लगता है कि तुमने पीली ओढ़नी धारण कर ली है। तुममें बहुत से अन्न उत्पन्न होते हैं। जब उनकी फसल खेतों में लहलहाती है, तो तुम हरियाली आभा धारण कर लेती हो। मलय पर्वत से चलने वाला पवन चंदन की गंध लेकर जब अपनी कला दिखाता है, तो तुम उससे अत्यन्त रमणीय लगने लगती हो। विश्ववन्द्य भारत भूमि ! तुम्हारी जय हो।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(३)

अतिपुण्यपुरातनपद्धतिभि-
र्नवनूतनयोगप्रयोगचयैः !
समयोचितनीतिबलैः सहिते !
जय भारतमेदिनि विश्वनुते !

एक ओर तो तुम अत्यन्त पवित्र एवं प्राचीन परम्पराओं से युक्त हो और दूसरी ओर तुममें नये-नये प्रयोग किये जाते हैं। तुम समयानुसार उचित नीति और बल को धारण करती हो। विश्ववन्द्य भारत भूमि ! तुम्हारी जय हो।

(४)

त्रिविधैः खलु तापचयैर्विकले
मनुजे शुभनिर्वृतिमादधती ।
नवमङ्गलदानविधानकरे !
जय भारतमेदिनि विश्वनुते !

आधिभौतिक, आधिदैविक एवं आध्यात्मिक इन तीन प्रकार के दुःखों के ताप से व्याकुल मनुष्य जब तुम्हारी शरण आते हैं, तो तुम उसे शुभ शान्ति प्रदान कर देती हो। तुम नित्य नूतन मंगल दान करने वाली हो। विश्ववन्द्य भारत भूमि ! तुम्हारी जय हो।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(५)

मुनिभिर्मनुजैर्दनुजैर्विबुधैः
कविभिर्नवचित्रकलैश्च तथा ।
निजजन्मसु जन्मसु काम्यतमे !
जय भारतमेदिनि विश्वनुते !

तुम्हें कौन नहीं चाहता ? अपने प्रत्येक जन्म में मुनिगण और मनुष्य तो तुम्हें चाहते ही हैं, राक्षस और देवता भी तुममें जन्म लेकर अपने को धन्य करना चाहते हैं। कविगण एवं नयी-नयी शैलियों की चित्रकला में प्रवीण कलाकार भी तुम्हारी शोभा का वर्णन करने के लिए जन्म-जन्म में तुम्हारा आश्रय चाहते हैं। विश्ववन्द्य भारत भूमि ! तुम्हारी जय हो।

(६)

जय वेदविभासितचित्तगुहे !
बहुदर्शनगोप्यरहस्ययुते !
अपवर्गसुभक्तिविधानकरे !
जय भारतमेदिनि विश्वनुते !

तुम्हारा चित्त वेदों से प्रकाशित है। बहुत से दर्शनों के संरक्षणीय रहस्यों को तुम धारण करती हो। प्राणी को मोक्ष एवं भक्ति देकर कृतार्थ करती हो। विश्ववन्द्य भारत भूमि ! तुम्हारी जय हो।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(७)

अभिमानधनैः रणशौण्डभटैः
कृषिकर्मपरैः श्रमिकैर्लसिते ।
शुचिशान्तिसुधाभरिते वरदे
जय भारतमेदिनि विश्वनुते !

एक ओर तो तुम में स्वाभिमान ही जिनका धन है ऐसे रण के शौकीन वीर विद्यमान हैं, दूसरी ओर खेती करने में तत्पर श्रमिकों से तुम सुशोभित हो। तुममें पवित्र शान्तिरूपी सुधा भरी हुई है। तुम लोगों को मनोभिलषित वर देने वाली हो। विश्ववन्द्य भारत भूमि ! तुम्हारी जय हो।

(८)

जय नैकप्रदेशप्रभालसिते !
बहुवर्णजनौघविभालसिते !
बहुलोकसुरीतिरसैः सरसे
जय भारतमेदिनि विश्वनुते !

तुम में अनेक प्रदेश हैं, उनकी न्यारी-न्यारी शोभा से तुम युक्त हो। तुम में बहुत से वर्णों के जनसमूह अपनी विभा का विकास करते हैं। तुम में अनेक लोक रीतियां हैं। उनके रसों से तुम सरस रहती हो। विश्ववन्द्य भारत भूमि ! तुम्हारी जय हो।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(९)

करुणाकलिते ! मुदिताभरिते !
सरसे ! सरले ! मृदुले ! ललिते !
सुदृढे ! दुरितौघविनाशकरे !
जय भारतमेदिनि ! विश्वनुते !

तुम करुणा से परिपूर्ण हो, मुदिता से भरी हो, तुम सरस हो, तुम सरल हो, तुम मृदुल हो, तुम ललित हो, तुम सुदृढ़ हो एवं पाप समूह का विनाश करने वाली हो। विश्ववन्द्य भारत भूमि ! तुम्हारी जय हो।

✡

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

भारताख्य: स्वदेश:

(१)

सलिलनिधितरङ्गैर्धौतपादाम्बुजोऽसौ
हिमगिरिशुभहासैर्भासयन्नाननं स्वम् ।
प्रकृतिकलविलासैर्मोदकारी जनानां
जयति जगति नित्यं भारताख्यः स्वदेशः ॥

समुद्र की तरंगें जिसके चरण कमल धोती हैं हिमालय की शुभ्र हंसी से जिसका मुख चमकता है, जो प्रकृति के सुरम्य विलासों से प्राणियों को प्रसन्नता प्रदान करता है, ऐसा भारत नाम वाला मेरा देश जगत् में नित्य सुशोभित है।

(२)

शिखिकुलकलकेका काकली कोकिलानाम्
कलयति कलकाले कान्तकान्तारप्रान्तान् ।
प्रकृतिकलविलासान् यत्र पश्यन्ति नित्यं
विकचकमलनेत्रैर्हर्षफुल्लैस्सरांसि ॥

जिसमें मयूरों की सुन्दर बोली एवं कोकिलों की कूक रम्य समय आने पर वन प्रान्तों को और रमणीय बना देती हैं प्रकृति की मनोरम अदाओं को जहां तालाब खिले हुए कमलरूपी प्रसन्न नेत्रों से निहारते हैं।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(३)

नवपरिमलगन्धैर्मन्दशीतैः समीरैः
प्रकृतिनववधूटीस्वाङ्गरागैः परागैः ।
धृतमधुकरपुञ्जैर्गुञ्जितैर्मञ्जुकुञ्जै-
र्विलसति मधुमत्तो यत्र राजा ऋतूनाम् ॥

मेरे देश भारत में फूलों के नव परिमल गंधों से, मंद एवं शीतल बहने वाले पवन से, प्रकृतिरूपी नवबधूटी के अंगरागों के समान परागों से एवं भौरों के समूह को धारण करने वाले एवं गूंजते हुए सुन्दर कुंजों से ऋतुओं का राजा वसन्त अत्यन्त शोभित होता है।

(४)

भृगुकलकलनादैः किञ्चिदाभाषयन्त्यो
जलपतनजफेनैर्मोदमाना हसन्त्यः ।
मरकततृणवासैरावृता यत्र रम्या
विदधति गिरिमालाः स्वैः पयोधृद्भिराशाः ॥

यहां पर्वतमालाएं अत्यन्त शोभा धारण करती हैं, उनसे झरने गिरते हैं लगता है कि उनके कल-कल निनाद के बहाने से वे कुछ बोल रही हैं। झरनों का जल जब नीचे गिरता है तो उनसे झाग उठता है, ऐसा प्रतीत होता है मानों सफेद झाग के बहाने से पर्वतमालाएं हँस रही हैं। मरकत मणि के समान हरी-हरी घास से ये पहाड़ियां अपना तन ढके हुए हैं, और इनके ऊपर जब बादल मंडराते हैं, तो ये अपने पयोधरों (बादलों एवं स्तनों) से समस्त दिशाओं को मुग्ध बना देती हैं।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(५)

भ्रमिकरजलवीचिभ्रूकटाक्षान् क्षिपन्त्य-
स्तटगतखगशब्दैः सिन्धुमाकारयन्त्यः ।
धृतबहुविधरत्नं यान्ति लावण्यपूर्णं
सरलतरलनद्यो यत्र नित्यं नदीशम् ॥

यहां की सरल तरल नदियों का तो कहना ही क्या, वे अपने प्रिय नदीश (समुद्र) से मिलने के लिए जा रही हैं। इनकी लहरें क्या हैं, इनके भ्रूकटाक्ष हैं, इनके किनारे पर पक्षी जो शब्द कर रहे हैं, वह मानो नदियों का आमंत्रण ही है,जो समुद्र को दिया जा रहा है। इनकी पसंद का भी क्या कहना, इन्होंने ऐसा पति चुना है, जिसके पास अनेक प्रकार के रत्न विद्यमान हैं एवं जो अत्यन्त लावण्यपूर्ण है।

(६)

वनविटपिकदम्बैः केलिलीलाकदम्बै-
र्मुरलिवटसनाथैर्भृङ्गकृष्णैः स्थलैश्च ।
चलरवितनयायाः श्यामिकाभिश्च यत्रा-
नुभवति खलु वृन्दाकाननं कृष्णमीशम् ॥

जहां वृन्दावन आज भी कृष्ण जी के सानिध्य का अनुभव करता है जबकि वह देखता है वन में श्यामल-श्यामल वृक्षों के समूह विद्यमान हैं, कदम्ब के वृक्ष भी वहां विद्यमान हैं, वह वट का वृक्ष भी विद्यमान है । जहां श्रीकृष्ण जी अपनी मुरली बजाया करते थे, उन स्थानों पर भौरें मंडरा रहे हैं। इसके अतिरिक्त प्रवहमान यमुना की श्यामिका भी फैली है।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(७)

भवति मृदुलशोभा सर्षपाणां वसन्ते
शरदि कमलराशिः प्रस्फुटो जायते च ।
हरितवसनशोभां वर्द्धयन्ती पृथिव्या
विलसति तृणराजिर्यत्र वर्षर्तुकाले ॥

यहां जब वसंत आता है तो सरसों की मृदुल शोभा विकीर्ण हो जाती है, और जब शरद ऋतु आती है तो कमल समूह खिल जाते हैं। वर्षा ऋतु के समय धरती की हरी साड़ी जैसी शोभा बढ़ाती हुई हरी घास सुशोभित होती है।

(८)

कनकगुणनिबद्धैः कुन्तलानां कलापैः
सम इह चलविद्युद्दामशोभः प्रसन्नः ।
करिवर इव कृष्णो नीरगण्डूषकारी
स्वनति मृदुगभीरं तोयवाहः सुकाले ।

जहां वर्षा ऋतु में जलधर मंद गंभीर गर्जना करता है एवं जल की फुहारें छोड़ता है उसी प्रकार जिस प्रकार श्याम वर्ण हाथी अपनी सूंड से फुहार छोड़ता है एवं शब्द भी करता है। बादल की शोभा कभी-कभी तो ऐसी लगती है जैसे किसी रमणी का सुनहरे सूत्र से बांधा गया केश कलाप हो। बिजली बादल में जब चमकती है, तो ऐसा लगता है कि यह किसी नायिका के केश कलाप का स्वर्ण सूत्र हो।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(९)

क्व मिलति विषधृद्भिर्मित्रता चन्दनानाम् ?
क्व च मलयजगन्धो याति धीरः समीरः ?
क्व च वितरति मोदं शुभ्रकाश्मीरशोभा ?
षड्तुकलविलासो भारतादन्यतः क्व ?

बताओ तो सही कि विष धारण करने वाले सर्पों से चन्दनों की मित्रता यहां के अतिरिक्त और कहां मिलती है? चन्दन का गंध वहन करता धीर समीर और कहां विहार करता है? काश्मीर की शुभ्र शोभा कहां प्रसन्नता बांटती है? छः ऋतुओं का रमणीय विलास और कहाँ है?

(१०)

क्व च मुनिगणपूर्णा आश्रमा सम्भवन्ति
नवकिसलयरागा यत्र चित्तं हरन्ति ।
त्यजति ऋजुमुनीनां क्रोडमागत्य यत्र
नवमृगसुतवृन्दं नाभिनालानि, चित्रम् !

यहाँ के अतिरिक्त और कहां मुनियों के गणों से पूर्ण ऐसे आश्रम सम्भव हैं जहां नव पल्लवों के रंग चित्त को हर लेते हैं एवं जहां सरलचित्त मुनियों की गोदी में आकर नये-नये मृगछौने अपने नाभिनाल को छोड़ देते हैं।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(११)

क्वचिदपि हरिणाली सञ्चरन्ती चकास्ति
क्वचिदपि च गजानां यत्र यूथं प्रसन्नम् ।
क्वचिदपि दृढनादो यत्र कण्ठीरवाणाम्
उपवन-वनभागा ईदृशाः कुत्र सन्ति ?

ऐसे उपवन एवं वन प्रान्त और कहां हैं जिनमें कहीं तो मृगों का समूह संचरण कर रहा है, कहीं हाथियों का समूह प्रसन्न होकर विचरण कर रहा है और कहीं सिंहों की कठोर दहाड़ें सुनाई दे रहीं हैं।

(१२)

धवलजलपवित्रा पापनाशे प्रसक्ता,
क्वणितजलतरङ्गा कच्छपीधारिणी च ।
जलगणशुचिकर्त्री नीलकण्ठासना च
विलसति शुभगङ्गा शारदा च क्व शुभ्रा ?

शुभदायिनी गंगा एवं भगवती सरस्वती समान विशेषणों से युक्त होकर और कहां सुशोभित होती हैं? गंगा धवल जल से पवित्र है, और सरस्वती धवल जल के समान उज्ज्वल एवं पवित्र है। दोनों धवलजल पवित्रा हैं। दोनों ही अपने शरणागतों के पापों का नाश करने में संलग्न रहती है। गंगा अपने जल की तरंगों का वाद्य बजाती है एवं अपने क्वणित से जड़ (मंदमति) में भी वैदुषी की तरंग उठाने वाली है। गंगा कच्छपियों को धारण करती है एवं सरस्वती कच्छपी नाम की वीणा को। गंगा नीलकंठ (शिव) के मस्तक पर आसन जमाये हुए हैं और सरस्वती नीलकंठ (मयूर) को अपना आसन बनाये हुए है।

◆ ◆ ◆

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

दिव्यं मम भारतम्

विविधपण्डितमण्डलमण्डिता
प्रकृतिपुण्यविलाससमाहिता ।
विविधवीरवरावृतमण्डला
जयति भारतभूमिरियं भुवि ॥१॥

विविध विद्वानों के समूह से मंडित, प्रकृति के पवित्र विलास से युक्त तथा जिसका वलय विविध श्रेष्ठ वीरों से युक्त है, ऐसी यह भारत भूमि धरती पर सुशोभित हो रही है। मैं इसे प्रणाम करता हूं।

यस्मिंल्लोकगणः सुखेन वसति
प्राप्तोऽभयं सर्वदा ।
गौरश्यामविभेदहीनजनता
यत्रास्ति कार्याकुला ।
स्वातन्त्र्येण चमत्कृतं च परितो
यत्रास्ति भूमण्डलम् ।
दिव्यं तन्मम भारतं विजयते
संसार-सम्भूषणम् ॥२॥

जिसमें निर्भय होकर सभी लोग सदा सुखपूर्वक निवास करते हैं, जहां काले-गोरे के भेद को भूलकर जनता अपने-अपने कार्य में लगी हुई है, जहां सारी धरती स्वतंत्रता के भाव से चमत्कृत रहती है, वह मेरा भारत बड़ा दिव्य है और संसार का भूषण है।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

येषां देशसुरक्षणाय नभसि
प्रज्वालिते चानले ।
झञ्झावातसमेतवृष्टिषु मनो
यातुं सदा प्रस्तुतम् ।
सन्त्येतादृशवीरभावभरिता
यस्यान्तराले भटाः।
भव्यं तन्मम भारतं विजयते
संसार-सम्भूषणम् ॥३॥

देश की सुरक्षा के लिए आकाश में, जलती हुई आग में एवं आँधी से भरी बरसात में भी जाने के लिए जिनका मन सदा प्रस्तुत रहता है, ऐसे वीरभाव से परिपूर्ण सैनिक जिसमें रहते हैं वह मेरा भव्य भारत संसार का अलंकार है।

यत्स्वातन्त्र्यदिनप्रमोदसमये
मोदाकुला मेदिनी ।
आशाः सौरभमण्डिता विजयते
मुग्धस्त्रिरङ्गो ध्वजः ।
यत्रानेकविधै प्रमोदकरणै-
रातिथ्यकृत्यैर्नवैः
मान्यन्तेऽतिथयः स मे विजयते
देशः सदा भारतम् ॥४॥

जिसके स्वतन्त्रता दिवस के प्रमोद के समय पृथ्वी प्रसन्नता से भर उठती है, दिशाएं सुवासित हो उठती हैं, तिरंगा झंडा रीझ जाता है और जहां प्रसन्नतादायक अनेक प्रकार के आतिथ्य संभारों से अतिथियों का सत्कार किया जाता है वह मेरा देश भारत सदा सुशोभित होता है।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

यन्त्रोद्योगकलानिकेतनयुतं
वैज्ञानिकैः पावितम्।
कीर्तिश्रीयुतदेशभक्तचरितै-
श्चित्रं चमत्कारकम्।
विद्यारक्षणदक्षपण्डितगणै-
र्नित्यं समाराधितम् ।
विस्तीर्णं वसुधातले विजयते
मे भारतं भारतम् ॥५॥

संयंत्रों, उद्योगों एवं कलाओं के संस्थानों से युक्त, वैज्ञानिकों से पवित्र, कीर्तिरूपी लक्ष्मी को धारण करने वाले देशभक्तों के चरितों से रंग-बिरंगा, चमत्कार प्रदान करने वाला, विद्या की रक्षा में निपुण, विद्वद्वृन्द से नित्य समाराधित वसुधातल में विस्तीर्ण मेरा भारत सुशोभित है।

यद्भूमौ प्रवहन्ति देवसरिता
साकं नदीनां गणाः ।
यन्मूर्द्धा हिमशैलमण्डनयुतः
पादाः समुद्रादृताः ।
यद्भूमिर्नितरां सुवर्णसहिता
धान्यैः सदा दृश्यते ।
दिव्यं तन्मम भारतं विजयते
संसार - सम्भूषणम् ॥६॥

जिसकी धरती पर देवनदी (गंगा) के सहित अनेक नदियाँ बहती हैं, जिसका मस्तक हिमालय से मंडित है, जिसके चरण समुद्र द्वारा पूजित हैं और जिसकी भूमि धान्यों से सुवर्णमय दिखाई देती है, वह मेरा दिव्य भारत संसार का अलंकार है।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

यद्वृन्दाविपिने मुकुन्दचरिता-
न्यद्यापि साक्षादिव ।
यत्काशीश्वरविश्वनाथकृपया
पापान्धकारापहा ।
यत्तीर्थानि सदैव पापदहनं
कुर्वन्ति शान्तं जलैः ।
भव्यं तन्मम भारतं विजयते
संसार - सम्भूषणम् ॥७॥

जिसके वृंदावन में मुकुंद के चरित आज भी साक्षात् से अनुभव होते हैं , जिसकी काशी बाबा विश्वनाथ की कृपा से पाप के अंधेरे को दूर करने वाली है, जिसके तीर्थ अपने जलों से पाप की आग को शांत करते हैं, वह मेरा भव्य भारत संसार का अलंकार है।

यस्मिन्नस्ति सहिष्णुतापरिमिता
तोषः परं राजते ।
यत्रास्ते ऋजुता परं प्रमुदिता
यस्मिंश्च शान्तिः परा ।
वैपुल्यं भजते च यत्र विदुषां
पाण्डित्यपुञ्जः सदा ।
दिव्यं तन्मम भारतं विजयते
संसार - सम्भूषणम् ॥८॥

जिसमें अपरिमित सहिष्णुता है, परम संतोष है, जहां सरलता अत्यन्त प्रमुदित रहती है, जिसमें परम शान्ति मिलती है और जहां विद्वानों के वैदुष्य की पूँजी बहुत अधिक है, वह मेरा भारत संसार का अलंकार है।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

भाति मौरीशसम्

(1)

भारताम्भोधिमुक्ताफलं भास्वरं,
पूर्वरूपं पृथिव्यां दिवः सुन्दरम् ।
भारतं रूपमेवापरं धारयत्
भाति मौरीशसं भाति मौरीशसम् ॥

मॉरीशस हिन्दमहासागर का चमकता मोती है। जब भगवान् ने स्वर्ग बनाना चाहा तो पहले उसका एक रूप धरती पर बनाया, वही मॉरीशस है। लगता है भारत ने ही एक दूसरा रूप धारण कर लिया है। मनभावन है मॉरीशस, सुशोभित है मॉरीशस।

(2)

इक्षुमाधुर्यपूर्णं, प्रकृत्याः प्रियं
कल्पनाकौशलं, पर्वतश्रीयुतम् ।
श्यामशस्यावृतं पुष्पहासान्वितं
भाति मौरीशसं भाति मौरीशसम् ॥

ईख की मधुरता से परिपूर्ण, प्रकृति का प्यारा कल्पना कौशल, पर्वतों की शोभा से युक्त, हरी फसलों से आवृत एवं फूलों की हंसी से युक्त मनभावन है मॉरीशस, सुशोभित है मॉरीशस।

(3)

वेशभूषाशनोपासनापद्धति-
क्रीडनामोदसंस्कारवृत्त्यादिषु ।
यद्धि भिन्नं सदप्यस्त्यभिन्नं हि तत्
भाति मौरीशसं भाति मौरीशसम् ॥

यद्यपि इसमें भिन्न-भिन्न वेशभूषाएं, उपासना पद्धतियां, खेल-कूद, आमोद-प्रमोद, संस्कार एवं आजीविकाएँ हैं तथापि यह अभिन्न है। मनभावन है मॉरीशस, सुशोभित है मॉरीशस।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(4)

वेदभाभासितं सत्कलालासितं
रम्यसंगीतसाहित्यसौहित्यभूः ।
भारतीवल्लकीझङ्कृतैर्झङ्कृतं
भाति मौरीशसं भाति मौरीशसम् ॥

यह वेद की प्रभा से भासित है, सत्कलाओं से सुशोभित है, सुरम्य संगीत एवं साहित्य की प्रसन्नता की भूमि है तथा सरस्वती की वीणा से झंकृत है। मनभावन है मॉरीशस, सुशोभित है मॉरीशस।

(5)

संस्कृतं गुर्जरीं तामिलं तेलुगुं
भोजपूरीं क्रियोलं महाराष्ट्रिकाम् ।
फ्रेञ्चहिन्द्यांग्लभाषाश्च नित्यं वदत्
भाति मौरीशसं भाति मौरीशसम् ॥

संस्कृत, गुजराती, तमिल, तेलगु, भोजपुरी, क्रियोल, मराठी, फ्रैंच, हिन्दी एवं अंग्रेजी भाषाओं को प्रतिदिन बोलता हुआ मनभावन है मॉरीशस, सुशोभित है मॉरीशस।

(6)

होलिका-दशहरा-पर्वकोजागरी-
पोङ्गल - श्रावणी - दीपमालामयम् ।
ईद-वैशाखि-कृसमस् - युगादीन् दधत्
भाति मौरीशसं भाति मौरीशसम् ॥

होलिका, दशहरा, शरत्पूर्णिमा, पोंगल, रक्षा-बंधन, दीपावली, ईद, बैसाखी, क्रिसमस तथा युगादि आदि पर्वोत्सवों को धारण करता हुआ मनभावन है मॉरीशस, सुशोभित है मॉरीशस।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(7)

शङ्करं शम्प्रदं माधवं राघवं
पार्वतीं राधिकां जानकीं च स्तुवत् ।
मारुतिं बुद्धदेवं जिनं च स्मरत्
भाति मौरीशसं भाति मौरीशसम् ॥

भक्तों के कल्याणकारी भगवान् शंकर एवं पार्वती जी, कृष्णजी एवं राधा जी, श्री हनुमानजी, बुद्धदेव एवं जिनेन्द्र का स्मरण करता हुआ मनभावन है मॉरीशस, सुशोभित है मॉरीशस।

(8)

मन्दिरैर्मस्जिदैश्चैत्यगिर्जागृहै-
रार्यगेहैर्गुरुद्वारकैः राजितम् ।
कर्मभूः शर्मभूः धर्मभूः मर्मभूः
भाति मौरीशसं भाति मौरीशसम् ॥

मंदिरों, मस्जिदों, चैत्यों, गिरजाघरों, आर्यसमाजों, गुरुद्वारों से सुशोभित कर्मभूमि, शर्मभूमि, धर्मभूमि एवं मर्मभूमि मनभावन है मॉरीशस, सुशोभित है मॉरीशस।

(9)

राजमार्गेषु पुष्पप्रहासैर्युतम्
आम्र-लीची-लिली[1]-ताल[2]-शोभायुतम् ।
भास्करास्तोदयाभ्यां[3] भृशं रञ्जितम्
भाति मौरीशसं भाति मौरीशसम् ॥

इसके राजमार्गों पर फूलों की हंसी दिखाई देती है। यह आम, लीची, लिली एवं ताल की शोभा को धारण करने वाला है। सूर्यास्त और सूर्योदय के समय यह अत्यन्त रंगीन एवं रमणीय हो जाता है। मनभावन है मॉरीशस, सुशोभित है मॉरीशस।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(10)

सप्तवर्णां[4] धरित्रीं विचित्रां दधत्
इन्द्रचापप्रभाभिर्भृशं[5] रञ्जितम् ।
रम्यमन्तूरियम्[6] पुष्पहासैर्युतम्
भाति मौरीशसं भाति मौरीशसम् ॥

यह सात रंगों वाली विचित्र भूमि को धारण करता है। इन्द्र धनुषों की प्रभा से यह अत्यन्त रंगीन है। यह सुन्दर अंतूरियम नाम पुष्प की हँसी को धारण करने वाला है। मनभावन है मॉरीशस, सुशोभित है मॉरीशस।

(11)

यत्र नानार्तवः सन्ति दृश्याः सदा
यस्य चेतोहरं रम्यरूपं तथा ।
हिन्दपाथोधिरिङ्गत्तरङ्गार्चितं
भाति मौरीशसं भाति मौरीशसम् ॥

जहां नाना ऋतुएं सर्वदा दिखाई देती हैं, जिसका रमणीय रूप मन को हरने वाला है एवं जो हिन्द महासागर की खेलती हुई तरंगों से अर्चित है वह मनभावन है मॉरीशस, सुशोभित है मॉरीशस।

(12)

मोक्षदांगुष्ठलम्बैर्नगैः[8] शोभितम्
अङ्गरक्षाद्रि-मुण्डाद्रि[9]-सम्पालितम् ।
निर्झराणां रवैः स्वीयवृत्तं वदत्
भाति मौरीशसं भाति मौरीशसम् ॥

मोका नामक, अँगूठे के आकार वाले तथा लम्बे पर्वतों (मोका, डेअर पूश तथा मोताई लाँग) से शोभित और गार्ड तथा मुंड नामक पर्वतों से पालित तथा झरनों के शब्दों से अपने इतिहास को सुनाता हुआ मनभावन है मॉरीशस, सुशोभित है मॉरीशस।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(13)

क्वापि यात्रिद्रुमैः[10] क्वापि चिञ्चाद्रुमैः[11]
क्वाप्यनन्नास[12] - सत्क्षेत्रकैर्मोदितम् ।
क्वापि लोंगान[13]-चीनामृतैः[14] स्वादु सत्
भाति मौरीशसं भाति मौरीशसम् ॥

कहीं ट्रेवलर्स ट्री नामक वृक्षों से, कहीं इमली के वृक्षों से और कहीं अन्नानास के खेतों से प्रमुदित एवं कहीं लौंगान और चीनी अमरूदों के द्वारा स्वादिष्ट होता हुआ मनभावन है मॉरीशस, सुशोभित है मॉरीशस।

(14)

आतिथेयो भवेत् शीघ्रमभ्यागतो
यत्र कैश्चित्क्षणैरेव दूरागतः ।
शान्तिदं धर्मपीयूषपूरप्लुतं
भाति मौरीशसं भाति मौरीशसम् ॥

जहां दूर से आया हुआ अतिथि भी कुछ ही क्षणों में अपने को आतिथेय समझने लगता है, वह शान्ति देने वाला एवं धर्मामृत की धारा से युक्त म्रनभावन है मॉरीशस, सुशोभित है मॉरीशस।

(15)

लोकनृत्याञ्जितं लोककृत्यान्वितं
लोकगाथांकितं लोकगीतान्वितम् ।
रागरङ्गोत्सवैर्मण्डितं वर्धितं
भाति मौरीशसं भाति मौरीशसम् ॥

लोकनृत्यों में व्यंजित, लोककृत्यों से युक्त, लोकगाथाओं से अंकित, लोकगीतों से युक्त एवं राग-रंग भरे उत्सवों से मंडित प्रगति परक मनभावन है मॉरीशस, सुशोभित है मॉरीशस।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(16)

यस्य संदृश्य संदृश्य शोभा नवाः
यस्य संस्मृत्य संस्मृत्य नाना कथाः ।
रोमहर्षो नृणां जायते तत्प्रियं
भाति मौरीशसं भाति मौरीशसम् ॥

जिसकी नव-नूतन शोभा को देख-देखकर, जिसकी नाना कथाओं को स्मरण कर लोगों को रोमांच हो आता है, वह मनभावन है मॉरीशस, सुशोभित है मॉरीशस।

(17)

'विर्जिनी-पाल'[15] गाथाङ्कितं कोमलं
चित्तविश्रामभूमिः कवीनां प्रिया ।
सर्पदंशैर्विहीनं मधुप्लावितं
भाति मौरीशसं भाति मौरीशसम् ॥

विर्जिनी और पॉल की प्रेमकथा से अंकित होने से यह अत्यन्त कोमल है। कवियों की यह प्रिय चित्तविश्राम भूमि है। सर्पदंशों से रहित एवं मधु से परिपूर्ण मनभावन है मॉरीशस, सुशोभित है मॉरीशस।

(18)

''हन्त ! डोडोतपस्वी[16] खलैर्नाशितः''
इत्थमाक्रुद्ध्य यत्र प्रकृत्या भृशम् ।
चक्रवातक्रमेणेव निःश्वस्यते
तत्प्रकृत्या गृहं भाति मौरीशसम् ॥

''हाय-हाय ! बेचारे डोडो नामक पक्षी को दुष्टों ने नष्ट कर दिया'' मानो इसलिए क्रोध करके प्रकृति जहां चक्रवात (सॉइक्लोन) के बहाने से विषाद भरे सांस लेती है वह प्रकृति का घर मॉरीशस सुशोभित है।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(19)

सांस्कृतं मेलनं[18] योजयित्वाखिलान्
विज्ञधुर्यान् नयज्ञाँस्तथा धार्मिकान् ।
गान्धिसंस्थान-प्रेक्षागृहे[19] दर्शयत्
भाति मौरीशसं भाति मौरीशसम् ॥

जो अंतर्राष्ट्रीय संस्कृत सम्मेलन का आयोजन कर समस्त विद्वज्जनों, राजनयिकों तथा धार्मिक पुरुषों को गांधी संस्थान (एम. जी. आई.) के प्रेक्षागृह में दिखाता है वह मनभावन है मॉरीशस, सुशोभित है मॉरीशस।

(20)

हे रमाकान्त ! पश्यात्र दामोदरं
वासुदेवं हि विष्णुं दयालुं हरिम् ।
लक्ष्मणं रामयुक्तं सुरेशं शिवं
नागराजं रवीन्द्रानिरुद्धारुणान् ॥[20]

हे रमाकान्त ! यहां तुम दामोदर, वासुदेव, विष्णु, दयालु हरि, राम-लक्ष्मण, सुरेश, शिव, नागराज, रवि, इन्द्र अनिरुद्ध एवं अरुण को देखो।

(21)

भो रमाकान्त ! पश्यात्र गेहे सताम्
मारुतेर्वैजयन्तीं[21] लसन्तीं शुभाम् ।
पश्य ! विस्मृत्य पीडामतीतां निजां
भाति मौरीशसं भाति मौरीशसम् ॥

हे रमाकान्त ! देखो, सज्जनों के घरों पर हनुमानजी की शुभ ध्वजा कैसी सुशोभित हो रही है। देखो, अपनी अतीतकालीन पीड़ा को भूलकर कैसा मनभावन है मॉरीशस, सुशोभित है मॉरीशस।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(22)

यस्य गङ्गातटाके[22] शिवं शङ्करं
पूजयित्वा लभन्ते सुखं सज्जनाः ।
'स्वस्तिका'[23]-होलिका-रागपूर्णं हि तत्
भाति मौरीशसं भाति मौरीशसम् ॥

जिसके गंगा तालाब पर शिव शंकर को पूज कर सज्जन सुख प्राप्त करते हैं एवं जो स्वस्तिका नामक स्थान पर होली के रंगों से परिपूर्ण होता है वह मनभावन है मॉरीशस, सुशोभित है मॉरीशस।

(23)

होलिका श्रीमतां जीवनं पूरयेत्
सौख्य-शोभा-समुल्लासभावैस्सदा ।
सेचितं प्रेमरागेण[24] चोल्लासितं
भातु मौरीशसं भातु मौरीशसम् ॥

होली आपके जीवन को सुख शोभा एवं समुल्लास के भावों से सदा भर दे और प्रेम के राग से उल्लसित हुआ यह मॉरीशस सदा मनभावन रहे, सदा सुशोभित रहे।

(24)

हर्षमुल्लासमोजो दधाना सदा
रत्नगर्भा धरेयं सदा राजताम् ।
शारदा - श्रीसपर्यापरं सत्सदा
भातु मौरीशसं भातु मौरीशसम् ॥

हर्ष, उल्लास एवं ओज को धारण करने वाली यह रत्नगर्भा धरा सदा सुशोभित रहे। सरस्वती एवं लक्ष्मी की सपर्या में सदा तत्पर होता हुआ मॉरीशस मनभावन रहे, सुशोभित रहे।

●

(रचनातिथि : 17-3-1984 ई० । रचनास्थानम् : मौरीशसम्)

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

टिप्पण्यः

१. **लिली**–'पाम्लेमूस गार्डन' इत्याख्ये उद्याने शतदलकमलं बृहत्पत्रशोभितं 'जाइण्ट लिली (Giant Lily)' इत्यभिधीयते ।

२. **ताल**–तत्रैवोद्याने विचित्रताल (Palm)-वृक्षोऽस्ति यस्मिन् शतवर्षाभ्यन्तरे एकवारं पुष्पोद्गमो भवति । इदं च पुष्पं षण्मासावधि तिष्ठति। पुष्प-नाशानन्तरमयं तालवृक्षोऽपि नश्यति। उद्यान-व्यवस्थापकैरस्य वृक्षस्य परम्परा वर्धाप्यते येन प्रतिवर्षं दर्शका अस्य पुष्पमवलोकयितुमवसरं लभन्ताम्।

३. **भास्करास्तोदयाभ्याम्**–मौरीशसदेशे सूर्योदयं सूर्यास्तं च द्रष्टुं पर्यटकाः सौत्सुक्यं तिष्ठन्ति यथा भारते कन्याकुमारी-क्षेत्रे।

४. **सप्तवर्णां धरित्रीं**–'समारैल' स्थाने विविधवर्णा धरित्री आश्चर्यं जनयति। अत्रत्या मृत्तिका मया १८.३.१९८४ तारिकायाम् यदा भक्षिता तदा ज्ञातं यदियं मृत्तिका नास्ति अपितु किमपि रसायनमिवास्ति। वैज्ञानिकैरस्याः परीक्षणं कर्तव्यम्, तदैव तस्या गुणानां ज्ञानं सम्यग् भविष्यति। केचिद्वदन्ति यत्कदाचिदत्र ज्वालामुखीविस्फोटः सञ्जातस्तदैव भूगर्भादयं पदार्थः आविर्बभूव। यतो हि सूर्यकिरणानां वर्णाः सप्त भवन्ति-इति हेतोः अत्रत्यां मृत्तिकां सप्तवर्णां कथयन्ति लोकाः। वस्तुतः 'सप्ते' त्युपलक्षणम्। तत ऊर्ध्वमेव वर्णास्तत्र प्रतीयन्ते। यैर्विश्वस्याश्चर्याणि परिगंणितान्यासन्, मन्ये तैरियं 'समारैल'-धरित्री नावलोकि अन्यथास्याः परिगणनं तैरवश्यमेव विश्वाश्चर्येषु कृतं स्यात्।

५. **इन्द्रचाप०**–मौरीशसदेशे इन्द्रधनूंषि बहुधा आकाशं रञ्जयन्ति। अतएवेदम् **'इन्द्रधनुषां प्रदेशः'** (Land of Rainbows) इति कथ्यते।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

६. **अन्तूरियम्**–एतन्नामकं पुष्पमत्यन्तं मनोहरं नयनहरं च भवति। अस्य पादपः साक्षात् सूर्यातपं न सहते; अतो जनाः आतपवाणाय अस्योपरि जालवस्त्रं तन्वते। मया श्रीपरमानन्द रामलखन-महाभागस्योद्याने एतेषां प्रसूनानां हासः सस्पृहमवलोकितः। रक्तमिदं पुष्पमत्यन्तं महार्घं भवति।

७. **नानातर्वः०**–मौरीशसे प्रत्यहं वसन्तः, शरद्, वर्षा, ग्रीष्मश्चानुभवितुं शक्यन्ते। 'पोर्ट-लुई' क्षेत्रे ग्रीष्मः, 'कार्त्रबोन' क्षेत्रे वसन्तो यत्र वीथीनां नामानि पुष्प-फलाधारेण सन्ति। 'मोका' क्षेत्रे वृष्टिः। 'सोड्नक'-शिखरे **'निकोलियर्'**-पर्वते च शरदनुभूयते। **'क्यूर् पिप्'**-क्षेत्रे च वर्षा-शरद्-वसन्तानां सङ्गमः। वस्तुतः मौरिशसे प्रति मीलचतुष्टयम् ऋतुपरिवर्तनं भवति।

८. **मोक्षदांगुष्ठलम्बैर्नगैः**–मोक्षदः = मोका (Moka)-पर्वतः, **अंगुष्ठगिरिः** ='अंगूठा-पहाड़' इति हिन्दीभाषायां 'पूश' इति च फ्रेञ्चभाषायां प्रसिद्धः पर्वतः, यस्य मौरीशस- वयोवृद्धसाहित्यकारेण श्रीवासुदेवविष्णुदयालमहाभागेन **'कैलास'** इति नाम कृतम्। **लम्बनगः**–'लम्बा पर्वत' (Long Mountain), 'मोंताई लाँग' इति फ्रेञ्चभाषायां प्रसिद्धः।

९. **अङ्गरक्षाद्रिः**–Body Guard Mountain 'कोदी गार्द' इति फ्रेञ्चभाषायां प्रसिद्धः। **मुण्डाद्रिः**–'मुंडिया पहाड़' इति हिन्दीभाषायां प्रसिद्धः 'पीटर बोथ' इत्यपरनामधेयः पर्वतः, यद्विषये लोककथा अपि प्रसिद्धा।

१०. **यात्रिद्रुमैः**–Traveller's Tree कदलीतालयोः सङ्करवृक्षः। अस्य पत्रे माङ्गलिकोत्सवेषु भोजनमपि क्रियते मौरीशसदेशीयैः।

११. **चिञ्चाद्रुमैः**–Tamrine Trees 'इमली'ति हिन्द्याम्।

१२. **अनन्नास**–Pine Apple मौरीशसे बहु भवति। फ्रेंच-क्रियोलभाषायां 'जनाना'इति कथ्यते।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

१३. **लोंगान**–Longan इति नामधेयं लीची-सदृशं फ़लम्।

१४. **चीनामृतम्**–'चीनी अमरूद' इति प्रसिद्धं फलम्। अम्ल- मधुरोऽस्य स्वाद:।

१५. **'विर्जिनी'-'पाल'-गाथा**–'बेरनार्दे सें प्येर'-नाम्ना फ्रेञ्च- लेखकेन कृत: 'पाल एण्ड विर्जिनी'-नामक उपन्यास:।

१६. **'डोडो' तपस्वी**–डोडो नामक: पक्षी योऽद्यत्वे कुत्रापि न प्राप्यते। स खलु मौरीशसे समागतै: हिंसकैर्मानवै: समूलं भक्षित:। अस्य चित्रं मौरीशसे विविधपत्रेषु मुद्राप्यंते।

१७. **चक्रवात:**–Cyclone चक्रवातागमनेऽत्रोत्प्रेक्षा।

१८. **सांस्कृतं मेलनम्**–संस्कृतसम्बन्धि सम्मेलनम्। १९८४ ई० वर्षे मार्चमासस्य १४–१७ तमदिवसेषु समायोजितं यत्र भारतस्य प्रातिनिध्यं कर्तुं त्रिसदस्यीये प्रतिनिधिमण्डले काव्यकर्ताऽपि समुपस्थित:। अपरौ द्वौ सदस्यौ आस्ताम्-भारतसर्वकार शिक्षामन्त्रालये संस्कृतस्योप-परामर्शदाता डा० सी०आर० स्वामिनाथन् श्रीमती कमला रत्नम् च।

१९. **गान्धिसंस्थानप्रेक्षागृहे**–मोकास्थ-महात्मा गांधी संस्थानस्य प्रेक्षागृहे (Auditrioum) यत्र संस्कृतसम्मेलन सम्पन्नम्।

२०. **दामोदरं-रवीन्द्रानिरुद्धारुणान्**–अत्र मुद्रालङ्कार:। कवि विविध देवानप्यत्र साक्षात्कुरुते। अपरञ्च स दामोदरादिपदै: स्वातिथेयबन्धून् सम्मेलनायोजनाकांश्च–श्रीदामोदरतुलसी- वयोवृद्धसाहित्यकार श्रीवासुदेव विष्णुदयाल-श्री उत्तमविष्णुदयाल-श्री पी० हरिनाग-श्रीपरमानन्द रामलखन-शिक्षामन्त्री श्री ए० परशुरामन्-श्री चितलाल रामचरण-श्री सुरेश रामवर्ण- गवर्नर-जनरल डा० सर शिवसागर रामगुलाम (चाचा)- श्री नागराजन्-आचार्य रवीन्द्रनागर-प्रधानमन्त्री डा० अनिरुद्ध- पत्रकार श्री राजेन्द्र अरुण-प्रभृतीनपि संकेतयति।

२१. **मांरुतेर्वैजयन्तीं**–मौरीशसे हिन्दुधर्मावलम्बिनां गृहे 'हनुमान जी की ध्वजा' स्थाप्यते।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

२२. **गङ्गातटाके**–'गङ्गा तालाब' इति स्थाने यत्र प्रतिवर्षं शिवरात्र्युत्सवो राष्ट्रीयस्तरेण सोत्साहं सम्मान्यते।

२३. **स्वस्तिका**–इत्याख्यं 'क्यूर् पिप्'-स्थितं मन्दिरम्। तत्र राष्ट्रीयस्तरेण होलिका सम्मान्यते। लेखकोऽपि १८.३.१९८४ तारिकायां तस्यां सम्मिलितो बभूव।

२४. **प्रेमरागेण**–अत्र श्लेषः। तत्रातितमां लोकप्रियो भारतीयोच्चायुक्तः श्री प्रेमसिंहः स्वस्तिकास्थान् जनान् रागयुक्तजलेन अभिषिक्तानकरोत्। पक्षे–स्नेहरागेण।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.



Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

भारतजनताहम् : अनुक्रमः

क्रमः	शीर्षकं	रचनातिथिः	पृष्ठाङ्कः
१.	भारतजनताहम्	(१५-७-१९८६)	१४१-१५८
२.	वेदवाणीं नुमः	(२८-२-१९९५)	१५९-१६०
३.	धन्वन्तरिं तमीडे	(८-९-१९९१)	१६१
४.	महाकाल-मालिका	(२-३-१९९२)	१६२-१६६
५.	नमः शास्त्रिणे वीरधुर्याय तस्मै	(२-१०-१९६५)	१६७-१६८
६.	उज्जयिनीयं जयति	(३१-११-१९८२)	१६९-१७२
७.	राजस्थानम्	(१३-४-१९८४)	१७३-१७७
८.	अहं स्वतन्त्रता भणामि	(१५-८-१९८३)	१७८-१८२
९.	रौति ते भारतम्	(१२-१०-१९८५)	१८३-१८६
१०.	राष्ट्रदेवते !	(२९-१२-१९८५)	१८७-१८८
११.	फिलाडेल्फिया	(१७-१०-१९८५)	१८९-१९५
१२.	मेघप्रबोधनम्	(५-१०-१९८७)	१९६-१९८
१३.	अकालजलद !	(१३-१५-३-१९८८)	१९९-२००
१४.	स्वागतं पयोद ! ते	(१-१५-७-१९८८)	२०१-२०४

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

क्रमः शीर्षकं	रचनातिथिः	पृष्ठाङ्कः
१५. नेहरुं तं स्मरामो वयं सादरम्	(१४-११-१९८८)	२०५-२०७
१६. जाबालिपुरं चल !	(२२-१२-१९८८)	२०८-२१०
१७. एकं सद्बहुधा विलोक्यते भारतम् !	(३१-१-१९८९)	२११-२१२
१८. उत्तरमङ्गलम्	(१५-१-१९९०)	२१३-२२०
१९. वदत नेतारो मनाक् !	(२९-१०-१९९०)	२२१-२२६
२०. किं जीवनं ते !	(२९-३-१९९१)	२२७-२३०
२१. ब्रूहि जगन्नाथस्वामिन् !	(६-६-१९९१)	२३१-२३२
२२. वन्दनीयास्ते	(१४-१-१९९३)	२३३-२३७
२३. मदीयकविते ! कुरुष्व गानम्	(२६-१२-१९९३)	२३८-२४१
२४. वन्द्यतां कापि सा शासनासन्दिका	(२६-६-१९९५)	२४२-२४४
२५. तं सुभाषं स्मरामो वयं सादरम्	(१०-८-१९९६)	२४५-२४६
२६. तस्य स्मृतिर्विजयते पुरुषोत्तमस्य	(१४-९-१९९६)	२४७-२४९
२७. स्वतन्त्रतायाः स्वर्णजयन्ती	(१५-८-१९९७)	२५०-२५१
२८. लोकतन्त्रेऽस्मिन्	(२०-१-१९९८)	२५२-२५९
२९. भारतस्य विजयोऽयम्	(१६-१२-१९९८)	२६०-२६२
३०. प्रणम्याः कारगिलवीराः	(२६-७-१९९९)	२६३-२६६
३१. योऽयं कृतः शपथस्त्वया	१३-१०-१९९९)	२६७-२७०

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

क्रमः	शीर्षकं	रचनातिथिः	पृष्ठाङ्कः
३२.	भावसन्धिः	(१-१-२०००)	२७१
३३.	त्वं चन्दनमसि हे प्रभो !	(१३-२-२०००)	२७२
३४.	तुरीनोस्मृतिसपादशतकम्	(१२-४-२००)	२७३-३०४
३५.	महाकुम्भे	(१४-१-२००१)	३०५-३०६
३६.	मित्रतां कामये शात्रवं चाश्रये	(१७-७-२००१)	३०७-३०८
३७.	आतंकवादस्य घोरताण्डवः	(१५-१०-२००१)	३०९-३१०
३८.	भारतस्य जनता समीक्षते	(२४-१२-२००१)	३११-३१४
३९.	किं कुर्यात्	(१६-२-२००२)	३१५-३१६
४०.	योऽयमातंकवादः	(१६-२-२००२)	३१५-३१६

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

भारतजनताहम्

(१)

अभिमानधना विनयोपेता
शालीना भारतजनताहम् ।
कुलिशादपि कठिना कुसुमादपि
सुकुमारा भारतजनताहम् ॥

अभिमानधना विनयोपेता
शालीना भारत-जनता मैं ।
वज्र से कठिन कुसुमावलि से
कोमल हूँ भारत-जनता मैं ॥१॥

(२)

निवसामि समस्ते संसारे
मन्ये च कुटुम्बं वसुन्धराम् ।
प्रेयः श्रेयश्च चिनोम्युभयं
सुविवेका भारतजनताहम् ॥

बसती हूँ सारी दुनिया में
मानती धरा को मैं कुटुम्ब ।
चुनती हूँ प्रेय श्रेय दोनों
सुविवेका भारत-जनता मैं ॥२॥

(३)

विज्ञानधनाहं ज्ञानधना
साहित्यकला-संगीतपरा ।
अध्यात्मसुधातटिनी-स्नानैः
परिपूता भारतजनताहम् ॥

विज्ञान-ज्ञान से हूँ समृद्ध
साहित्य-कला-संगीतमयी ।
अध्यात्म सुधा-सरिता मज्जन
से पावन भारत-जनता मैं ॥३॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(४)

प्रस्तरखण्डेषु मयोत्कीर्णा
मूर्तयः सजीवा भाषन्ते ।
दिग्विजयिन्यो मे कलाः सन्ति
सहृदयास्मि भारतजनताहम् ॥
जिसने पत्थर को काट काट
मूर्तियाँ बना डालीं सजीव ।
जिसकी हैं कला विश्वविजयी
वह साधक भारत-जनता मैं ॥४॥

(५)

मम गीतैर्मुग्धं समं जगत्
मम नृत्यैर्मुग्धं समं जगत् ।
मम काव्यैर्मुग्धं समं जगद्
रसभरिता भारतजनताहम् ॥
जिसके गीतों से जगत् मुग्ध
जिसके नृत्यों से जगत् मुग्ध ।
जिसकी कविता से जगत् मुग्ध
वह रसनिधि भारत-जनता मैं ॥५॥

(६)

उत्सवप्रियाहं श्रमप्रिया
पदयात्रा - देशाटन - प्रिया ।
लोकक्रीडासक्ता वर्धे-
ऽतिथिदेवा भारतजनताहम् ॥
उत्सव पदयात्रा देशाटन
श्रम लोक-खेल जिसको प्रिय हैं।
हैं अतिथि देव जिसके निमित्त
वह प्रमुदित भारत-जनता मैं ॥६॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(७)

कल्पनातीतदुःखानां वा
सौख्यानां वापि पराः काष्ठाः ।
समभावतया सोढुं शक्ता
समबुद्धिर्भारतजनताहम् ॥

कल्पनातीत दुख आ जायें
या सुख आयें कल्पनातीत ।
जो इन्हें समान भाव से ही
सह ले वह भारत-जनता मैं ॥७॥

(८)

कृत्वा भूमण्डलपर्यटनं
यं देशं स्वर्गं मनुते ना ।
तस्यैव नृपस्तस्यैव प्रजा
ऋजुचरिता भारतजनताहम् ॥

भूमण्डल के पर्यटन बाद
जिसको कहते हैं लोग स्वर्ग ।
उस भारत की ऋजु प्रजा
और शासक हूँ भारत-जनता मैं ॥८॥

(९)

नाहं भ्रमेऽस्मि नाहं मोहे
विश्वं भ्रान्त्वा तथ्यं वदामि ।
प्रेरणां जगन्मत्तो लभते
धृतिशीला भारतजनताहम् ॥

कोई भ्रम मोह नहीं मुझको
मैं विश्व भ्रमण कर कहती हूँ ।
मुझसे पाता प्रेरणा जगत्
धृतिशीला भारत-जनता मैं ॥९॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(१०)

विश्वस्मिन् जगति गताहमस्मि
विश्वस्मिन् जगति सदा दृश्ये ।
विश्वस्मिन् जगति करोमि कर्म
कर्मण्या भारतजनताहम् ॥

सारी दुनिया में पहुँची हूँ
सारी दुनिया में दिखती हूँ ।
सारे जग में जो करे काम
वह कर्मठ भारत-जनता मैं ॥१०॥

(११)

लंघिताः पर्वताः अवरुद्धा
नद्यः प्रपूरिता जलाशयाः ।
सिक्ता मरवश्च यया बहुधा
महिता सा भारतजनताहम् ॥

लाँघे पर्वत रोकी नदियाँ
भर दिये जलाशय कितने ही ।
जिसने मरुथल सींचे महान्
ऐसी हूँ भारत-जनता मैं ॥११॥

(१२)

किं किं न तपस्तप्तं हि मया
स्वातन्त्र्यदेवताराधनाय ? ।
किं किं न सहे तद्रक्षार्थं
श्रमशीला भारतजनताहम् ॥

स्वातन्त्र्य प्राप्ति के लिए भला
क्या-क्या तप मैंने नहीं किया ?
उसकी रक्षा हित क्या न सहूँ
श्रमशीला भारत-जनता मैं ॥१२॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(१३)

ये मह्यं गालीर्ददुस्तथाऽ-
कुर्वन्नपकारं मम नित्यम् ।
जितवती तानहं तपोबलै-
र्गम्भीरा भारतजनताहम् ॥

गालियाँ जिन्होंने दीं मुझको
एवं अपकार किए मुझ पर ।
अपने तप-बल से विजित उन्हें
करती हूँ भारत-जनता मैं ॥१३॥

(१४)

दारिद्र्यदुःखदावाग्निदग्ध-
देहापि नो म्रिये ह्यद्यावधि ।
साहस-जिजीविषा-कर्मठता-
पुत्तलिका भारतजनताहम् ॥

दारिद्र्य दुःख दावाग्निदग्ध
होकर भी अब तक मरी नहीं ।
साहस जिजीविषा कर्मठता
की पुतली भारत-जनता मैं ॥१४॥

(१५)

दम्भोलिसन्निभा अपि विपदोऽ
नायासमेव सर्वा हि सहे ।
विषपानपरापि स्मितवदना
सर्वंसहभारतजनताहम् ॥

मैं वज्र सदृश विपदाओं को
भी अनायास सह लेती हूँ ।
विष पीकर भी मुसकाती हूँ
सर्वंसह भारत-जनता मैं ॥१५॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(१६)

आयातु यातु लक्ष्मीः स्तुवन्तु
निन्दन्तु नीतिनिपुणाः कामम् ।
उच्चावचमार्गे गच्छन्ती
सोत्साहा भारतजनताहम् ॥

लक्ष्मी आये जाये यथेच्छ
निन्दा, स्तुति करें नीतिवेत्ता ।
ऊँचे नीचे पथ पर बढ़ती
उत्साहित भारत-जनता मैं ॥१६॥

(१७)

अण्वस्त्रनिर्मितिर्नो कठिना
मम कृते तथापि न तामीहे ।
वास्तविकी हेतिरहिंसा मे
निर्भीका भारतजनताहम् ॥

अणुबम निर्माण न कठिन मुझे
फिर भी न चाहती मैं उसको ।
मेरा तो अस्त्र अहिंसा है
निर्भीका भारत-जनता मैं ॥१७॥

(१८)

संगणकयन्त्रजालोऽपि मेऽस्तु
भौतिक्युन्नतिरपि मे तथास्तु ।
जीवनरसश्च मा शुष्को भू-
दितिकामा भारतजनताहम् ॥

संगणक यन्त्र का जाल बिछे
हो भौतिक उन्नति भी परन्तु ।
जीवन का रस सूखे न कभी
यह चाहूँ भारत-जनता मैं ॥१८॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(१९)

आक्रमणं नैव करोमि कदा-
प्याक्रमणं नैव कदापि सहे ।
आर्जवं न मे मूर्खत्वमस्ति
दृढकवचा भारतजनताहम् ॥

आक्रमण नहीं करती, पर मैं
आक्रमण नहीं सहती कदापि ।
ऋजुता मेरी मूर्खता नहीं
दृढकवचा भारत-जनता मैं ॥१९॥

(२०)

मैत्री मे सहजा प्रकृतिरस्ति
नो दुर्बलतायाः पर्यायः ।
मित्रस्य चक्षुषा संसारं
पश्यन्ती भारतजनताहम् ॥

मैत्री मेरी है सहज प्रकृति
दुर्बलता यह न कभी मेरी ।
जो मित्र-दृष्टि से दुनिया को
देखे वह भारत-जनता मैं ॥२०॥

(२१)

ज्वालामुखिनं गिरिमारूढं
परमाणुदैत्यविकलितचित्तम् ।
अधुनापि जगच्छान्तिं ब्रूते
या सैषा भारतजनताहम् ॥

जो ज्वालामुखियों पर बैठे
परमाणुदैत्य-विकलित जग को ।
दे रही शान्ति का सन्देशा
अब भी, वह भारत-जनता मैं ॥२१॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(२२)

विद्वांसो वीराः शिल्पकराः
श्रमिणः सन्तः किं किं न मेऽस्ति ।
स्यादत्र न गृहभेदनपाप-
मितिकामा भारतजनताहम् ॥

विद्वान्, वीर, मजदूर, सन्त,
शिल्पी, कवि ये सब मुझ में हैं।
बस गृह-भेदन का पाप न जो
चाहे वह भारत-जनता मैं ॥२२॥

(२३)

अपि सहे बलात्कारान् हत्या
अपहृतीस्तथा तस्करवृत्तीः ।
नो सहे किन्तु देशस्य भंग-
मुन्निद्रा भारतजनताहम् ॥

चाहे सह जाये बलात्कार
हत्या, अपहरण तथा चोरी ।
पर देश भंग को सहे न जो
वह जागृत भारत-जनता मैं ॥२३॥

(२४)

नग्ना बुभुक्षिता निर्गेहा
सत्यपि जीवामि बहोः कालात् ।
जीविष्यामि च कल्पान्तमहं
मृत्युञ्जय - भारतजनताहम् ॥

नंगी, भूखी, बेघर भी रह
जी रही न जाने कब से हूँ ।
कल्पान्त तलक जीने वाली
मृत्युंजय भारत-जनता मैं ॥२४॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(२५)

जिह्वां मे कीलयितुं शक्तः
कः कोऽत्र जगति मातुर्जातः ।
वाणी विहरति मे सदोज्ज्वला
गर्जन्ती भारतजनताहम् ॥

माई का लाल कौन सा है
जो कील सके मेरी जुबान ।
उज्ज्वल वाणी गर्जन करती
जिसकी वह भारत-जनता मैं ॥२५॥

(२६)

नक्राश्रुजलं जाने सम्यग्
जाने च गृध्रगोमायुगिरम् ।
जाने करटक-दमनक-चरितं
हृदयज्ञा भारतजनताहम् ॥

जो मगरमच्छ के आँसू को
गोमायु-गृध्र की भाषा को ।
करटक-दमनक की चालों को
समझे वह भारत-जनता मैं ॥२६॥

(२७)

तस्करा हिंसका गेहभिदो
मूढाश्च सन्तु मयि यदा कदा ।
ते किन्तु नैव परिभाषा मे
समुदारा भारतजनताहम् ॥

तस्कर, हिंसक, घरफोड़, मूढ़
हों मुझ में बेशक यदा कदा ।
वे मेरी किन्तु न परिभाषा
समुदारा भारत-जनता मैं ॥२७॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(२८)

दृप्तानामंकुशतां भजामि,
नम्राणां रक्षकतां भजामि ।
दुष्टानां शिक्षकतां भजामि
लोकज्ञा भारतजनताहम् ॥

दृप्तों के लिए बनी अंकुश
नम्रों की रक्षक सदा रही ।
दुष्टों को सबक सिखाती हूँ
लोकज्ञा भारत-जनता मैं ॥२८॥

(२९)

शासनासन्दिकामधिरोढुं
प्रतिनिधयो मे कुर्वन्ति न किम् ?
तां प्राप्य केऽपि यां विस्मरन्ति
मुग्धा सा भारतजनताहम् ॥

शासन की गद्दी पाने को
मेरे प्रतिनिधि क्या क्या न करें ?
पा उसे भूलते जिसको कुछ
वह भोली भारत-जनता मैं ॥२९॥

(३०)

मुग्धा त्वहमस्मि परं दृप्तान्
लेहयामि धूलिं निजौजसा ।
जनतन्त्रपद्धतेर्गुडाकेश-
गोप्त्री खलु भारतजनताहम् ॥

भोली तो हूँ पर प्रजातन्त्र
की रक्षक हूँ मैं गुडाकेश ।
दर्पी को धूल चटाती हूँ
समयज्ञा भारत-जनता मैं ॥३०॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(३१)

भारतभूमेरुत्पन्नाह-
मस्याञ्च विलीये सामोदम् ।
सेविष्ये ह्येनामाजीवन-
मतिहृष्टा भारतजनताहम् ॥

भारतभू से उत्पन्न हुई
इसमें विलीन हो जाऊँगी।
आजीवन इसकी सेवा से
अतिहृष्टा भारत-जनता मैं ॥३१॥

(३२)

मोदे प्रगतिं दर्शं दर्शं
वैज्ञानिकीं च भौतिकीं, परम् ।
दूयेऽद्यत्वे लोकं लोकं
शठचरितं भारतजनताहम् ॥

इसकी वैज्ञानिक औ' भौतिक
उन्नति विलोक मैं हूँ प्रसन्न ।
पर देख आज की शठ-लीला
दुःखित हूँ भारत-जनता मैं ॥३२॥

(३३)

दारिद्र्यं वृत्तेर्न्यूनत्वं
सर्वमप्युपेक्षे काममहम् ।
नोपेक्षे किन्तु सतां पीडां
करुणार्द्रा भारतजनताहम् ॥

बेरोजगार दुःखी दरिद्र
लोगों को तो सह भी लूँ मैं ।
पर सज्जन की पीड़ा न सहूँ
करुणार्द्रा भारत-जनता मैं ॥३३॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(३४)

आचरति दुर्जनो नीचकर्म
यत्तत्सर्वं जाने, जाने ।
प्राप्नोमि तथापि न निष्ठुरतां
करुणार्द्रा भारतजनताहम् ॥

दुर्जन जो खोटे कर्म करे
जानती उसे मैं भली भाँति ।
फिर भी मैं निष्ठुर नहीं क्योंकि
करुणार्द्रा भारत-जनता मैं ॥३४॥

(३५)

देशे निरागसां संहारं,
लुण्ठनं सतां च वधूदाहान् ।
श्रावं श्रावं दर्शं दर्शं
व्यथमाना भारतजनताहम् ॥

निर्दोषों का संहार देख
सज्जन को लुटता देख देख ।
गृहवधू-दाह को सुन पढ़ लख
व्यथिता हूँ भारत-जनता मैं ॥३५॥

(३६)

पश्यामि यदा कुटिलैः क्लृप्तां
मूढैश्च तां विघटनसरणिम् ।
विलपामि तदा खिन्ना खिन्ना,
चिन्ताकुलभारतजनताहम् ॥

जब भी मैं कुटिल और मूढ़ों
की विघटनलीला लखती हूँ ।
तब खिन्न हृदय से रोती हूँ
चिन्ताकुल भारत-जनता मैं ॥३६॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(३७)

अभिसन्धि-धार्मिकोन्माद-भैक्ष्य-
शारीरपण्य-मिश्रणदोषैः ।
अस्वास्थ्यकरैश्च प्रदूषणै-
रतिविकला भारतजनताहम् ॥

षड्यंत्र, धार्मिकोन्माद, भीख,
वपु-विक्रय अपमिश्रण विलोक ।
रोगों का हेतु प्रदूषण लख
व्याकुल हूँ भारत-जनता मैं ।।३७।।

(३८)

पश्यामि यदा मलिनां गंगां
सरितोऽन्या अग्निमथोद्गिरतीः।
तासां पवित्रतां शीतलतां
चेच्छन्ती भारतजनताहम् ॥

हो मलिन नहीं गंगा मेरी
सरिताएँ उगलें नहीं आग ।
उनकी पावनता शीतलता
नित माँगूँ भारत-जनता मैं ।।३८।।

(३९)

स्वीयैरपराधैः ह्रीणाहं
स्वीयैर्दोषैरतिखिन्नाहम् ।
एकतां कामये नित्यं स्वां
जगदीश्वर ! भारतजनताहम् ॥

वैसे अपने अपराधों से
अपने दोषों से लज्जित हूँ ।
एकता चाहती हूँ अपनी
जगदीश्वर ! भारत-जनता मैं ।।३९।।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(४०)

युवकात्मघात - मादकपदार्थ-
सेवनोत्कोच - दुर्बलघाताः ।
नो सन्तु मदीये देशेऽस्मि-
न्निति कामा भारतजनताहम् ॥

युवकात्मघात, मादक पदार्थ-
सेवन उत्कोच गरीबमार ।
भारत में कहीं नहीं होवें
यह चाहूँ भारत-जनता मैं ॥४०॥

(४१)

अविरुद्धान् वापि विरुद्धान् वा-
प्येकस्मिन् सूत्रे स्थापयितुम् ।
किं किं न मया क्रियते लोके
यत्नस्था भारतजनताहम् ॥

अविरुद्धों या कि विरुद्धों को
माला के फूल बनाने को ।
क्या क्या न कर रही हूँ प्रयत्न
यत्नोन्मुख भारत-जनता मैं ॥४१॥

(४२)

ये दृश्या मयि दोषा नैकेऽ-
रुन्तुदा अवाच्याः कष्टकराः ।
कामये विलोपं वै तेषा-
मतिशीघ्रं भारतजनताहम् ॥

मर्मान्तक कष्टप्रद अवाच्य
जो मुझ में दोष दिखाई दें ।
उनका हो अति ही शीघ्र लोप
यह चाहूँ भारत-जनता मैं ॥४२॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(४३)

आक्रमिणो लुण्ठक-संघाता
आगता येऽपि मयि गता लयम् ।
विविधाप्येका विलसामि सदा
बहुवर्णा भारतजनताहम् ॥

हमलावर और लुटेरे भी
मुझ में आकर हो गये लीन ।
होकर अनेक भी एक रहूँ
बहुवर्णा भारत-जनता मैं ॥४३॥

(४४)

अभितः परितः समया निकषा
मां यद्घटते तत्प्रेक्षेऽहम् ।
सर्वस्य कृते खलु सज्जा या-
सावहिता भारतजनताहम् ॥

आगे पीछे दायें बायें
सब ओर घट रहा जो कुछ भी ।
सबके प्रति रहती सावधान
दृढकवचा भारत-जनता मैं ॥४४॥

(४५)

सागरे वियति धरणीपृष्ठे
भूधरशृंगेषु वनेषु मरौ ।
निजमातृभूमिरक्षणदक्षा
जितनिद्रा भारतजनताहम् ॥

जल में, थल में, नभ में, वन में
पर्वत शिखरों पर मरुस्थल में ।
निज मातृभूमि की रक्षा हित
नित तत्पर भारत-जनता मैं ॥४५॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(४६)

क्षेत्रेषु खलेषु तथा चैवम्
उद्योगगृहेषु कुटीरेषु ।
नित्यं समृद्धिमुत्पादयामि
निस्तन्द्रा भारतजनताहम् ॥

खेतों में या खलिहानों में
चटकल-उद्योग-निकेतों में ।
उत्पादित करती हूँ समृद्धि
निस्तन्द्रा भारत-जनता मैं ॥४६॥

(४७)

नेतृणां वार्तां नो करोमि
निजवार्तामेव परं भणामि ।
आराध्यदैवतं मे भारत-
माराधक - भारतजनताहम् ॥

नेताओं की करती न बात
बातें मैं अपनी कहती हूँ ।
भारत मेरा आराध्य और
आराधक भारत-जनता मैं ॥४७॥

(४८)

किं किं स्मरामि किं विस्मरामि,
किं किं लिखामि किं किं पठामि !
किं वा गायामि निजां गाथाम्
अविकत्थनभारतजनताहम् ॥

क्या याद करूँ क्या क्या भूलूँ
क्या लिखूँ और क्या पढ़ूं भला ।
अथवा क्या गाऊँ निज गाथा
अविकत्थन भारत-जनता मैं ॥४८॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(४९)

जलबुद्बुदसंकाशाः कति नो
संस्कृतयो लुप्ताः संसारे ।
गंगाप्रवाह इव सनातनी
गतिशीला भारतजनताहम् ॥

दुनिया की कितनी संस्कृतियाँ
खो गयीं बुदबुदों सी परन्तु ।
गंगा प्रवाह सी सनातनी
गतिशीला भारत-जनता मैं ॥४९॥

(५०)

अथवा किं बहुना रमाकान्त ?
संक्षिप्ततया तथ्यं भणामि ।
हरिमेव जगज्जगदेव हरिं
पश्यन्ती भारतजनताहम् ॥

अब अधिक कहूँ क्या "रमाकान्त"
थोड़े में सब कह देती हूँ।
जो हरि में जग, जग में ही हरि
देखे वह भारत-जनता मैं ॥५०॥

(५१)

परतन्त्रो मा भूत्क्वापि कोऽपि
सर्वः सर्वत्र सदा नन्दतु ।
जगतः स्वतन्त्रतामिच्छन्ती
मोदे खलु भारतजनताहम् ॥

परतन्त्र न कोई कहीं रहे
सर्वत्र सदा सब रहें मुदित ।
जग की स्वतन्त्रता जो चाहे
वह प्रमुदित भारत-जनता मैं ॥५१॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(५२)

रथ-रमाकान्त-राजेन्द्रमिश्र-
कवितालहरीः पायं पायम् ।
विस्मरति सुधाधारामपि या
रसिका सा भारतजनताहम् ॥

रथ-रमाकान्त-राजेन्द्रमिश्र
की कविता लहरी को पी कर ।
जो अमृतपान को गिने न कुछ
वो रसिका भारत जनता मैं ॥५२॥

(५३)

यत्कथितमस्ति तत्सत्यमस्ति
अपि कश्चित्तन्मिथ्याकरोति ?
श्रद्धेयं वचनं व्याहरामि
प्रामाणिकभारतजनताहम् ॥

जो कहा सभी सच है, बोलो
कोई झुठलायेगा इसको ?
श्रद्धेय वचन ही कहती हूँ
प्रामाणिक भारत-जनता मैं ॥५३॥

(रचनातिथिः १५-७-१९८६-विस्तारकालः १५-७-१९९२ यावत्)

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

वेदवाणीं नुमः

पश्य देवस्य काव्यं यदास्तेऽमृतं
यज्जराबाधितं नो भवेज्जातुचित् ।
अस्य संज्ञास्ति वेदः, सदा पावनीं
वेदवाणीं नुमो वेदवाणीं नुमः ॥१॥

नैव पश्येदभद्रं नरश्चक्षुषा
नैव चाकर्णयेद्वाप्यभद्रं क्वचित् ।
भावनेयं यदीयास्ति तां पावनीं
वेदवाणीं नुमो वेदवाणीं नुमः ॥२॥

अन्तरिक्षद्युवारिक्षमासु ध्रुवं
शान्तिसाम्राज्यमास्तां सदा राजितम् ।
कामनेयं यदीयास्ति तां पावनीं
वेदवाणीं नुमो वेदवाणीं नुमः ॥३॥

स्याम ऐक्यस्थिताः, संवदध्वं समे
मानसं शैवसंकल्पपूतं भवेत् ।
प्रेरणेयं यदीयास्ति तां पावनीं
वेदवाणीं नुमो वेदवाणीं नुमः ॥४॥

अस्ति माता मदीया धरेयं तथै-
वास्म्यहं तत्सुतस्तत्सपर्यापरः ।
घोषणेयं यदीयास्ति तां पावनीं
वेदवाणीं नुमो वेदवाणीं नुमः ॥५॥

राष्ट्रमास्तां सुपुष्टं समृद्धं सदा
त्यागभोगौ सखायौ भवेतां तथा ।
देशनेयं यदीयास्ति तां पावनीं
वेदवाणीं नुमो वेदवाणीं नुमः ॥६॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

वारिवाहः सुकाले समागच्छतात्
सन्तु गावश्च पुष्टाः समस्तास्तथा ।
मार्गणेयं यदीयास्ति तां पावनीं
वेदवाणीं नुमो वेदवाणीं नुमः ॥७॥

'मा जलानां तरूणां च हिंसा कुरु'
'द्यूतखेलां परित्यज्य कर्षं कुरु ।'
मानवं या दिशन्ती, श्रुतिं तां मुदा
वेदवाणीं नुमो वेदवाणीं नुमः ॥८॥

कर्म कुर्वञ्छताब्दो नरो जीवतात्
स्वस्ति पन्था भवेत्प्राणिनां सर्वदा ।
ईदृशीं स्वस्थदृष्टिं दिशन्तीं नृणां
वेदवाणीं नुमो वेदवाणीं नुमः ॥९॥

'नैकधर्मास्तथानेकवाचो नरा
मातरं भूमिमेनां सदा रक्षत ।'
राष्ट्रियां वैश्विकीमेकतां तन्वतीं
वेदवाणीं नुमो वेदवाणीं नुमः ॥१०॥

(रचनातिथिः २८-२-१९९५)

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

धन्वन्तरिं तमीडे

आविर्बभूव योऽब्धेरमृतं घटे दधानः ।
पातुं जनानपथ्याद् धन्वन्तरिं तमीडे ॥१॥

विष्णुस्वरूप आयुर्वेदस्य योऽस्ति कर्ता ।
भगवन्तमम्बुजाक्षं धन्वन्तरिं तमीडे ॥२॥

आद्यं शरीरमास्ते धर्मस्य साधनं यत् ।
तद्रक्षितुं दिशति यो धन्वन्तरिं तमीडे ॥३॥

चरकाय सुश्रुताय प्रथिताय वाग्भटाय ।
यः प्रेरणां प्रदत्ते धन्वन्तरिं तमीडे ॥४॥

अद्यापि यस्य भक्ता अष्टाङ्गमाचरन्तः ।
स्वस्थं जगद्विदधते धन्वन्तरिं तमीडे ॥५॥

'सर्वे भवन्तु सुखिनः, सर्वे निरामयाः स्युः'।
इयमस्ति यस्य कांक्षा धन्वन्तरिं तमीडे ॥६॥

(रचनातिथिः ८-९-१९९१)

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

महाकाल-मालिका

(स्तोत्रम्)

श्रीमहादेव शम्भो जय जय ।
देवाधिदेव शम्भो जय जय ॥

जय साम्बसदाशिव शम्भो जय ।
जय चन्द्रमौलि-परमेश्वर जय ।
कैलाशपते पार्वतीपते
जय जगत्पते शंकर जय ।
श्रीमहादेव शम्भो जय जय ॥

जय शिव हर मृड भव रुद्र भीम
पितृसद्मनिलय पशुपतेऽसीम ।
जय महादेव जय विरूपाक्ष
ईशान महेश्वर जय जय जय ॥
श्रीमहादेव शम्भो जय जय ॥

जय सोमनाथ शम्भो जय जय
मल्लिकार्जुन प्रभुवर जय जय ।
जय वन्द्य शर्व जगदीश्वर जय
ओंकारेश्वर रामेश्वर जय ॥
श्रीमहादेव शम्भो जय जय ॥

हे त्र्यम्बकेश केदारनाथ
जय घुष्मेश्वर जयदमरनाथ ।
जय मदनदहन हे त्रिपुरदहन
जय पापदहन त्रिनयन जय जय ॥
श्रीमहादेव शम्भो जय जय ॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

जय गंगाधर जय पार्वतीश
जय नीलकण्ठ जय जय गिरीश ।
जय भूतेश्वर जय सिद्धेश्वर
जय विश्वेश्वर भुवनेश्वर जय ॥
श्रीमहादेव शम्भो जय जय ॥

एकलिंग जय लिंगराज जय
स्थाण्वीश्वर जय नञ्जनगुड जय ।
जय गौरीशंकर जय जय जय
जय लोहितनील दिगम्बर जय॥
श्रीमहादेव शम्भो जय जय ॥

त्रिपुटीश मतंगेश्वर महेश
जय गुह्यकेश जय नन्दिकेश ।
जय महाबलेश्वर धारेश्वर
ममलेश वटेश्वर जय जय जय ॥
श्रीमहादेव शम्भो जय जय ॥

नटराज चिदम्बर गरलाशन
जय घण्टार्कर्णदुःखनाशन ।
भस्मासुरवाणादिवरद जय
जय मार्कण्डेय-कृपाकर जय ॥
श्रीमहादेव शम्भो जय जय ॥

जय हे त्रिमूर्ति-दक्षिणेश जय
नित्यान्धकरिपु-नर्मदेश जय ।
अचलेश्वर जय गोपेश्वर जय
गौरीश गणेश्वर जय जय जय ॥
श्रीमहादेव शम्भो जय जय ॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

जय वृषवाहन गजवदनतात
गिरिजाधव हे षड्वदनतात ।
नागेन्द्रहार भस्मांगराग
मणिकर्णिकेश हर हर जय जय ॥
श्रीमहादेव शम्भो जय जय ॥

जय काशी-विश्वनाथ जय जय
जय प्रलयंकर शंकर जय जय ।
जय ताण्डवकर जय विश्वरूप
नागेश नटेश्वर हरिहर जय ॥
श्रीमहादेव शम्भो जय जय ॥

अष्टमूर्ति जय जय पिनाकधर
जय वृषभध्वज जय त्रिशूलधर ।
जय डमरूद्वेलन नृत्यप्रिय
कैलासशिखरवासिन् जय जय ॥
श्रीमहादेव शम्भो जय जय ॥

विद्याप्रसूति-देवाधिनाथ
रतिवरदायक जय भूतनाथ ।
निर्वाणरूप वेदस्वरूप
अज ! अनन्त! जय निर्गुण जय जय ॥
श्रीमहादेव शम्भो जय जय ॥

जय रावण-रामचन्द्र-पूजित
जय परशुराम-कुम्भज-पूजित ।
सुरनरमुनिकिन्नरदेववन्द्य
उरगासुरभूतवन्द्य जय जय ॥
श्रीमहादेव शम्भो जय जय ॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

शितिकण्ठ शिवाप्रिय नागान्तक
शशिशेखर दक्षयज्ञनाशक ।
जय जय कपालमालाभूषित
जय परमघोर जय मृत्युंजय ॥
श्रीमहादेव शम्भो जय जय ॥

पंचानन योगिन् नन्दीश्वर
सूर्याग्निचन्द्रलोचन ईश्वर ।
श्रीकण्ठ भर्ग धूर्जटे विभो
स्वरमय सर्वज्ञ सामप्रिय जय ॥
श्रीमहादेव शम्भो जय जय ॥

वेदान्तसारसन्दोह जप्य
हे व्योमकेश हे विमलोदय
जय खण्डपरशु-हर वृषाकपे
गोपते गोप्तृसर्वेश्वर जय ॥
श्रीमहादेव शम्भो जय जय ॥

उग्रेश मयोभव शंकर जय
विश्वेश मयस्कर शिवतर जय ।
त्र्यम्बक सुगन्धि-पुष्टिप्रद जय
त्वं कर्ता भर्ता हर्ता, जय ॥
श्रीमहादेव शम्भो जय जय ॥

पार्वतीतपस्याक्रीतदास
मेना-नगपति-पुण्यप्रकाश ।
जडचेतनमय हे प्रमथनाथ
जय निष्कल सकल निरंजन जय ॥
श्रीमहादेव शम्भो जय जय ॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

दिक्कालाद्यनववच्छिन्नरूप
जय हे ब्रह्मानन्दस्वरूप ।
जय निराकार जय भक्तवरद
लोकेश रमाकान्तप्रिय जय ।
श्रीमहादेव शम्भो जय जय ॥

विश्वात्मन् भवते नमो नमः
हे महाकाल ! ते नमो नमः
अक्षरमालां स्वीकुरु भगवन् !
सच्चिदानन्द हे ज्योतिर्मय ।
श्रीमहादेव शम्भो जय जय ॥

इति नवदिल्लीस्थवाणीविहारवासिश्रीरमाकान्तशुक्लप्रणीतं भास्कराचार्यसंस्कृतं 'महाकाल-मालिका' नाम स्तोत्रं सम्पूर्णम्। पठतां शृण्वतां च शुभमस्तु ।

(रचनातिथिः शिवरात्रिः १९९२)

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

नमः शास्त्रिणे वीरधुर्याय तस्मै

यमालोक्य लोकस्य सेवासु सक्तं
सदा मातृभूमिः प्रसन्ना बभूव ।
व्यधाद् यः समस्तं जनौघं स्वभक्तं
नमः शास्त्रिणे वीरधुर्याय तस्मै॥१॥

सदा यस्य वक्तृत्वपीयूषधारां
निपीयाऽभवन् देशभक्ता अमर्त्याः ।
अभूवंश्च शत्रोः कृते ते कृतान्ताः
नमः शास्त्रिणे वीरधुर्याय तस्मै॥२॥

सदा कर्षकैर्मन्त्रदो यः प्रतीतो
गृहीतो भटैर्यः समुत्साहपुञ्जः ।
मतः शान्तिकामैश्च यः शान्तिदूतो
नमः शास्त्रिणे वीरधुर्याय तस्मै॥३॥

न मम्लौ यदीयं मुखं निःस्वतायाम्
प्रसन्नं न चित्तञ्च मन्त्रित्वलाभे।
सदा कर्मठो यः स्थितप्रज्ञ आसी-
न्नमः शास्त्रिणे वीरधुर्याय तस्मै॥४॥

सदा सञ्चितं येन वृत्तं न वित्तम्
सदा स्वीकृतं चार्जवं नैव दैन्यम् ।
प्रियं यस्य कार्यं न चैव प्रभुत्वम्
नमः शास्त्रिणे वीरधुर्याय तस्मै॥५॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

दृढं यन्मनो वज्रराशिं बभार
कृशं यच्छरीरं हिमाद्रिं दधार।
बलिञ्चाकरोज्जीवनं यो जनन्यै
नमः शास्त्रिणे वीरधुर्याय तस्मै ॥६॥

(रचनातिथिः २-१०-१९६५)

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

उज्जयिनीयं जयति

क्षणमपि दृष्टा यालोकयितुर्जातु जहाति न चित्तम् ।
उज्जयिनीयं जयति विशाला बुधजनवन्द्या नित्यम् ॥
उज्जयिनीयं जयति विशाला कविगणवन्द्या नित्यम् ॥

(१)

उद्घाटयति निजं हृदयं ब्रूते निजकथा अतीताः
श्याममृत्तिका स्पृष्टा प्रेम्णा यस्या लोकातीता ।
कालिदास-शूद्रक-विक्रम-वेताल-विलक्षणघटनाः
कविकुलवर्णितविविधदेशवस्तूच्चयरीतिविरचनाः ॥

प्रत्यक्षं तनुते मानसमोदाय समेषां सततम्
उज्जयिनीयं जयति विशाला बुधजनवन्द्या नित्यम् ॥

(२)

उदयनवासवदत्ता-सेनाचारुदत्त-कल-गाथाः
केकित्रासककबरीभाराः सुरभिलधूपसनाथाः ।
लोलापाङ्गैर्लसितास्तन्व्यः श्यामा मध्ये क्षामाः
श्रोणीभाराद्विलसितगमनाः तन्त्रीवादनकामाः ॥

पदे पदे साक्षात्क्रियन्ते यत्र सहृदयैर्नित्यम् ।
उज्जयिनीयं जयति विशाला बुधजनवन्द्या नित्यम् ॥

(३)

हारास्तारास्तरला गुटिका भाण्डसमूहा भव्याः
पुष्पस्तबकाः शेखरहारा माला नव्या नव्याः ।
शिप्रावाताः कविसंघाता महाकालशिवभक्ताः
शास्त्रकाव्यनाटकसंगीतानां गोष्ठीष्वनुरक्ताः ॥

यत्राद्याप्यविरतं हरन्ति प्रेक्षावतां सुचित्तम्।
उज्जयिनीयं जयति विशाला बुधजनवन्द्या नित्यम् ॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(४)

अत्रैवाभिरूपभूयिष्ठा विक्रमपरिषत् शुशुभे
या कविकालिदासकृतनाटकवीक्षणाय खलु लुलुभे ।
अत्रैवापरितोषाद्विदुषां कविना यत्लोऽकारि
वाणो विजहारात्र निश्चितं सहृदयहृदयविहारी ॥
अत्रागत्य जायते चित्तं शिवं सुन्दरं सत्यम् ।
उज्जयिनीयं जयति विशाला बुधजनवन्द्या नित्यम् ॥

(५)

शिप्रास्नानं यत्र धर्मिणः कलिमलदारणनिपुणम्
अर्थकामिनो विपणिविभागं नानापण्यसुपूर्णम् ।
कामकामिनोऽभिमतं स्थानं नवलविलासोल्लसितम्
मोक्षार्थिनो महाकालेशं ज्योतिर्लिङ्गं प्रथितम् ।
क्षीरसागर[१] यान्ति च रसिका नद्यो यथा समुद्रम् ।
उज्जयिनीयं जयति विशाला बुधजनवन्द्या नित्यम् ॥

(६)

'चल चल भामिनि चल सिंहस्थं द्वादशवर्षैर्लब्धम्'
'चल गजगामिनि कार्तिकमेलाक्षेत्रं कौतुकलुब्धम् ।'
'चल मूढे क्रीणामि सुमाल्यं मालीपुरे त्वदर्थम्'
'अहो श्रूयते कार्तिकमासे शृणु शृणु कोकिलविरुतम्'॥
यत्रेत्थं चाटूयति रमणो दयितानिर्दयचित्तम् ।
उज्जयिनीयं जयति विशाला बुधजनवन्द्या नित्यम् ॥

(७)

प्रतिवर्षं खलु यस्याः शिप्रातीरे विचलितधीरे
'माच'दर्शनोत्सुकैर्मालवैः मेलाशीतसमीरे ।
अविदितगतयामा रजनी नीयतेतरां निश्चिन्तम्
झंझावाते घनघनवर्षे वापि शीतले नीरे ॥
अहो मधुरिमा, अहो प्रमोदो यस्या अतुलो नित्यम् ।
उज्जयिनीयं जयति विशाला बुधजनवन्द्या नित्यम् ॥

---

१. क्षीरसागरनामकं कालिदाससमारोहाङ्गभूतसांस्कृतिककार्यक्रमायोजन-स्थानम्।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(८)

रविकरचुम्बितकमलविकासैः मदकलसारसनादैः
मालविकानां सुमधुरहासैः विबुधशिरोमणिवादैः ।
देवोत्थानवह्निखेलाभिर्नवनवदीपविलासैः
भैरवगढमुद्रितवस्त्राणां चेतोहरैः सुहासैः ॥

बालवृद्धयूनां परिहासैर्या जयति जगच्चितम् ।
उज्जयिनीयं जयति विशाला बुधजनवन्द्या नित्यम् ॥

(९)

चमरपुच्छिका²खण्डितकन्दुक³कुसुममनोहरवर्षैः
कविकविताप्रस्तुतिवेलायां सहृदयसुहृदां हर्षैः ।
अतिथीनां विदुषां सचेतसां सुमनोरथचंक्रमणैः
व्याससमासरीतिवक्तव्यैः भावानां संक्रमणैः ।
कीर्तिमन्दिरं भाति हि यस्याः कालिदासमहमहितम्
उज्जयिनीयं जयति विशाला बुधजनवन्द्या नित्यम् ॥

(१०)

पक्षप्रहारैश्चंचुश्लेषैः गुटरगुटरगूंकारैः
मानैरनुधावनैरथो मदनाज्ञापालनचारैः ।
द्वाभ्यां तथा तृतीयस्योत्सारणैर्यत्र निःशुल्कं
अश्मभ्योऽपि हि प्रेमकलामुपदिशति कपोतसमूहः ॥

विक्रमकीर्तिमन्दिरं तद्यस्या अक्षय्यं वित्तम् ।
उज्जयिनीयं जयति विशाला बुधजनवन्द्या नित्यम् ॥

---

२. 'गिलंहरी' इति हिन्द्याम् ।

३. 'गेंदा' इति हिन्द्याम् ।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(११)

हरसिद्धिं योगेश्वरसदनं मङ्गलनाथं रम्यं
भर्तृहरेर्गह्वरं, चाश्रमं सान्दीपनेः पवित्रम् ।
ज्येष्ठगणेशं, पञ्चमुखं हनुमन्तं भवभयहरणम्
दर्शनीयमथ नानातत्त्वं यस्यां विस्मयकरणम् ॥

वीक्ष्य भवति नहि कस्य मनो वद श्रद्धा-विस्मयभरितम् ।
उज्जयिनीयं जयति विशाला बुधजनवन्द्या नित्यम् ॥

(१२)

यत्रागत्य निवर्तितुमिच्छति नैवागन्तुकलोकः
श्रावं श्रावं यस्या गाथां तृप्तिं याति न लोकः ।
स्मारं स्मारं यस्या विभवं भवति विस्मितो लोकः
पेयं पेयं यस्या शोभां माद्यति सर्वो लोकः ।
यस्या विरहो जनयति मोहं, व्यथयति दृढमपि चित्तम्।
उज्जयिनीयं जयति विशाला बुधजनवन्द्या नित्यम् ॥

(१३)

विहरति विहसति विलसति नृत्यति या मानसे न केषाम्?
सुखयति मदयति रमयति रसयति या मानसं न केषाम् ?
सरला सरसा मुग्धोदारा या राजते समेषाम् ।
शुभदा सुखदा वरदादरदा या राजते समेषाम् ।
सर्वशुक्लया वाग्देव्या खलु यत्र समोदं हसितम् ॥
उज्जयिनीयं जयति विशाला बुधजनवन्द्या नित्यम् ॥१३॥

(रचनातिथिः ३१-११-१९८२, उज्जयिन्याम्)

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

राजस्थानम्

यद्विदुषां वीराणां धनिनां श्रमिकाणां च निधानम् ।
जयति मनोज्ञं ललामं राज्य तदिदं राजस्थानम् ॥

(१)

शिलादेवि - गलताजी - बालाजी - श्रीनाथद्वारैः ।
एकलिङ्ग - पुष्कर - कौलायत - करणी - रामद्वारैः ॥
रामधाम - रणछोड़ - साँभरा - सर्वेश्वर - जयकारैः ।
श्रीद्वारकाधीश - लोहार्गल - प्रभृतितीर्थपरिवारैः ॥
त्रिविधतापतप्तेभ्यो नित्यं यद्ददाति शमदानम् ।
जयति मनोज्ञं लसति ललामं तदिदं राजस्थानम् ॥

(२)

बप्पारावल - राणासाँगा - गोरा - बादल - वीरैः ।
सिंहप्रताप - सदृशरणवीरैः सन्धापालनधीरैः ॥
दुर्गावती - पद्मिनी - हाडीरानी - विश्रुतवृत्तैः ।
अङ्गीकृतसुव्रतजौहरनारीणां दिव्यसुचरितैः ॥
यद्विदधाति जगज्जनतायाश्चारित्रस्योत्थानम् ।
जयति मनोज्ञं लसति ललामं तदिदं राजस्थानम् ॥

(३)

डिङ्गल - पिङ्गल - वयणसगाई - काष्ठपुत्तलीनृत्यैः ।
रत्नपरीक्षा - प्रस्तरखण्डन - ढोला - मारू - वृत्तैः ॥
अणुविस्फोटपरीक्षण - पुस्तकभाण्डाराणुविकासैः ।
आर्हत - वैदिक - धर्मप्रचारैर्विविधकलानां हासैः ॥
यद्ददाति तैस्तैश्च विशेषैर्निजवैभवप्रमाणम् ।
जयति मनोज्ञं लसति ललामं तदिदं राजस्थानम् ॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(४)

तप्ते यन्मरुदेशे मधुरा 'मत्तीराः' रसपूर्णाः ।
यस्य 'राबड़ी' लोकप्रसिद्धा आस्वादैरापूर्णा ॥
यन्मरुभाषाबद्धवाङ्मयं शोधकमोदविधायि ।
दुग्धसारशष्कुलीसेवनं यस्य च तृप्तिविधायि ॥
यन्मालिन्या बीकानेर्याः सिद्धं तुलाविधानम् ।
जयति मनोज्ञं लसति ललामं तदिदं राजस्थानम् ॥

(५)

'अस्मि प्रेमप्रमत्ताहं मम पीडां वेद न कश्चित्' ।
'गिरिधरपुरतो नर्तिष्यामि रोत्स्यति मां नहि कश्चित्' ॥
'मम तु केवलं गिरिधरगोपो नान्यः कोऽपि जगत्याम्' ।
इत्येवं वचसा मनसा कर्मणा रताया भक्त्याम् ॥
अमृतं कृत्वा विषं पिबन्त्या यन्मीरायाः स्थानम् ।
जयति मनोज्ञं लसति ललामं तदिदं राजस्थानम् ॥

(६)

घघरा - कञ्चुक, बिन्दुशाटिका - गोटावृतवसनानाम् ।
कटक-बोरला-नूपुर-नथली-वलयाङ्गद-रशनानाम् ॥
टड्डे - वाटे - बँगड़ी - कंगन-चूड़ा - हथफूलानाम् ।
टीका-झुमका-हँसली-टिकली-कटिका-रमझोलानाम् ॥
विच्छित्त्या भरितं यत्तनुते चारुत्वस्य वितानम् ।
जयति मनोज्ञं लसति ललामं तदिदं राजस्थानम् ॥

(७)

कज्जलकलितललितनयनानां मँहदीरक्तकराणाम् ।
धृतविविधाभूषणवसनानां लोकरीतिपरकाणाम् ॥
दूर्वालङ्कृतकरकमलानामर्चनगीतपराणाम् ।
बालानां सौभाग्यवतीनां धृतमस्तककलशानाम् ॥
उपचारैर्विविधैर्विलसति यस्मिन् गणगौरविधानम् ।
जयति मनोज्ञं लसति ललामं तदिदं राजस्थानम् ॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(८)

मुरकी - कमरी - पगड़ी - धोती - धौड़ीपादत्राणैः ।
लसिता यस्य जना शोभन्ते नित्यं श्मश्रूत्थानैः ॥
अश्मखण्डने मूर्तिविरचने शोभनगृहनिर्माणे ।
यस्य श्रमिका नित्यं निरता मार्गाणां च विधाने ॥
प्रकृतिकोपदलिता अपि नित्यं विदधति देशोत्थानम् ।
जयति मनोज्ञं लसति ललामं तदिदं राजस्थानम् ॥

(९)

गिरिधरशर्मचतुर्वेदोपमविद्वद्रत्नैर्लसितम् ।
मञ्जुनाथमथुरानाथोपमकविवरवैभवलसितम् ॥
बाँकीदास - सूर्यमल्लागरचन्दयशोभिर्लसितम् ।
काँकर- झाबरमल्ल-सबा-रांगेय-गुलेरी-लसितम् ॥
विद्याधरमहितं यद् धत्ते ज्ञानमथो विज्ञानम् ।
जयति मनोज्ञं लसति ललामं तदिदं राजस्थानम् ॥

(१०)

हल्दीघाटी - चेतकशौर्यं स्मारं स्मारं यस्य ।
अर्बुदलोकोत्तरसौन्दर्यं दर्शं दर्शं यस्य ॥
अगणितवीराणां कलगाथाः श्रावं श्रावं यस्य ।
अभिनवकुल्याजलसञ्चारं लोकं लोकं यस्य ॥
अवसन्नस्यापि जनस्य मनो लभतेऽद्भुतमुत्थानम् ।
जयति गनोज्ञं लसति ललामं तदिदं राजस्थानम् ॥

(११)

क्षणे क्षणे या नवतां धत्ते कणे कणे कलगानम् ।
गृहे गृहे या कमलां धत्ते पदे पदे सम्मानम् ॥
दिनं दिनं या पर्व विधत्ते जनं जनं सोल्लासम् ।
नयने नयने लीलां धत्तेऽधरेऽधरे च सुहासम् ॥
एवंभूता पाटलनगरी यस्यानन्दनिधानम् ।
जयति मनोज्ञं लसति ललामं तदिदं राजस्थानम् ॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(१२)

पवनप्रासादेन[१] वैद्यविदुषां नैपुण्यविलासैः ।
चन्द्रप्रतोल्या[२] चतुष्पथैरथ रम्योपवनविलासैः ॥
चित्रविचित्रनामपट्टैरापणिकोदारसुमार्गैः ।
आगन्तूनां वित्तहराणामापणिकानां भागैः ॥
लसिता यज्जयपुरी विधत्ते वृद्धं जनं युवानम् ।
जयति मनोज्ञं लसति ललामं तदिदं राजस्थानम् ॥

(१३)

घर्मच्छायापीतश्यामा क्वाप्यरावली रम्या ।
क्वापि कुरङ्गाली चलचरणा रोमंथिनी विलोक्या ॥
क्रमेलकानां क्वचिदपि मानवकार्यार्थं सहयोगः ।
दृश्यः क्वचिदपि गोण्डवणानां रूपस्वरसंयोगः ॥
यस्मिन् दृश्यं क्वापि नृत्यगीतानां मधुरविधानम् ।
जयति मनोज्ञं लसति ललामं तदिदं राजस्थानम् ॥

(१४)

दिलवाड़ा-गोविन्द-बिहारी-मन्दिराणि दिव्यानि ।
राजसमन्दं बालसमन्दं स्थानान्यथ भव्यानि ॥
आमेरे बीकानेरे जैसलमेरे दुर्गाणि ।
जोधपुरोदयपुरामेर - जल - झील - काच - महलानि ॥
श्वेतरक्तपाषाणानथ धत्ते यत्ताम्रनिधानम् ।
जयति मनोज्ञं लसति ललामं तदिदं राजस्थानम् ॥

(१५)

अर्थिकामपूरणं विधत्ते यत्र गरीबनिवाजः[३] ।
भूमण्डले समस्ते व्याप्तो यद्व्यापारिसमाजः ॥
यस्य श्रमिका जगत्प्रसिद्धाः सत्वरकर्मविधाने ।
यस्य च धनिका जगत्प्रसिद्धा धर्मार्थं धनदाने ॥
रणाङ्गणे यद्वीरस्तनुते ह्यनुपमशौर्यवितानम् ।
जयति मनोज्ञं लसति ललामं तदिदं राजस्थानम् ॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(१६)

असमयवृष्टिं दुर्भिक्षं वा भूमेरूषरतां वा ।
वह्निवातभूकम्पावर्षणजनितानुपद्रवान् वा ॥
पेयजलाभावं पशुचाराभावं वस्त्राभावम् ।
समुचितशिक्षावसराभावं वृत्तिनिश्चयाभावम् ॥
जेतुं यतते श्रमबलतो यन्नित्योत्साहनिधानम् ।
जयति मनोज्ञं लसति ललामं तदिदं राजस्थानम् ॥

(१७)

यद्वर्णयितुं यज्ज्ञापयितुं शब्दास्तिष्ठन्त्यल्पाः ।
यस्य द्रष्टुं वैभवमखिलं ह्यपेक्षिता वै कल्पाः ॥
यस्य झील - वापिका-सागरान् को वा मातुं शक्तः ?
विजयस्तम्भं यस्य चोन्नतं को विस्मर्तुं शक्तः ?
नानादेशसमायातानां विहगानां यत्स्थानम् ।
जयति मनोज्ञं लसति ललामं तदिदं राजस्थानम् ॥

(रचनातिथिः १३-४-१९८३)

१. 'हवामहल' इत्यनेन प्रसादेन ।

२. 'चाँदपोल' इत्यनेन नगरद्वारेण ।

३. 'ख्वाजा गरीब निवाज़' अजमेर शरीफस्थः ।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

अहं स्वतन्त्रता भणामि[१]

अहं स्वतन्त्रता भणामि मद्वचो निशम्यताम् ।
निधाय मानसे च तद् यथोचितं विधीयताम् ॥
अहं स्वतन्त्रता भणामि ....॥

(१)

मदर्चनाकृते शिरांस्युपायनीकृतानि यैः,
धनं वपुस्तथा मनः सहर्षमर्पितानि यैः ।
अवापुरात्मवक्षसि ज्वलद्भुशुण्डिगोलिकाः,
गतास्त एव मे जना सदैव वन्दनीयताम् ॥
अहं स्वतन्त्रता भणामि ....॥

(२)

भवद्भिरन्तरिक्षगा जनाः स्वदेश ईक्षिताः,
भवद्भिराततायिनाशकारिणोऽपि दीक्षिताः ।
कृतं भवद्भिरेशियाद्व्यशीतिखेलयोजनम्,
तदेतदर्थमद्य मे शुभेहितं प्रगृह्यताम् ॥
अहं स्वतन्त्रता भणामि ....॥

---

१. आकाशवाण्या समस्तकेन्द्रेभ्यः २५-१-१९८७ ई० तारिकायां रात्रौ ९.४५ वादनकाले प्रसारिते सर्वभाषाकविसम्मेलने पठिता संस्कृतकविता।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(३)

भवद्भिरद्य दृश्यते यथार्थिकी समुन्नतिः,
भवद्भिरद्य दृश्यते नवा च या विनिर्मितिः ।
भवद्भिरद्य यः स्वतन्त्रतारसो निपीयते,
तदेतदात्मजीवने चिरं चिराय धार्यताम् ॥
अहं स्वतन्त्रता भणामि ....॥

(४)

शुभाः हि कामनाः भवत्कृते समर्पयाम्यहम्,
समुन्नतिं सुखं च वः सदैव चिन्तयाम्यहम् ।
परन्तु वर्तमानया विचित्रकाललीलया,
मनाग् विचिन्तिता यदेव वच्मि तन्निशम्यताम् ॥
अहं स्वतन्त्रता भणामि ....॥

(५)

मया न कल्पितं कदापि दुर्बलाभिशोषणं
मया न कल्पितं कदापि दुर्जनाभिपोषणम् ।
मया न कल्पितं कदापि सज्जनावमाननम्
सहेऽखिलं च च तद् यथा सहै न तद्विधीयताम् ॥
अहं स्वतन्त्रता भणामि ....॥

(६)

विलोकयामि वृत्तिहीनतामहं यदा यदा,
विलोकयामि नीतिहीनतामहं यदा यदा ।
नतानना गतासुका भवाम्यहं तदा तदा,
इयं दशा म मेऽस्तु येन तत्सदा विधीयताम् ॥
अहं स्वतन्त्रता भणामि ....॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(७)

यदा यदा श्रृणोम्यहं वधूविदाहपातकम्,
यदा यदा श्रृणोम्यहं बलात्कृतिं विहिंसनम् ।
तदा तदा भवाम्यरुन्तुदव्यथाप्रपीडिता,
इयं व्यथा प्रणाशमेतु येन, तद्विधीयताम् ॥
अहं स्वतन्त्रता भणामि ....॥

(८)

स्वदेशवासिभिः स्वदेशवासिनां विहिंसनम्,
पृथक्त्वभावपोषणं स्वदेशदेहदारणम् ।
अधीतिपण्यविक्रयं करप्रदातृनिःस्वतां,
विलोक्य यां शुचं गतास्मि सा द्रुतं विलोप्यताम् ॥
अहं स्वतन्त्रता भणामि ....॥

(९)

जलं न लभ्यते तथा, यथा सुरा पदे-पदे,
वचांसि सन्ति भूरिशो न हि क्रियाः पदे-पदे ।
पुनश्च भेदभावना प्रवर्त्यते पदे-पदे,
इदं दशा समर्थनं किमर्हतीति चिन्त्यताम् ॥
अहं स्वतन्त्रता भणामि ....॥

(१०)

दलाद् दले पलायनं, प्रवञ्चनां क्षणे क्षणे
प्रतारणं जने जने, विहिंसनं पणे पणे ।
विलोक्य रोगदायकं विमिश्रणं कणे कणे,
गतास्मि यां शुचं हि सा द्रुतं द्रुतं विलोप्यताम् ॥
अहं स्वतन्त्रता भणामि ....॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(११)

अयोग्यता पदोन्नता, सुयोग्यता पदच्युता,
अमोघलाभकारिणी मता च चाटुकारिता ।
इयं स्थितिर्विलोक्यते यदा, तदा मम स्थितिः,
सुपुष्टतां भजेत्कथं ? भवद्भिरेव कथ्यताम् ॥
अहं स्वतन्त्रता भणामि ………………॥

(१२)

क्वचिद्विलाससाधनैर्विमण्डिता विलासिनः,
क्वचित्क्षुधाप्रपीडिता वसन्ति देशवासिनः ।
क्वचित्पयस्विनी धनस्य कुत्रचिच्च निःस्वता,
इयं दशा विलोपमेतु येन तद्विधीयताम् ॥
अहं स्वतन्त्रता भणामि ………………॥

(१३)

कथं पदातिमार्ग एव शेरते हि कार्मिकाः,
कथं च धर्मनाम्नि सर्वमाचरन्ति धार्मिकाः ।
कथं च देहविक्रयो विधीयते सुयोजितम्
इदं निरीक्ष्य मानसे समीक्षणं विधीयताम् ॥
अहं स्वतन्त्रता भणामि ………………॥

(१४)

अहं स्मरामि कष्टपद्धतिं पुरानृणां यदा,
अहं भवामि गद्गदाभिमानसंयुता तदा ।
विलोक्य किन्तु वर्तमाननेतृलाभकांक्षितां,
व्रजान्यहं मुदं ह्यथो शुचं ? स्वयं विचार्यताम् ॥
अहं स्वतन्त्रता भणामि ………………॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(१५)

धनस्य वा श्रमस्य वा न कृच्छ्रतास्ति भारते
समस्तधातवो मिलन्ति भारते प्रभारते ।
उदेति या यदा-कदा तथापि बुद्धिहीनता
न सा कदाप्युदेतु येन तत्सदा विधीयताम् ॥
अहं स्वतन्त्रता भणामि ……………॥

(१६)

न निर्धनो न निर्बलो जनोऽत्र कोऽपि जायताम्,
न कस्यचित्समादरो विखण्डितश्च जायताम् ।
निजावलम्बनं जने जने सदा प्रवर्धताम्,
जनो जनोऽस्य भारतस्य मोदताम्, प्रमोदताम् ॥

◆

(रचनातिथिः १५-८-१९८३)

(आकाशवाणीतः ३, ६, ११, १३, ४ संख्याकानि पद्यानि न प्रासार्यन्त। इयं कविता इत पूर्वम् अर्वाचीनसंस्कृतस्य पञ्चमवर्षीये चतुर्थेऽङ्केऽपि प्रकाशिता बभूव किन्तु २, १३ संख्याके पद्ये तत्र न आस्ताम्।)

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain, Digitized by eGangotri and Sarayu Trust Foundation Delhi.

रौति ते भारतम् !

कश्चिदुवाच-

किं रमाकान्त ! नित्यं त्वया भण्यते
'भाति मे भारतं भाति मे भारतम् ।'
किं न पश्यस्यनेकैरभावैर्युतं
रौति ते भारतं रौति ते भारतम् ॥१॥

कुत्रचिद्दीर्घपंक्तिस्थिता मानवाः
यापयन्ति स्वकालं प्रतीक्षापराः ।
मोचयन्ति स्वनिःश्वासराशीनहो !
यैर्व्यर्थामाप्नुवद् रौति ते भारतम् ॥२॥

रेलयानेषु भिक्षापरान् बालकान्
अङ्गहीनानवस्त्रान् दयोत्पादकान् ।
गालिभिः पोषितान् न्यक्कृतैस्तोषितान्
वीक्ष्य चिन्तामयं रौति ते भारतम् ॥३॥

वृत्तपत्रेषु नित्यं बलात्कारिणां
निन्द्यपैशाचकृत्यानि पश्यत् पठत् ।
किञ्च हत्यापहारादिगाथा वहत्
रौति ते भारतं रौति ते भारतम् ॥४॥

क्वाप्यशिक्षातमोभिर्वृतं कष्टदैः
क्वापि रोगैः परीतं महादारुणैः ।
नित्यमुत्कोचलीलाविलासैर्युतं
रौति ते भारतं रौति ते भारतम् ॥५॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

यौतुकप्रेप्सुभिर्लोलुपैर्निन्दितैः
मर्त्यरूपे स्थितै राक्षसैः कौटिकैः ।
दह्यमाना वधूर्वीक्ष्य दुःखेन हा
रौति ते भारतं रौति ते भारतम् ॥६॥

देहपण्याजिरे नूपुराकर्णनैः
पारवश्यांकितैर्नृत्यकृत्यैस्तथा ।
येन दारिद्र्यगाथोच्चकैर्गीयते
तद् व्यथापूरितं रौति ते भारतम् ॥७॥

यत्र रक्षाभटैः रक्षणीयो हतो
यत्र गोप्ता न गोप्यं क्षमो रक्षितुम् ।
यत्र सन्तो मता दस्यवो हिंसका
रौति तद् भारतं रौति तद् भारतम् ॥८॥

उच्चशिक्षां समाप्यापि वृत्त्यर्जने
न क्षमो जायते यत्र यूनां गणः ।
यत्र कुत्रापि वृत्त्यर्थमाहिण्डते
रौति तद् भारतं रौति तद् भारतम् ॥९॥

हा कराधानकर्ताधिकारी स्वयं
यत्र धत्ते स्वगेहे विना सूचनाम् ।
कृष्णवित्तं तथा स्वर्णभाण्डं महद्
रौति तद् भारतं रौति तद् भारतम् ॥१०॥

कार्यरोधैस्तथा हिंसकान्दोलनैः
चाटुकारप्रणीतैर्वृथा भाषणैः ।
ईश्वरम्मन्यमानैरहो दम्भिभी
रौति ते भारतं रौति ते भारतम् ॥११॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

उग्रकृत्यैनरैर्यत्र मध्येपथं
पूर्वसेनापतिर्हन्यते गोलिभिः ।
यत्र चार्ता भिषग्भिर्बलाद्दूष्यते
निन्द्यकृत्यान्वितं रौति तद् भारतम् ॥१२॥

यत्र यूनां नवैर्मादकैर्वस्तुभिः
क्षीयते शक्तिरोजस्तथा लुप्यते ?
यत्र दृश्या युवानो जराजर्जरा
रौति तद् भारतं रौति तद् भारतम् ॥१३॥

कर्हिचिद्विश्वबन्धुत्वमुद्घोषयत्
पावयद्विश्ववन्द्यैश्चरित्रैर्जगत् ।
यत्तदेवाद्य विद्वेषहिंसाप्लुतं
रौति ते भारतं रौति ते भारतम् ॥१४॥

कर्षकेभ्यो यदान्नं भवेद् दुर्लभं
कार्मिकेभ्यश्च गेहं यदा दुर्लभम् ।
वस्त्रकृद्भ्यश्च वस्त्रं यदा दुर्लभं
तर्हि नूनं हहा ! रौति ते भारतम् ॥१५॥

कर्गले राष्ट्रभाषास्ति नो भाषणे
संस्कृतं स्तूयते, नैव तत्सेव्यते ।
स्वीयपादे कुठारः स्वयं पात्यते
वीक्ष्य सर्वं ध्रुवं रौति ते भारतम् ॥१६॥

रमाकान्त उवाच-

यत्त्वया कीर्त्यते दोषजातं सखे !
तन्मया सूचितं ह्येकपद्ये[१] पुरा ।
दोषवर्जं मया सद्गुणाः सञ्चिता-
स्तेन प्रोक्तं मया भाति मे भारतम्' ॥१७॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

कीर्तनेनैव वा क्रन्दनेनैव वा
लोपमेष्यन्ति दोषा न देशस्य वै ।
तेन सर्वैः क्रियन्तां सदा सुक्रियाः
येन भातु प्रसन्नं सदा भारतम् ॥१८॥

लोलुपा नायका नैव सन्त्वत्र भोः
सन्तु कर्तव्यशून्या न चापि प्रजाः ।
देशसेवां मिलित्वा कुरुध्वं समे
येन भूयोऽपि भासेत नो भारतम् ॥१९॥

(रचनातिथिः १२-१०-१९८५)

---

१. सन्तु दोषा अनेकेऽत्र कैश्चिन्मताः
किन्तु नाहं प्रपश्यामि तान् मन्दधीः ।
वन्दनीयं मया कीर्तनीयं मया
मोदतां वर्धतां राजतां भारतम् ॥
-'भाति मे भारतम्'- इत्यस्मिन् काव्ये १०७ संख्याके पद्ये

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

राष्ट्रदेवते !

राष्ट्रदेवते ! कथं नु पूजनं करोमि ते ?
ब्रूहि देवते ! समर्चनं कथं करोमि ते ?

उग्रताविहिंसनोत्थचीत्कृतीः शृणोमि चेत्
राष्ट्रदेवते ! कथं नु कीर्तनं करोमि ते ॥

यावदाननानि हर्षफुल्लतां न चाप्नुयुः
ब्रूहि देवते ! सुमार्पणं कथं करोमि ते ॥

दन्दशूकवेष्टितं हि कार्यतन्त्रमस्ति चेत्
चन्दनं कथं समर्पयामि राष्ट्रदेवते ॥

वीक्ष्य कर्दमावृता हि कोटि-कोटिवीथिकाः
राष्ट्रदेवते ! कथं सुगन्धमर्पयामि ते ॥

सौमनस्यसूत्रगुम्फिता न चेत्स्थिता जनाः
राष्ट्रदेवते ! कथं सुमाल्यमर्पयामि ते ।
राष्ट्रदेवते ! कथं नु हारमर्पयामि ते ॥

पेयवारि दृश्यते यदा च वै सुदुर्लभं
स्नानवारि पावनं समर्पयामि किं नु ते ॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

हा ! वधूप्रदाहचीत्कृतीर्निशम्य नित्यशः
स्तोत्रमापठामि ते कथं नु राष्ट्रदेवते !

द्वेषकृत्प्रभंजनो हि यावदेति नो शमं
दीपकं कथं प्रदर्शयामि राष्ट्रदेवते !

एकलोऽपि वीक्ष्यतेऽन्नपीडितो मया यदि
राष्ट्रदेवते ! कथं नु भोज्यमर्पयामि ते !

वर्धते धनं हि, किन्तु निर्धनेषु तन्न चेत्
राष्ट्रदेवते ! कथं नु दक्षिणां ददामि ते ॥

मिष्टमर्पितं पुरैव 'भाति भारतं' हि ते ।
यन्मया कटूक्तमत्र तत्क्षमस्व देवते !

(रचनातिथिः २९-१२-१९८५)

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

फिलाडेल्फिया

'पेनसिल्वानिया'-विश्वविद्यालये
सांस्कृतं विश्वसम्मेलनं षष्ठकम्[१] ।
योजयन्ती, लसन्ती बुधानां गणैः
राजते रम्यरूपा फिलाडेल्फिया ॥१॥

यत्र 'दाण्डेकरो'[२]ऽध्यक्षवक्तव्यदः
सम्यगुन्मील्य चार्वाक्तनं संस्कृतम्[३] ।
एडविन् गैरियो[४]-हस्तकञ्जेऽर्पयत्
राजते शोभना सा फिलाडेल्फिया ॥२॥

मण्डनो[५] बेण्डरो[६] रामकर्ण[७]स्तथा
भास्कराचार्य[८]-रेवाप्रसादादयः[९] ।
आप्नुवन् यत्र पत्रेषु विज्ञादरं
राजते सा सुरम्या फिलाडेल्फिया ॥३॥

नैन्सिनेल्बेडिया[१०] सुन्दरी यत्र मां
श्रावयित्वा 'घनानन्द'[११]-काव्यं वरम् ।
दिव्य आनन्दसिन्धौ मुदास्नापयत्
राजते शोभना सा फिलाडेल्फिया ॥४॥

यत्र 'हैरीसन'[१२]-प्रेक्षणागारके
विश्वगीर्वाणवाणीकवीनां[१३] सभाम् ।
योजयित्वा रमाकान्त[१४] आस्ते सुखी
राजते शोभना सा फिलाडेल्फिया ॥५॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

मण्डनाध्यक्षसम्भाषणालङ्कृतं[१५]
रामकर्णस्य[१६] वाग्भिः समुद्घाटितम् ।
काव्यसम्मेलनं वीक्ष्य मोदं गता
राजते रम्यरूपा फिलाडेल्फिया ॥६॥

आर०वी० जोशि[१७]-सत्यव्रतावार०के०-
शर्म-कौठेकरौ[१८] श्रीरमाचौधुरी[१९] ।
भास्कराद्याश्च[२०] यत्रापठन् स्वाः कृतीः
राजते शोभना सा फिलाडेल्फिया ॥७॥

'भाति मे भारतं'[२१] यत्र काव्यं मया
सस्वरं श्रावितं श्रोतृवृन्दप्रियम् ।
तत्स्वरैर्मोहिता मोहितेवास्ति या
राजते सा सुरूपा फिलाडेल्फिया ॥८॥

श्रीहरेरामकृष्णाश्रमे[२२]ऽमेरिका-
देशजैर्भक्तवर्यैश्च यस्यां बुधाः ।
स्वागतेनार्चिता वैष्णवेनाध्वना[२३]
राजते शोभना सा फिलाडेल्फिया ॥९॥

अङ्कितैतिह्यगाथाभि[२४]रालोकिनी
शोभिताभ्रंल्लिहैरालयैः सर्वतः ।
स्वच्छता-शान्ति-विद्या-प्रकाशैर्युता
राजते रम्यरूपा फिलाडेल्फिया ॥१०॥

या पुराणी नवीना पुरी[२५] विद्यते
या प्रजातन्त्रघोषावनी विद्यते ।
नित्यमेव प्रकृत्या विलासैर्युता
राजते सा सुरम्या फिलाडेल्फिया ॥११॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

यत्र रिङ्गत्तरङ्गा 'डलेवर्' नदी[२६]
यत्र 'शोमेनि'[२७] संज्ञं च यूनां गृहम् ।
मेपलै[२८]श्चैष्टनड्वृक्षकैः[२९] शोभिता
राजते शोभना सा फिलाडेल्फिया ॥१२॥

संग्रहागार[३०] आस्ते यदीयोऽद्भुतो
यत्र सङ्गीतगोष्ठी समायोज्यत[३१] ।
सप्ततन्त्रीस्वरैर्झंकृता मोहकैः[३२]
राजते सा सुरम्या फिलाडेल्फिया ॥१३॥

भारतीयक्लबेनातिथीनां[३३] भृशं
स्वागतं यत्र कृत्वा मनो निर्जितम् ।
या हि 'बन्धुप्रिया'[३४] संस्कृते, साङ्गले
राजते रम्यरूपा फिलाडेल्फिया ॥१४॥

यत्र चागन्तुकानां मनोरञ्जने
संनियुक्ता अभिज्ञा जना आसते ।
या पुराणांकवीथीं[३५] मुदा रक्षति
राजते सा सुयत्ना फिलाडेल्फिया ॥१५॥

यां प्रजातन्त्ररक्षाव्रती श्रीयुतो
बेञ्जमिन्फ्रेंकलिन्[३६] - संज्ञकश्चिन्तकः ।
स्वीयवासेन लब्धप्रतिष्ठां व्यधात्
राजते शोभना सा फिलाडेल्फिया ॥१६॥

या नभश्चुम्बिभिः काचशृङ्गारिभि-
र्नैकखण्डैर्वणिक्कर्मगेहैर्युता ।
या 'डलेवर्' - नदीवीचिभिर्लालिता
राजते सा सुरम्या फिलाडेल्फिया ॥१७॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

वित्तपत्रस्य कर्तुं समाशोधनं
यत्र बैंकस्य[३७] पृष्ठात्समुड्डीयते ।
'हेलिकोप्टर्'-विमानं विलम्बं हरत्
राजते सा सुदक्षा फिलाडेल्फिया ॥१८॥

यत्र यूनां मुखे शोभते यौवनं
यत्र निश्चिन्तता मानसे क्रीडति ।
यत्र घण्टा प्रजातन्त्रसद्घोषिणी[३८]
राजते शोभना सा फिलाडेल्फिया ॥१९॥

ऊरुवक्षोनितम्बश्रियां विभ्रमैः
राजमार्गे प्रधावन्ति[३९] रम्भोरवः ।
रक्षितुं स्वं शरीरं कृशं यत्र सा
राजते रम्यरूपा फिलाडेल्फिया ॥२०॥

भारतीयाञ्जनान् भारतीयाः कला
वाङ्मयं भारतीयं समाश्रित्य वै ।
यत्र संशोधनं कुर्वते शोधका
राजते सा सुधन्या फिलाडेल्फिया ॥२१॥

सिन्धु - भोग्यङ्क-विश्वेश-खृष्टाब्दके
मासि चाक्टूबरे सप्तदश्यां तिथौ ।
यत्र चागत्य सृष्टा मयेयं कृती
राजते नित्यमेषा फिलाडेल्फिया ॥२२॥

(रचनातिथिः १७.१०.१९८४, फिलाडेल्फियानगर्याम्)

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

पादटिप्पण्यः

१. षष्ठं विश्वसंस्कृतसम्मेलनम् ।
(VIth World Sanskrit Conference)

२. प्रसिद्धः प्राच्यविद्याविशारदः प्रो० रामचन्द्र नारायण दाण्डेकरः।

३. अर्वाचीनसंस्कृतम् (६/४) दि० १५.१०.१९८४ षष्ठाब्दपूर्त्यङ्कः।

४. प्रो० एडविन गैरो, शिकागोविश्वविद्यालयस्य संस्कृताचार्यः।

५. डा० मण्डन मिश्रः, लालबहादुरशास्त्रीसंस्कृतविद्यापीठस्य प्राचार्यः किञ्च राष्ट्रियसंस्कृतसंस्थानस्य निदेशकः।

६. प्रो० अर्नेस्ट बेण्डरः, पेन्सिल्वानिया वि०वि० प्रोफेसरः (सम्मेलन-संयोजकः)

७. डा० रामकरण शर्मा, राष्ट्रियसंस्कृतसंस्थानस्य संस्थापक-निदेशकः।

८. डा० भास्कराचार्य त्रिपाठी, प्रसिद्धः संस्कृत कविः। भोपालतः सम्प्राप्तः।

९. प्रो० रेवाप्रसादद्विवेदी 'सनातनः' सुप्रसिद्धः संस्कृत कविः, कालिदाससाहित्यस्य विशिष्टो विद्वान्। वाराणसीतः समायातः।

१०. नैन्सी नेल्बेडिया फिलाडेल्फियायां विश्वविद्यालये हिन्दीकवि-घनानन्दमवलम्ब्य शोधं कुर्वाणासीत्।

११. घनानन्दः सुप्रसिद्धो रीतिकालीनो रीतिमुक्तः कविः। तस्य 'सवैया'-पद्यं तया श्रावितम् ।

१२. 'हैरिसन हॉल' इत्यत्र ।

१३. विश्वसंस्कृतकविसम्मेलनम् ।

१४. रमाकान्तशुक्ल एतस्य कविसम्मेलनस्य संयोजकत्वेन वृत आसीत्।

१५. डा० मण्डनमिश्रेणास्य कविसम्मेलनस्य आध्यक्ष्यं विहितम् ।

१६. डा० रामकरणशर्मणेदं कविसम्मेलनमुद्घाटिम् ।

१७. प्रो० रसिक विहारी जोशि-प्रो० सत्यव्रतशास्त्रिणौ ।

१८. प्रो० रामकरणशर्म-प्रो० प्रभाकर नारायणकवठेकरौ ।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

१९. कलकत्तातः सम्प्राप्ता संस्कृतनाट्यकर्त्री कवयित्री च श्रीमती रमा चौधुरी।

२०. डा० भास्कराचार्य त्रिपाठी । आदिपदेन श्री माधवदेशपाण्डेप्रभृतयः।

२१. 'भाति मे भारतं' नामकं मम काव्यम्। एकया लेखिकया अमेरिकातः प्रकाशिते समीक्षापत्रे तच्छ्रुत्वा लेखितम्—'Most Modern Poetry in the most ancient language of the world.'

२२. इस्कॉनसंस्थायाः फिलाडेल्फियास्थे केन्द्रे ।

२३. तत्र वैष्णवं भोजनमतिथिभ्य उपहृतमासीत् ।

२४. फिलाडेल्फिया-विमानपत्तनादिस्थानेषु ऐतिहासिकचित्राण्यंकितानि सन्ति।

२५. आधुनिकनगरी फिलाडेल्फिया स्वप्राचीनं रूपमपि रक्षति। तत्र अष्टादश-शताब्द्यां निर्मितानि गृहाणि अद्यापि सुरक्षितानि सन्ति—18th Century Street मध्ये ।

२६. डेलवेयर् नाम्नी नदी ।

२७. शोमेनी-ड्राइव-स्थितं युवककेन्द्रम् । 'Youth Centre, Chaumeni' यत्र मया निवासः कृतः। क्लिफ़नामा युवा तस्य केन्द्रस्य सञ्चालक आसीत् ।

२८. 'मेपल'नामकैर्वृक्षैः।

२९. 'चेस्टनट' संज्ञैः वृक्षैः ।

३०. फिलाडेल्फिया-म्यूज़ियम ।

३१. तत्र भारतीयसंगीतगोष्ठी समायोजितासीत् यत्र वयमुपस्थिता आस्मः।

३२. तत्रैकेन भारतीयकलाकारेण सितारवादनं कृतम्। एकेन चिकित्सकेन तबलावादनं कृतम् ।

३३. 'इण्डियन क्लब' नाम संस्थया अतिथीनां स्वागतार्थं 'पकौड़ा' प्रभृतीनि भारतीयव्यञ्जनानि समुपहृतानि ।

३४. 'फिलाडेल्फिया' शब्दस्यार्थोऽस्ति बन्धूनां प्रिया ।

३५. पुराणांकवीथीम् । पुराणैः-प्राचीनैः अंकैः=चिह्नैः सहितां वीथीम् । अथवा पुराणानि अष्टादश भवन्ति । तेषाम् अंकेन १८ संख्यया युतां 'Eighteenth Century Street' वीथीम् ।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

३६. फिलाडेल्फिया श्रीबेञ्जामिनफ्रेंकलिनस्य कार्यस्थली आसीत् ।

३७. तत्र पी०एन०बी० नाम्नोऽधिकोषस्य (बैंकस्य) पृष्ठे एकं हेलिकोप्टरविमानं सन्नद्धं तिष्ठतिस्म। चैकसमाशोधने राजमार्गयातायातेन कदाचिद्विलम्बो भवेदिति कृत्वा आकाशमार्गात् चैकसमाशोधनं कर्तुं तस्योपयोगो भवतिस्म। अद्यत्वे 'टेलीबैंकिंग'-युगे तु मन्ये तस्य नास्ति प्रासङ्गिकता ।

३८. विश्वप्रसिद्धा बृहदाकारा घण्टा। या स्वातन्त्र्यघण्टा प्रजातन्त्रघण्टा च कथ्यते ।

३९. तत्र राजमार्गेषु श्वेतं व्यायामपरिधानं धृत्वा युवत्यो धावनं कुर्वन्ति येन तासां शरीरे मेदोवृद्धिर्न स्यात् कृशता च सुरक्षिता स्यात् । यदा चतुष्पथे रक्तप्रकाशवर्तिकावशात्ता अग्रे धावितुमक्षमा भवन्ति तदा ता एकस्मिनेव स्थाने उत्प्लुत्योत्प्लुत्य धावनस्य व्यायामं कुर्वन्ति । तदा तासां यौवनं मुखरितमिव भवति।

४०. अंकानां वामतो गतिः। विश्वेशः १, अंकाः ९, भोगिनः (सर्पाः) ८, सिन्धवः ४। १९८४ तमे खैष्टे वर्षे।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

मेघप्रबोधनम्

क्रूरहृदय मेघ ! कथं सुप्यते त्वया ?
गर्ज्यते न तर्ज्यते न वृष्यते त्वया ।
कोऽस्या अपराधोऽभूद् रोषमितो येन
मेदिन्यै जीवनं न दीयते त्वया ॥

क्रूरहृदय मेघ०

ग्लपयसि धरणीं नु हहा ! शंकसे न भोः !
कर्तव्यमकृत्वा त्वं लज्जसे न भोः !
सर्वंसहवसुन्धरा तुद्यते त्वया ॥

क्रूरहृदय मेघ०

प्रथमे ह्याषाढदिने दृष्टो न त्वम्
श्रावणेऽथ भाद्रपदे वृष्टो न त्वम्
कार्यानेहसि वद क्व खेल्यते त्वया ?

क्रूरहृदय मेघ०

वसुधाहृदयं भिन्नं पश्य कीदृशम्
खगमृगगणवैवश्यं पश्य कीदृशम् ।
अपि कर्षकदीनदशा लक्ष्यते त्वया ?

क्रूरहृदय मेघ०

आतपनिःश्वासान् हा ! धरा मोमुचीति
रारटीति चातकः पिकश्च रोरुदीति
क्रन्दनं निशम्य मौनमास्यते त्वया !

क्रूरहृदय मेघ०

पशुगण उद्विग्नमना हन्त बम्भ्रमीति
मीनगणः कासारे हन्त तात्रसीति
दुर्भिक्षं क्षाल्यते कथं न हा ! त्वया ?

क्रूरहृदय मेघ०

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

तप्तानां त्वं शरणं कथ्यसे मुधा
पर्जन्यादन्नसम्भवो मतो मुधा
पुनरपि यदि तप्तजगत् ताप्यते त्वया ॥

क्रूरहृदय मेघ०

त्वय्यायत्तं कृषिफलमिति ये प्राहुः
किं ते कविकुलगुरवोऽनृतमेवाहुः ?
किं तेषां कलकीर्तिर्दूष्यते त्वया !

क्रूरहृदय मेघ०

दोला नो मल्हारं नापि कज्जली
नो कर्गलनौकैवर्तकसुमण्डली ।
नो वर्षास्नानमभूत्, किं कृतं त्वया !

क्रूरहृदय मेघ०

उद्याने सम्फुल्लं नीपसुमं नो
रम्या हरितालिकातृतीयापि च नो
सर्वमिदं वीक्ष्य कथं हृष्यते त्वया ?

क्रूरहृदय मेघ०

किं तडिता सेवाव्रततो निवारितः ?
आहोस्विच्छक्रेण त्वं निलम्बितः ?
किं नातपतप्तवनं सेच्यते त्वया ?

क्रूरहृदय मेघ०

प्लावनं क्वचित्तथा क्वचित्त्वर्षणम्
उभयथापि हन्यते त्वया तु कर्षणम् !
नो कथं विनाशतो विरम्यते त्वया ॥

क्रूरहृदय मेघ०

स्वनियोगमशून्यं कुरु वर्ष सत्वरम् ।
नर्तय शितिकण्ठगणं जलद ! सत्वरम् ।
चातककुशलं न कथं पृच्छ्यते त्वया ?

क्रूरहृदय मेघ०

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

पादपेषु वल्लरीषु वर्ष वर्ष वर्ष
ग्रामनगरवीथिकासु वर्ष वर्ष वर्ष
नवजीवनमेतेभ्यो दीयतां त्वया ।
क्रूरहृदय मेघ०

पशुगणस्तृणानि गोचरेषु चञ्चुरीतु ।
कर्षकोऽथ कार्मिको मुदं च बाभजीतु ।
सान्त्व्यतां बलाकेयं साम्प्रतं त्वया ।
क्रूरहृदय मेघ०

अल्पय दारुणविपदं जीवखेदिनीम्
तर्पय धारासारैस्तप्तमेदिनीम् ।
अपि नीरद ! मे वचनं श्रूयते त्वया ?
क्रूरहृदय मेघ०

अधिकं त्वां प्रेरयितुं नाहमुत्सहे
निर्ह्रीकं ह्रेपयितुं नाहमुत्सहे ।
स्तोकं बहु नैव किमिति गृह्यते त्वया ?
क्रूरहृदय मेघ०

क्रूरहृदय मेघ ! कथं
कुलिशहृदय मेघ ! कथं
अयि निर्घृण मेघ ! कथं सुप्यते त्वया ?
गर्ज्यते न तर्ज्यते न वृष्यते त्वया ?
क्रूरहृदय मेघ !

(रचनातिथि: ५-१०-१९८७)

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

अकालजलद !

(१)

अकालजलद ! त्वया किमिति निन्द्यमाचर्यते?
कृषीवलपरिश्रमः कथमहो त्वया नाश्यते ?
निपात्य करकाचयं परिणतेषु सस्येषु हा
त्वया किमिति तुद्यते वद पयोद ! पृथ्वीमनः ॥

(२)

निदाघतपनज्वलद्वसुधया यदाकारित-
स्तदा त्वमगमः क्वचिद्वसुमती त्वया शोषिता।
यदा च वसुधासुतैः श्रमभरैः प्रयासैर्निजै-
ररक्षि कृषिसन्ततिर्विषमहो त्वया पातितम् ॥

(३)

महाराजतशोभिनः परिणताः सुगोधूमकाः
यवाः कणिशालिनश्चणकसर्षपाश्चाहताः ।
श्रमेण परिपालिता कृषिलता त्वया मर्दिता
धिगस्तु तव जीवनं ! चरति यद्भवे वैशसम् ॥

(४)

कृषीवलगणैः समैः कृषिफलं सदा पोषितुं
वृतस्त्वमसि रक्षकस्त्वमभवस्तु हा भक्षकः !
सुकालमवलोक्य नो समभवत्तवावर्षणम्
मुधाद्य तव दुःसहा वद वदान्यता कीदृशी ॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(५)

कृषीवलगणास्त्वया विषद! वञ्चिता लुण्ठिता-
स्तथापि कृषिदेवता भवसि कैर्गुणैर्ब्रूहि रे ।
अकारणमिदं त्वया किमिति वैरमाविष्कृतम्
कलंकितमहो कथं प्रकुरुषे स्वकीयं यशः ॥

(६)

यथासमयमस्तु ते जलद ! गर्जनं वर्षणम्
यथासमयमस्तु ते समुदयस्तथा विश्रमः ।
जगज्जनसुरञ्जनो भव न वै जगत्त्रासकः
परोपकरणव्रतं वृणु पयोद ! कल्याणदम् ॥

●●●

(रचनातिथिः १३-१५.३.१९८८)

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

स्वागतं पयोद ! ते

गर्जनेन वर्षणेन ते धरा प्रमोदते ।
स्वागतं पयोद ! ते स्वागतं पयोद ! ते ॥

(१)

हे सुकालवारिमुक् ! त्वया धरा सुतर्पिता
हे पयोद ! चातकास्त्वया भृशं सुहर्षिताः
केकिनां गणस्त्वया मुदा वनेषु नर्त्यते ॥
स्वागतं पयोद ! ते स्वागतं पयोद ! ते ॥

(२)

वीतवर्षशोषकृत्[१] यदाधुना त्वमागतः
भूमनःस्थतापराशिरत्ययं द्रुतं गतः
मानसे मुदो न मान्ति दर्शनाज्जनस्य ते ॥
स्वागतं पयोद ! ते स्वागतं पयोद ! ते ॥

(३)

मार्जितास्त्रुटी[२]र्विलोक्य ते प्रमोदमेम्यहम्
हर्षितान् वनस्पतीन् विलोक्य मोदमेम्यहम्
सर्वतः प्रसन्नता जनाननेषु विद्यते ॥
स्वागतं पयोद ! ते स्वागतं पयोद ! ते ॥

१. १९८७ तमेशवीयेऽब्दे काले अवर्षणात् शोषहेतुः ।
२. १९८७ तमे वर्षे काले अवर्षणात्मिकास्त्रुटयस्त्वया १९८८ तमे वर्षे सुकालवर्षणेन मार्जिताः ।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(४)

नूतना सुपादपाः प्रमोदिता सुवल्लरी
उच्छलत्सुविभ्रमा तरंगितास्ति निर्झरी
पक्षिणश्च नीडनिर्मितिं द्रुतं प्रकुर्वते ॥
स्वागतं पयोद ! ते स्वागतं पयोद ! ते ॥

(५)

क्षेत्रकर्षणेन बीजवापकर्मणा द्रुतं
कर्षकैः सभार्यकैः स्वधर्मपालनं कृतं
श्रावणेऽथ भाद्रकेऽपि ते दयां भजन्तु ते ॥
स्वागतं पयोद ! ते स्वागतं पयोद ! ते ॥

(६)

अंगणेषु गेहपृष्ठकेषु वा वनान्तरे
वीथिकासु वारिपूरितासु वापि चत्वरे ।
प्रावृषोऽभिषेकमर्भका मुदा प्रकुर्वते ॥
स्वागतं पयोद ! ते स्वागतं पयोद ! ते ॥

(७)

दोलया मनोविनोदमाचरन्ति बालिकाः ।
तीव्रगामिनो गृहं प्रयान्ति पश्य पान्थकाः
उत्कया बलाकया मनोरथः स्व पूर्यते ॥
स्वागतं पयोद ! ते स्वागतं पयोद ! ते ॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(८)

'तोयदेन पूरिता मनोरथाः समे हि नो
वारिदेन दारितं सुदीर्घसंकटं हि नो'
ग्रामवासिभिश्च नागरैर्मुदाद्य कथ्यते ॥
स्वागतं पयोद ! ते स्वागतं पयोद ! ते ॥

(९)

पक्षिणश्चतुष्पदाः सरीसृपाः पयश्चराः
मोदमाप्नुवन्ति कान्तिमाप्नुवन्ति भूधराः
फुल्लितैः कदम्बकैः सुहास एष कीर्यते ॥
स्वागतं पयोद ! ते स्वागतं पयोद ! ते ॥

(१०)

क्लिन्नवस्त्रयोषितो महर्षिमानभञ्जिकाः
धारिता भुवा नवा हरीतिमत्सुशाटिका
रामणीयकं नवं च किं न वाद्य दृश्यते ?
स्वागतं पयोद ! ते स्वागतं पयोद ! ते ॥

(११)

दर्दुराः प्रमोदिताः सुहंसकाः पलायिताः
पद्मनाशगर्विताः शिलीन्ध्रकाः समुद्गताः
द्वन्द्व एव जीवनं नु ! चिन्तयाऽलमत्र ते ॥
स्वागतं पयोद ! ते स्वागतं पयोद ! ते ॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(१२)

तावता जलेन सिञ्च वारिवाह ! मेदिनीम्
यावता न याति सा दशां स्वजीवखेदिनीम्
प्लावनं भवेत्क्वचिन्न चातिवर्षणेन ते ॥
स्वागतं पयोद ! ते स्वागतं पयोद ! ते ॥

(१३)

शस्त्रवह्नितापशामको भवेः पयोद हे !
द्वेषवह्नितापशामको भवेः पयोद हे !
शान्तिरस्तु सौख्यमस्तु सीकरैः पयोद ! ते ॥
स्वागतं पयोद ! ते स्वागतं पयोद ! ते ॥

(१४)

मोदमेतु मेदिनी प्रमोदमेतु मानवः ।
नो कदापि बाधतां भुवं कुशोषदानवः ॥
अन्नमस्तु, दुग्धमस्तु, विद्युदस्तु केन[१] ते॥
स्वागतं पयोद ! ते स्वागतं पयोद ! ते ॥

●●●

(रचनातिथिः १५-७-१९८८)

१. केन=जलेन

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

नेहरुं तं स्मरामो वयं सादरम्

(१)

जंगले मंगलं येन सम्पादितं
येन संकीर्णवृत्तिस्सदा न्यक्कृता ।
शत्रवो येन मित्रीकृताः स्वस्मितै-
र्नेहरुं तं स्मरामो वयं सादरम् ॥

(२)

व्यावृतास्याः समस्याः समाधाय यो
जागरामास देशस्य भूत्यै सदा ।
पालयामास यो देशसेवाव्रतं
नेहरुं तं स्मरामो वयं सादरम् ॥

(३)

पूजयामास नो दर्पिणो दम्भिन-
श्चिन्तयामास यो दीननृणां हितम् ।
मार्गयामास देशोन्नतेर्यस्स्मृतिं
नेहरुं तं स्मरामो वयं सादरम् ॥

(४)

यस्य कोपोऽपि नृणां प्रियः सम्मतो
यस्य संस्पर्शमाप्तुं नरा उत्सुकाः ।
भाषितुं येन साकं जगत्सस्पृहं
नेहरुं तं स्मरामो वयं सादरम् ॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(५)

गूढगम्भीरचित्तोऽपि हासप्रियो
यश्च तेजो दधानोऽपि शान्तिप्रदः ।
यश्च पारम्परीणोऽपि नव्यो बभौ
नेहरुं तं स्मरामो वयं सादरम् ॥

(६)

सर्वधर्मादरः सद्गुणान्वेषणम्
शान्तिरौदार्यमाध्यात्मिकं चिन्तनम् ।
नव्यविज्ञानमार्गश्च यत्रावसन्
नेहरुं तं स्मरामो वयं सादरम् ॥

(७)

येन विश्वस्य मञ्चे समुद्घोषितो
विश्वबन्धुत्वमन्त्रो जगत्पावनः ।
शान्तिदूतश्च लोके सदा यो मतो
नेहरुं तं स्मरामो वयं सादरम् ॥

(८)

योऽलिखद् ग्रन्थरत्नानि नैकानि, यो
योजना भारतस्योन्नतेर्निर्ममे ।
देववाणी च गंगा च येनादृते
नेहरुं तं स्मरामो वयं सादरम् ॥

(९)

यस्य ताटस्थ्यनीतिः प्रसिद्धिं गता
पञ्चशीलेन यः सर्वपूज्यो बभौ ।
पाटलश्रीः प्रिया यस्य चात्यन्तिकी
नेहरुं तं स्मरामो वयं सादरम् ॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(१०)

यः पितृव्यः प्रियो बालकानां मतो
यः प्रजातन्त्ररक्षाभटः सम्मतः ।
राजलक्ष्मीप्रियो यश्च वाणीप्रियो
नेहरुं तं स्मरामो वयं सादरम् ॥

(११)

यः कलाकाव्यसंगीतकृद्धृतिस्थितो
यः पुरातत्त्वसाहित्यवीक्षापरः ।
कालसीमा न यं म्लानतां प्रापयेत्
नेहरुं तं स्मरामो वयं सादरम् ॥

(१२)

'एतदाप्तं मया, लभ्यमेतन्मया
नाशयिष्यामि तं, स्फोटयिष्यामि तम्।'
ईदृशी नेतृवृत्तिर्न यस्य प्रिया
नेहरुं तं स्मरामो वयं सादरम् ॥

(१३)

'सन्तु सर्वत्र सर्वे सदा नन्दिताः,
युद्धदावानलो नैव लोकं दहेत् ।'
स्वप्नदर्शी य इत्थं सदाजागरीत्
नेहरुं तं स्मरामो वयं सादरम् ॥

(१४)

अद्य देशे यदौदार्यमालोक्यते
तत्र तस्यास्ति दृश्या शुभा भूमिका ।
भाति मे भारतं यस्य दिव्यैर्गुणै-
र्नेहरुं तं स्मरामो वयं सादरम् ॥

(रचनातिथिः १४-११-१९८८)

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

जाबालिपुरं चल !

जाबालिपुरं चल रमाकान्त ! जाबालिपुरम् !
आकारयति त्वामभिवन्द्यं जाबालिपुरम् ।।ध्रुव०।।

शङ्करशशिलेखावारिविन्दुरखिलौघहरो
बहुवीचिविवर्तावर्तयुता नर्मदा बभौ ।
नर्मदा स्वयौवनमधिजगाम यस्मिन्स्थाने
तत्स्थानं 'भेडाघाट'-पदप्रथितं च बभौ ।।
जगदागन्तुकलोचनावलीपश्यतोहरं
स्फटिकाश्मशिलारमणीयविभाविस्तारकरम् ।
तं भेडाघट्टं निकषा यद् राराष्ट्रि सदा
तन्नगरं चल हे रमाकान्त ! जाबालिपुरम् ।।
जाबालिपुरं चल..........।।१।।

जाबालिमुनेः साधनास्थलं पूतं प्रथितम्
अर्जुनपलाशसहकारप्रभृतिपादपलसितम् ।
देशस्य कृते सर्वस्वहोतृभिः संवलितम्
आयुधनिर्मित्या भारतसैनिकबलप्रदम् ।।
दुग्धप्रदातृपशुधनपरिपालककृषकयुतम्
दुर्गावत्याः विक्रमगाथाभिः परिलसितम् ।
नरसिंहमन्दिरं धत्ते यत्कलुषापहरम्
शंकरगाथाभिर्भवति च यद्रोमाञ्चकरम् ।।
जाबालिपुरं चल..........।२।।

'कृष्णायन'- कृद्द्वारिकाप्रसादमिश्रलसितम्
श्रीहीरालालजैनकृतशोधमयूखसितम् ।
हरिशंकरपरसाई - व्यंग्योक्तिविलासयुतम्
चौहानसुभद्रा-राष्ट्रगीति - गरिमप्रथितम् ।।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

श्रीप्रभुदयाल-गोविन्ददास-साधनांकितम्
श्रीकृष्णकान्त-राजेन्द्र-प्रभृतिविद्वल्लसितम् ।
रामेश्वरशुक्लाञ्चल - नवरचनाप्रभाधरं
पुष्पा-लीना-चित्रा-कर्तृत्वविकासकरम् ॥

जाबालिपुरं चल..........।३॥

योऽवन्तिसुन्दरीं परिणिनाय मुदितेन हृदा
अनुसन्दधते यं विश्वविपश्चिद्गणा मुदा ।
येन ग्रथिता कर्पूरमंजरी नाट्यकृतिः
श्रद्धासुमानि यस्मै ददाति विद्वज्जगती।
अथ विद्धशालभञ्जिकोदयं यस्मात्प्राप्ता
यस्यास्ति काव्यमीमांसानाम्नी कृतिराप्ता ॥
रामायणमथ भारतं बालपूर्वं हि यस्य
मान्यं प्रबन्धषट्कं च विबुधसंसारस्य ।
यस्मिन् वाणी व्यलसन्मुदिता वारम्वारम्
तं राजशेखरं यत्स्मरति प्रियकाव्यकरम् ॥

जाबालिपुरं चल.........।।४॥

चल कविसमवायं पश्य तत्र सहृदयमहितम्
मध्यप्रदेशसंस्कृताकादमींसन्निहितम् ।
रेवाप्रसाद-कमलेशदत्त-कृति-संवलितम्
बच्चूलालावस्थिनो गजलगीतैर्लसितम् ॥
श्रीश्रीनिवासरथमन्द्रघोषनवगानयुतम्
कविपुंस्कोकिलराजेन्द्रमिश्रकलगानयुतम् ।
श्रीरहसबिहारीप्रभृतिकविप्रतिभादृतम्
भास्कराचार्यसञ्चालनकौशलसम्पूतम् ।
पठ कवितां त्वमपि स्वीयां तत्र यथावसरम्
जाबालिपुरं चल रमाकान्त ! जाबालिपुरम् ॥

जाबालिपुरं चल..........।५॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

मा भूस्तेजापःक्षेपघृणितघटनाऽत्र पुरे
स्यादत्र सदा शुभसौख्यसमृद्धिरतीव पुरे ।
संस्कराणां धानीयं विलसतुतरां सदा
जागर्तु मनीषा जगदुद्धारायात्र सदा ।
धत्तामिदं पुरं कलासाहितीगरिमाणम्
योगिनीमन्दिरं वितरतु जगते कल्याणम् ।
प्रार्थय शुद्धेन हृदा जगदीशं सृष्टिकरम्
मोदतां वर्धतां राजतां च जाबालिपुरम्॥

जाबालिपुरं चल..........।६॥

(रचनातिथि : २२-१२-१९८८)

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

एकं सद् बहुधा विलोक्यते भारतम् !

एकं सद् बहुधा विलोक्यते भारतम् ।
बहुधा सच्चैकं विराजते भारतम् ।
एकमखण्डमभिन्नमस्ति मे भारतम् ।
रम्यमस्ति सुरवन्द्यमस्ति मे भारतम् ॥१॥
एकं सद्......।

यदि पादेऽस्य कदापि निविशते कण्टकम्
निखिलतनौ पीडनं भवति मर्मान्तकम् ।
यदि वेदना शिरसि समुदेति सदा ध्रुवं
व्यथते सकलतनौ मे निखिलं भारतम् ॥२॥
एकं सद्......।

भिन्नमस्तु भाषाभूषासु पदे पदे
भिन्नमस्तु लोकाचारेषु पदे पदे ।
भिन्नमस्तु पूजापद्धतिषु पदे पदे
आत्मन्येकमभिन्नमस्ति मे भारतम् ॥३॥
एकं सद्......।

कोटिकोटिजनताचेतस्सु विराजितम् ।
नित्यनवीनोत्सवपर्वावलि - राजितम् ।
विश्वबन्धुता - जिजीविषा - विस्तारकम् ।
जगतो हृदयं जयति जगति मे भारतम् ॥४॥
एकं सद्......।

वीक्ष्य समृद्धिं यन्त्रोद्योगानां भृशम् ।
वीक्ष्यं समृद्धिं कृषिसम्पत्त्या वा भृशम् ।
वीक्ष्य समृद्धिं ज्ञानकलादीनां भृशम्,
मोमुदीति मनसा निखिलं मे भारतम् ॥५॥
एकं सद्......।

यदा व्योम्नि सागरे शैलशृंगेषु वा,
विकटकर्दमे मरौ विजनविपिनेषु वा ।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

सावधानभटनिवहो रक्षति जन्मगां
गर्वमेति विपुलं निखिलं मे भारतम् ॥६॥
एकं सद्......।

क्वापि पतति संकटे प्रजातन्त्रं यदा ,
अवरुध्यते जनानां कण्ठो वा यदा ।
सर्वातंकभयाशंकाः परिहृत्य वै,
गर्जति सकलं समुज्ज्वलं मे भारतम् ॥७॥
एकं सद्......।

क्वापि भवति कुलवधूदाहपापं यदा,
रक्ष्यभक्षणं दुर्बलघातो वा यदा ।
क्वापि भवति यदि हिंसा क्रीडा दुःखदा,
रोरुदीति करुणं सकलं मे भारतम् ॥८॥
एकं सद्......।

आशां वृणुते नैव निराशां भारतम्,
सद्गुणमेव स्मरति न दोषं भारतम् ।
कलहविवादान् शमयति लोके भारतम्,
शान्तिं जगति तनोति शुभं मे भारतम् ॥९॥
एकं सद्......।

यत्र यत्र सत्यं ऋजुता समुदारता,
यत्र यत्र करुणा श्रमपरता वीरता ।
यत्राहिंसा - त्याग - विवेक - सहिष्णुताः,
तत्र तत्र विलसति सुतरां मे भारतम् ॥१०॥
एकं सद्......।

केवलशासनतन्त्रं नो मे भारतम्,
केवलमवनी गृहसम्पन्नो भारतम् ।
कोटिकोटिजनतपःश्रमौ मे भारतम्,
संगच्छध्वं संवदध्वमिति भारतम् ॥११॥
एकं सद्....।

(रचनातिथिः ३१-१-१९८९)

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

उत्तरमङ्गलम्

मित्र ! लब्धा मया ते शुभाः कामना-
स्तत्कृतेऽहं कृतज्ञो भवन् भूरिशः ।
स्वास्थ्यदं मोददं कीर्तिदं सौख्यदं
नूतनं वत्सरं ते शुभं कामये ॥१॥

यत्र गेहे वसेर्यत्र वीथ्यां वसे-
र्ग्रामके वा नगर्यां वसेस्त्वं सखे ।
वैमनस्याग्निरुग्रो न तत्र ज्वले-
न्नूतने वत्सरे ते भवेन्मङ्गलम् ॥२॥

येन मार्गेण यात्रा भवेत्तावकी
तत्र पुष्पाणि नित्यं हसेयुः सखे !
कण्टकं न स्पृशेत्ते पदं कोमलं
नूतने वत्सरे ते भवेन्मङ्गलम् ॥३॥

कुत्र चिन्तात्र लोके न संदृश्यते
कुत्र वा दुःखशोकादयो न स्थिताः?
त्वत्कृते किन्तु तिष्ठन्त्वदृश्या इमे
नूतने वत्सरे ते भवेन्मङ्गलम् ॥४॥

यत्र देशेऽस्ति वासः सखे तावक-
स्तत्र कर्त्तव्यशून्यो न कश्चिद्भवेत् ।
स्युः प्रजातन्त्ररक्षापरास्तन्नरा
नूतने वत्सरे ते भवेन्मङ्गलम् ॥५॥

उष्यते यत्र राष्ट्रे त्वयाहर्निशं
तत्र कार्यं चिकीर्षुर्यदि स्याज्जनः ।
प्राप्नुयात् कार्यवृत्तिं तदा स ध्रुवं
नूतने वत्सरे ते भवेन्मङ्गलम् ॥६॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

ज्ञातमस्त्येव मे, त्वं हि सामाजिकं
वीक्ष्य वैषम्यमाप्नोषि तापं सखे !
आयतावीदृशी ते दशा नो भवे-
न्नूतने वत्सरे ते भवेन्मङ्गलम् ॥७॥

वृत्तपत्रेषु नित्यं बलात्कारिणां
निन्द्यपैशाचकृत्यानि न त्वं पठेः !
नापि हत्यापहारादि-गाथा नवा
नूतने वत्सरे ते भवेन्मङ्गलम् ॥८॥

प्रोन्नतिर्दुजनानां सतां दुर्गति-
र्वृत्तिकष्टार्दितानां च यूनां गतिः ।
नो दुनोतु त्वदीयं द्रुतं मानसं
नूतने वत्सरे ते भवेन्मङ्गलम् ॥९॥

नैव वध्वाः न पत्युर्न वा कस्यचि-
ज्जीवितप्राणिनो दाहमाकर्णयेः !
नैव दारिद्र्यपीडा जनान् बाधये-
न्नूतने वत्सरे ते भवेन्मङ्गलम् ॥१०॥

लोलुपा नायकास्सन्तु देशे नहि
स्वाधिकारात्प्रमता न चापि प्रजाः ।
स्वैरिणो नो भवेयुस्तथा शासका
नूतने वत्सरे ते भवेन्मङ्गलम् ॥११॥

मुग्धलोकं सखे ! वञ्चनाचुञ्चवो
गृध्रगोमायवो वञ्चयेयुर्नहि ।
क्षेमदे शान्तिदे हर्षदे श्रीप्रदे
नूतने वत्सरे ते भवेन्मङ्गलम् ॥१२॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

देववाणीमुपेक्ष्य प्रभाभासुरां
येऽवनत्या गता अन्धकूपे नराः ।
तेऽपि गृह्णन्तु शिक्षां सखे ! सत्वरं
नूतने वत्सरे ते भवेन्मङ्गलम् ॥१३॥

दैन्यहीनं दयापूर्णमाशान्वितं
जीवनं कर्मठं ते सदा राजताम् ।
त्वं सुखीः स्याः, लभस्व प्रियं कांक्षितं
नूतने वत्सरे ते भवेन्मङ्गलम् ॥१४॥

ये जना आसते ते कुटुम्बे सखे !
ते प्रसन्नास्समर्था लसेयुस्सदा ।
विश्वमेकं कुटुम्बं च ते राजताम्
नूतने वत्सरे ते भवेन्मङ्गलम् ॥१५॥

अत्र लोके सतो रक्षितुं सर्वदा
दुष्कृतो हर्तुमुत्साहिनस्स्युर्नराः ।
निर्मितिर्नूतना स्यात्सदा शंकरी
नूतने वत्सरे ते भवेन्मङ्गलम् ॥१६॥

नैव याचे धनं, स्वर्गमेवाथवै-
काकिनस्ते न सौख्यं सखे! कामये ।
सन्तु सर्वत्र सर्वे सदा नन्दिता
नूतने वत्सरे ते भवेन्मङ्गलम् ॥१७॥

सन्तु बाला युवानोऽथ वृद्धास्समे
निर्भयाः कर्मठा लोकसेवापराः ।
आदरः कस्यचित्खण्डितो नो भवे-
न्नूतने वत्सरे ते भवेन्मङ्गलम् ॥१८॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

सत्यनिष्ठा जयेल्लेखनी निर्भया
निर्भया वाग् जयेल्लोकसंरक्षिणी ।
साधुभावस्तथा ज्ञानपूतो जये-
न्नूतने वत्सरे ते भवेन्मङ्गलम् ॥१९॥

आर्तरक्षार्थमस्त्राणि शस्त्राणि वै
सन्तु, नैव प्रहर्तुं तथानागसि ।
कण्टकानां च लोकस्य लोपो भवे-
न्नूतने वत्सरे ते भवेन्मङ्गलम् ॥२०॥

येषु चित्तेषु दावानलो भीषणो
द्वेषभावस्य जागर्ति धूधूत्करः ।
जागृयात्तेषु वासन्तिकी श्रीः शुभा
नूतने वत्सरे ते भवेन्मङ्गलम् ॥२१॥

नूतना नूतना येऽपराधाः खलै-
र्नित्यमाविष्क्रियन्ते जगद् बाधितुम् ।
ते समुन्मूलिताः स्युः समाजाद् द्रुतं
नूतने वत्सरे ते भवेन्मङ्गलम् ॥२२॥

वारिवाहः सुकाले समागच्छतात्
सन्तु गावश्च पुष्टाः सवत्साः समाः।
शं स्वकार्येषु लग्नाः समे प्राप्नुयु-
र्नूतने वत्सरे ते भवेन्मङ्गलम् ॥२३॥

क्षेत्रकेष्वन्नमुत्पादितं स्याद्बहू-
द्योगशालास्वथोत्पाद उच्चो भवेत् ।
सन्तु सत्यश्रमाभ्यां समाः सिद्धयो
नूतने वत्सरे ते भवेन्मङ्गलम् ॥२४॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

नैव पश्येदभद्रं नरश्चक्षुषा
नैव चाकर्णयेद्वाप्यभद्रं क्वचित् ।
नैव वाचा भणेद्वाक्यमुद्वेजकं
नूतने वत्सरे ते भवेन्मङ्गलम् ॥२५॥

स्वस्थपुष्टं समेषां शरीरं लसे-
न्मानसं शैवसङ्कल्पपूतं भवेत् ।
सच्चिदानन्द आत्मा स्वरूपं भजे-
न्नूतने वत्सरे ते भवेन्मङ्गलम् ॥२६॥

वाचि विद्या, करे कर्म, दृष्टौ दया
पादयोश्च प्रकृष्टा गती राजतम् ।
सुप्रवृत्तेन्द्रियैस्तोषमीयुर्जना
नूतने वत्सरे ते भवेन्मङ्गलम् ॥२७॥

ये बुभुक्षाहता वस्त्रहीनाश्च ये
सन्ति पादातमार्गे शयानाश्च ये ।
अन्नवस्त्राश्रयान् प्राप्नुयुस्ते द्रुतं
नूतने वत्सरे ते भवेन्मङ्गलम् ॥२८॥

धर्मभाषाविवादा लभेरन् शमं
दुष्कृतिर्लुप्यताम् सत्कृतिर्वर्धताम् ।
नित्यमौदार्यभावो जयेत्क्षुद्रताम्
नूतने वत्सरे ते भवेन्मङ्गलम् ॥२९॥

आयधो व्याधयोऽकालमृत्युस्तथा
पीडयेयुर्न लोकं श्रमाराधकम् ।
कर्म कुर्वञ्छताब्दं नरो जीवता-
न्नूतने वत्सरे ते भवेन्मङ्गलम् ॥३०॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

यत्र साहित्य-संगीत-पूजा भवेत्
सत्कलाशिल्पशास्त्रार्चना वा भवेत् ।
तत्र विघ्नो न कश्चित्समुत्पद्यताम्
नूतने वत्सरे ते भवेन्मङ्गलम् ॥३१॥

सात्त्विका राजसास्तामसाः प्राणिनोऽ
न्योन्यमाश्रित्य कल्याणिनस्स्युस्सदा।
वाचि चित्ते च कार्ये सदेकं वसे-
न्नूतने वत्सरे ते भवेन्मङ्गलम् ॥३२॥

प्रेमभङ्गो न कस्यापि लोके भवेत्
प्रेमिणो विप्रयुक्ता मिलेयुर्मुदा ।
स्युः स्मितास्याः समे फुल्लपद्मोपमा
नूतने वत्सरे ते भवेन्मङ्गलम् ॥३३॥

पीडिता येऽप्यभावैर्मनःक्लेशिभि-
स्ते जयेयुः समस्तानभावान्नराः ।
निष्फला नैव कस्यापि कांक्षा भवे-
न्नूतने वत्सरे ते भवेन्मङ्गलम् ॥३४॥

शैशवं लालितं वार्धकं पूजितं
यौवनं भोगतृप्तं हसेत्सर्वदा ।
त्याग-भोगौ भवेतां सखायौ सदा
नूतने वत्सरे ते भवेन्मङ्गलम् ॥३५॥

येऽपि चिन्तासहस्त्रैः परीताः जनाः
सन्ति पीताननना लुप्तहासस्मिताः ।
सन्तु रक्ताननाः पूर्णकामाश्च ते
नूतने वत्सरे ते भवेन्मङ्गलम् ॥३६॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

जीवनं विश्वसम्पद् बुधैरुच्यते
तच्च विश्वस्य सेवार्थमेवार्प्यताम् ।
सद्विवेकः क्रियात्तस्य रक्षां सदा
नूतने वत्सरे ते भवेन्मङ्गलम् ॥३७॥

पर्वतानां वनानां नदीस्त्रोतसां
निर्झराणामृतूनां दिशां प्राणिनाम् ।
वारिधीनां च चेतः सदा प्रीयताम्
नूतने वत्सरे ते भवेन्मङ्गलम् ॥३८॥

खे जले कौ च वायौ तथा तेजसि
स्त्रग्विणी शान्तिराप्नोतु नित्यं जयम् ।
क्रान्तिरेयात्परं रक्तपातं विना
नूतने वत्सरे ते भवेन्मङ्गलम् ॥३९॥

तावको देश आस्तां सदा रक्षित-
स्तावकं विश्वमास्तां सदा रक्षितम् ।
तावकी कीर्तिरास्तां सदा रक्षिता
नूतने वत्सरे ते भवेन्मङ्गलम् ॥४०॥

स्वाभिमानोऽस्तु ते सर्वदाः रक्षित-
स्तावकी स्यात्प्रतिज्ञा सदा रक्षिता ।
तावकं स्यात्तपो रक्षितं सर्वतो
नूतने वत्सरे ते भवेन्मङ्गलम् ॥४१॥

त्वं हि विश्वेश्वरं विश्व आलोकये-
भूर्भुवः स्वः प्रसन्ना भवेयुश्च ते ।
प्रीयतां ते रमाकान्त आजीवनं
नूतने वत्सरे ते भवेन्मङ्गलम् ॥४२॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

कामना मे वशे पूरणं तद्वशे[१]
ईह आशायुतः कामनापूरणम् ।
शारदाया रमायाः प्रसादोऽस्तु ते
नूतने वत्सरे ते भवेन्मङ्गलम् ॥४३॥

नूतनं वत्सरं वीक्ष्य सम्प्रेषिता
यैरनेकैः सुहृद्भिः शुभाः कामनाः ।
त्वद्दलेनैव तेषां कृतेऽपि ब्रुवे
'नूतने वत्सरे ते भवेन्मङ्गलम्' ॥४४॥

यन्मया नोदितं यच्च काम्यं त्वया
यच्च पथ्यं भवेन्मङ्गलाधायकम् ।
तत्सुलभ्यं भवेत्त्वत्कृते सत्वरम्
नूतने वत्सरे ते भवेन्मङ्गलम् ॥४५॥

वक्तुमास्ते सखे ! भूरि मन्मानसे
किन्तु वीक्ष्य त्वदीयामतिव्यापृतिम् ।
पत्रमत्रैव सम्पूर्णतां प्रापये
नूतने वत्सरे ते भवेन्मङ्गलम् ॥४६॥

❖❖❖

(रचनातिथिः १५-१-१९९०)

---

१. तस्य=ईश्वरस्य वशे

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

वदत नेतारो मनाक्

किं कुरुथ किं वा करिष्यथ वदत नेतारो मनाक् ।
किं मनसि वो वर्तते भो भणत नेतारो मनाक् ॥१॥ध्रु०॥

'अद्य युष्माकं प्रयासैर्देशगौरवमेधते।'
कश्चिदपि वक्तुं किमिच्छति चिन्तयध्वं रे मनाक् ॥२॥

धर्मजातिग्रामभाषावर्णभेदोद्दीपनैः ।
कीदृशीं कृशरां पचध्वे वदत नेतारो मनाक् ॥३॥

जनमनस्सु द्वेषवह्निर्वः प्रयासैर्ज्वालितः।
किमुचितं भवदीयकृत्यं वदत नेतारो मनाक् ॥४॥

छिन्नमुद्यानं भवद्भिः पुष्पगन्धाढ्यं महत् ।
दूयते न च मानसं वो हन्त ! नेतारो मनाक् ॥५॥

नाशितं जनजीवनं पितृसद्मतां नीताः पुरः ।
कारिताः शालाश्च काराः किं न लज्जध्वे मनाक् ॥६॥

रेलयानानां निरसनैर्निग्रहैश्च निरागसाम् ।
किं भवति किं वा भविष्यति ? वदत नेतारो मनाक् ॥७॥

यैर्न दीपाली व्यलोकि स्वादितं न च यौवनम् ।
वैशसात् तेषां न शंकध्वे कथं क्रूरा मनाक् ॥८॥

यौवनं प्रज्वाल्यते, प्रतिभा सतामवहेल्यते।
जनमतं समुपेक्ष्यते, भद्रा बिभिथ चेतसि मनाक् ॥९॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

नैव काशी नैव मथुरा नाप्ययोध्या नो पुरी ।
नैव चोज्जयिनी विधत्ते वो भयं चेतसि मनाक् ॥१०॥

नृषु नृषु च विद्वेषभावो रोपितो निजभाषणैः ।
येऽप्यवाच्या भवदुदन्ता नोद्गिरति तान् कापि वाक् ॥११॥

सौमनस्याधारभूतां भरतवसुधां नित्यशः ।
कालकूटमयीं कुरुध्वे, किं न शंकध्वे मनाक् ॥१२॥

नित्यमेव क्रूरतानृतछद्मभेदाराधकाः ।
कां गतिं यूय गमिष्यथ वदत नेतारो मनाक् ॥१३॥

'स्फोटयथ शासथ'-नियमतः खण्डयथ राष्ट्रैकताम् ।
कुत्र गच्छथ कुत्र यास्यथ ? वदत नेतारो मनाक्॥१४॥

यद्यदाचरथ स्वदेशीये जनेऽत्र प्रत्यहम् ।
किं तदाचरितं कदाचित् आंग्लकुटिलैरपि मनाक् ॥१५॥

देशसेवां कर्तुमागच्छथ कुरुथ यादृच्छिकम् ।
व्यवहृतिः केयं स्फुरति वश्चिन्तयध्वं रे मनाक् ॥१६॥

निर्धना निर्धनतरास्तैस्तैरभावैः क्लेशिताः ।
आढ्यता नवनूतना वो वन्दनीया किं मनाक् ॥१७॥

क्लिश्यते दुष्यति च शुष्यति भिक्षते रोदिति जनः।
अत्थ पिबथ स्वपिथ हृष्यथ! किं न लज्जध्वे मनाक् ॥१८॥

वीक्ष्य देशे कुव्यवस्थां वृत्तिकष्टं हिंसनम् ।
निस्त्रपाः क्रन्दथ हसथ वा ? वदत नेतारो मनाक् ॥१९॥

वस्त्राराहित्यं कुपोषणमत्र वापि महार्घता ।
नित्यमग्रे किमिति धावति ? वदत नेतारो मनाक् ॥२०॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

नो कृषध्वे किन्तु कृषकाणां भवन्तो नायकाः ।
वीक्ष्य युष्मान् किं प्रसीदति कोऽपि सन्ना भुवि मनाक् ॥२१॥

अर्थयन्तारोऽपि यूयं धर्मगुरुगुरवस्तथा ।
काममोक्षविचारका अपि ! बिभिथ रे चेतसि मनाक् ॥२२॥

उपचिताः खलु यैर्भवन्तस्ते भवद्भिर्लुण्ठिताः ।
रे प्रजातन्त्रस्य हन्तारो बिभिथ लोकान्मनाक् ॥२३॥

लुञ्चिता न्यायालया जनता वराकी लुञ्चिता ।
किमपरं भो लुञ्चयिष्यथ वदत नेतारो मनाक् ॥२४॥

अहह ! सज्जनता भवद्भिर्लुण्ठिता व्यापादिता ! ।
लोकयथ भो लोकयथ कीर्तिं स्व नेतारो मनाक् ॥२५॥

देशसेवा लुण्ठनापर्यायभूता वो मते ।
किं न पश्यथ नैजचरितं ? वदत नेतारो मनाक् ॥२६॥

विश्ववन्द्यं शान्तिदूतं चैकनीडं यत्सताम् ।
भारतं तत्कथं लुञ्चथ, वदत नेतारो मनाक् ॥२७॥

भङ्क्थ चित्तं भङ्क्थ वित्तं भङ्क्थ विश्वासं नृणाम् ।
किं न नैजं भङ्क्थ गर्द्धं वदत नेतारो मनाक् ॥२८॥

चोरयथ जनसौमनस्यं चोरयथ जनजीवनम् ।
चोरयिष्यध्वे स्वकीयं भ्रष्टकृत्यं किं मनाक् ॥२९॥

किन्नु परवञ्चनविधिज्ञा मातृभूपरितापकाः ।
नरकरचनापाटवं वो नो दुनोति मनो मनाक् ॥३०॥

यत्र यत्रालोक्यते शान्तिर्भवद्भी रक्षिता ।
उप्यते कलहस्य बीजं तत्र, जिह्रीथ न मनाक् ॥३१॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

गिरथ कोषं गिरथ पदवीं गिरथ सर्वं सुविधया ।
किं स्वतृष्णामपि गरिष्यथ ? वदत नेतारो मनाक् ॥३२॥

तनुथ देशे सङ्कटं कलहं तथातङ्कं स्वतः ।
किं न तनुथ स्वीयचेतसि राष्ट्रभक्तिं रे मनाक् ॥३३॥

चिन्तयथ नित्यं स्वकीयं हितमपरिमितमेव रे।
चिन्तयध्वं देशहितमपि लोलुपा यूयं मनाक् ॥३४॥

युष्मदीयैर्नित्यकृत्यै राष्ट्रदेवी लज्जिता।
निस्त्रपा जीवथ न मज्जथ चुलुकवारिणि रे मनाक् ॥३५॥

हिंसया अनृतेन पैशुन्येन भवतां जीविका ।
कोऽपि सम्बन्धोऽस्ति किं सत्यश्रमाभ्यां वो मनाक् ॥३६॥

सन्ति ये लालाटिका आस्थाननलिनीका बकाः ।
कुत्र युष्मान् पातयेयुश्चिन्तयध्वं रे मनाक् ॥३७॥

पादयोः प्रणिपत्य घोणाघर्षणं कृत्वा मुहुः ।
याचितं यन्मे मतं तस्यादरं रक्षत मनाक् ॥३८॥

दूरदर्शनतन्त्रतो लब्ध्वा विभुत्वं प्रत्यहम् ।
भाष्यते यदनर्गलं रे वित्थ तस्यार्थं मनाक् ॥३९॥

मनसि वचसि च कर्मणि प्रविरुद्ध्यते यैः प्रतिपलम् ।
सन्ति सन्तो वै कियन्तो वोऽतिरिच्य वदत मनाक् ॥४०॥

नैककविभिर्नवपुराणैर्यस्य महिमा गीयते ।
भारतं तत्किं न रक्षथ, वदत नेतारो मनाक् ॥४१॥

यस्य रक्षायै भटा उत्साहिनः खे भुवि जले ।
यूयमपि तद्देशरक्षार्थं कुरुत यत्नान् मनाक् ॥४२॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

येऽप्यपश्यन्नैकतायामेकतां भारतभुवि ।
भवत तेष्वपि भो कृपालव आत्मपूर्वजनृषु मनाक् ॥४३॥

'यातु देशो ह्यन्धकूपे रक्षितं स्यान्मे मतम् ।'
इति विचारपरम्परां स्वां त्यजत नेतारो मनाक् ॥४४॥

चिनुथ यूयं पूर्वजानां दुर्गुणानेव, क्षणम् ।
सद्गुणानपि किन्तु तेषां चिनुथ नेतारो मनाक् ॥४५॥

किं तुदध्वे राष्ट्रदेवं किं तुदथ देशावनिम् ।
संस्कृतिं नः किं तुदध्वे वदत नेतारो मनाक् ॥४६॥

किं कृतघ्नैर्लप्स्यते कीर्तिर्यशो वा निस्त्रपैः ।
मनसि चिन्तयथ क्वचिद् एकान्त आसीना मनाक् ॥४७॥

शासनासन्दीमवाप्य व्रजत नो गर्वं क्षणम् ।
आगते विपरीतकाले कोऽपि रक्षति किं मनाक् ॥४८॥

ये समागच्छन्ति भङ्क्तुं वोऽभिमानं द्वारि वः ।
किं नु शक्ष्यथ रोद्धुमेतान् ? वदत नेतारो मनाक् ॥४९॥

किरथ जनसम्मर्दं निरागसमात्मनोऽहङ्कारतः ।
किमिति तच्छक्तिं करिष्यथ वदत नेतारो मनाक् ॥५०॥

ध्वसितुं मे भारतं यूयं स्थिता यदि तत्पराः ।
निश्चितं यूयं विनंक्ष्यथ, सावधाना रे मनाक् ॥५१॥

प्राक्तना नेतार आसंस्त्यागशीलाः प्रायशः ।
अद्यतननेतार आध्वे तत्सदृक्षाः किं मनाक् ॥५२॥

ते मृता अपि पूजनीया यैर्हि देशः सेवितः ।
जीविता अपि किन्तु यूयं पूजनीयाः किं मनाक् ॥५३॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

भारभूता मातृभूमेर्यूयमेतन्मे मतम् ।
अत्र किं ब्रूते मनो वो वदत नेतारो मनाक् ॥५४॥

अद्य युष्माकं सुकृत्यैर्नित्यनूतनशोभनैः !
लोक्यते यद्दिग्दिगन्तं तद्यशः पश्यत मनाक् ॥५५॥

ये कविम्मन्या यशो वो दूषयन्ति धिगस्तु तान् ।
न्याय्यमार्गान्न स्वकीयात् प्रविचलत धीरा मनाक् ॥५६॥

उपकृतं बहु तत्र किं कथ्येत जीवत रे चिरम् ।
कुत्र वो दिव्यं यशः स्वल्पाक्षरा क्व च मेऽत्र वाक् ॥५७॥

(रचनातिथिः २९-१०-१९९०)

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

किं जीवनं ते !

मनसि चिन्तय सखे ! किं जीवनं ते !
रहसि शीलय सखे ! किं जीवनं ते !

न वा स्वार्थः परार्थो नापि बन्धो !
त्वया चेत्साध्यते, किं जीवनं ते ! ॥१॥

न साहित्यं, न संगीतं, कला वा
न रासिक्यं च ते, किं जीवनं ते ! ॥२॥

न दाक्षिण्यं, न सौशील्यं, न कीर्तिः
न सेवा, नो दया, किं जीवनं ते ! ॥३॥

विपदि धैर्यं, तथाभ्युदये क्षमा नो
न वा युधि विक्रमः, किं जीवनं ते ! ॥४॥

गुरोः पित्रोर्न चरणा वन्दिताश्चेत्
अहंकारात्त्वया, किं जीवनं ते ! ॥५॥

न कश्चित्प्रेमबन्धे त्वामबध्नात्
वृथाजीविन् सखे ! किं जीवनं ते ! ॥६॥

त्वया यदि शासनासन्दीमवाप्य
न लोको रंजितः, किं जीवनं ते ! ॥७॥

अहो दैनन्दिनी मतयाचना ते
वनीपक नेतृवर ! किं जीवनं ते ! ॥८॥

न निःश्वसितं, न रुदितं, मूर्च्छितं नो
प्रियाविरहे त्वया, किं जीवनं ते ! ॥९॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

वियोगे ते जनो नो कोऽपि खिन्नः
न योगे प्रीतिमान्, किं जीवनं ते ! ॥१०॥

मनोभावो न निर्द्वन्द्वं प्रकटितः
कपटचारिंस्त्वया, किं जीवनं ते ! ॥११॥

विषामृतयोर्विवेकं नैव कर्तुम्
त्वमीशश्चेत्तदा किं जीवनं ते ! ॥१२॥

न दुष्टास्तर्जिताः स्वीयेन महसा
न सन्तो मानिताः, किं जीवनं ते ! ॥१३॥

करालः काल इव नाभासि चेत्त्वम्
कुकृत्यानां कृते, किं जीवनं ते ! ॥१४॥

त्वया स्वान्तःसुखार्थं देववाणी
न पठिता, न श्रुता, किं जीवनं ते ! ॥१५॥

प्रभुः कर्ता च भर्ता चैव हर्ता
न चेदाराधितः, किं जीवनं ते ! ॥१६॥

निपीतं नैव मधु प्रेम्णः कदाचित्
विरस मृल्लोष्ठ रे! किं जीवनं ते ! ॥१७॥

न रसिता रसवशात्त्वत्पार्श्वमाप्ता
रहसि काचित्त्वया, किं जीवनं ते ! ॥१८॥

वृथा चन्द्रो वृथा मधुयामिनीयम्
न पार्श्वे ते प्रिया, किं जीवनं ते ! ॥१९॥

स्वदेशः सेवितो न प्राणपणतः
विकत्थन धूर्त रे, किं जीवनं ते ! ॥२०॥

मुखे मधु ते मनसि ते कालकूटः
तृणावृत कूप रे ! किं जीवनं ते ! ॥२१॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

कृतघ्नत्वं कदाचारः पिशुनता
इमे त्वद्बान्धवाः, किं जीवनं ते ! ॥२२॥

स्वयं नष्टः परान्नाशयसि नित्यम्
व्यसनशतशालिनः किं जीवनं ते ! ॥२३॥

क्षणे रुष्टः क्षणे तुष्टः सखे ! त्वम्
अहो चलचित्त रे ! किं जीवनं ते ! ॥२४॥

मुखे ते मक्षिकाः कुर्वन्ति भिन्-भिन्
न चोड्डाययसि रे ! किं जीवनं ते ! ॥२५॥

सुरक्षितमस्ति नो पदमपि पलार्थम्
अहो मन्त्रिप्रवर ! किं जीवनं ते ! ॥२६॥

प्रदर्शन - गालिका - कार्यावरोधैः
अहो प्राचार्यवर ! किं जीवनं ते ! ॥२७॥

प्रकृत्यंके न ते क्रीडा बभूव
सदा हर्म्यस्थ रे ! किं जीवनं ते ! ॥२८॥

न दुग्धं माहिषं व्यायामिनस्ते
(पयो गव्यं न चेद् व्यायामिनस्ते)
सुलभमास्तेऽन्वहं ! किं जीवनं ते ! ॥२९॥

न चेत् पार्श्वे सखे ते स्वास्थ्यवित्तम्
धनैरेतैरलं, किं जीवनं ते ! ॥३०॥

उपायैस्तैश्च तैर्धृतमपि मनस्ते
प्रियां नोपैति चेत् किं जीवनं ते ! ॥३१॥

उपालम्भो न चानुनयोऽपि तुभ्यं
अहो प्रणयिन् युवक! किं जीवनं ते ! ॥३२॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

तवागमने तथा गमने न चर्चा
वराक प्राघुणिक ! किं जीवनं ते ! ॥३३॥

परोक्षे शत्रुभिर्मित्रैस्तटस्थैः
न चेच्छ्लाघ्योऽसि रे, किं जीवनं ते ! ॥३४॥

अयं श्रोता न बोधति भाषणं ते
अनर्गलजल्पिनः किं जीवनं ते ! ॥३५॥

न दीनाः सेविताः शुद्धेन मनसा
कुनेतॄन् ! सेवसे, किं जीवनं ते ! ॥३६॥

न माता जन्मभूर्बन्धो ! मता चेत्
किमेतेनायुषा, किं जीवनं ते ! ॥३७॥

न दृष्टं भारतं स्निग्धेन मनसा।
अहो विश्वभ्रमिन् ! किं जीवनं ते ! ॥३८॥

कृपेशस्याशिषो यदि वा गुरूणाम् ।
न लब्धा जीवने, किं जीवनं ते ! ॥३९॥

त्वयार्वाचीनसंस्कृतमपि न पठितम् ?
न दूर्वालोकिता ? किं जीवनं ते ! ॥४०॥

रमाकान्तो ऽभिराजो वा रथो वा ।
श्रुतो यदि न त्वया, किं जीवनं ते ! ॥४१॥

(रचनातिथिः २९-३-१९९१)

न शिष्यः कोऽपि सम्भृतः, वाद्यशास्ते!
अये वद सद्गुरो! किं जीवनं ते?
(विविद्याविद्यागुरो)

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

ब्रूहि जगन्नाथस्वामिन् !

(१)

किं भवति जगति ते ब्रूहि जगन्नाथस्वामिन् !
किं वा भवितान्यद् ब्रूहि जगन्नाथस्वामिन् !

(२)

माला भूता व्याली जीवनलीलान्तकरी
प्रणतिर्भूता प्रहृतिर्जनविश्वासान्तकरी
कुसुमानि कुर्वते कालदूततां निःशंकम्
अनृतं सत्यं तर्जयति जगन्नाथस्वामिन् !
किं भवति जगति ते ब्रूहि जगन्नाथस्वामिन् !

(३)

ये शुभ्रकञ्चुका अवलोक्यन्ते नेतारः
प्रायशः प्रजातन्त्रस्य सन्ति ते हन्तारः
पूजादीपा गृहदाहकारिणो दीप्यन्ते
रक्षकाः सन्ति भक्षका जगन्नाथस्वामिन् ।
किं भवति जगति ते ब्रूहि जगन्नाथस्वामिन् !

(४)

जीवनं विश्वसम्पद्बुधजनैः पुरा कथितं
दृश्यते भीषितं पदे पदे मथितं क्वथितम्
अवहेल्यन्ते सज्जनाः दुर्जनैः पदे-पदे
दूयते मनस्ते किं न जगन्नाथस्वामिन् ?
किं भवति जगति ते ब्रूहि जगन्नाथस्वामिन् !

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(५)

या विश्वबन्धुता साभिमानमुद्घुष्टासीत्
महिमानमहिंसा या च जगति भजमानासीत्
यः सत्यपरिश्रमजयो गीयते स्मास्माभिः
क्वासौ विलीयते ब्रूहि जगन्नाथस्वामिन् !
किं भवति जगति ते ब्रूहि जगन्नाथस्वामिन् !

(६)

दीनाश्च नाद्य नारायणतां गमिता लोके
नार्यश्च नैव पूज्यन्ते तव भक्तैर्लोके
किं किं दर्शयसि प्रभो जगद्बीभत्सतां
कुरु कृपां सपदि संसृतौ जगन्नाथस्वामिन् !
किं भवति जगति ते ब्रूहि जगन्नाथस्वामिन् !

(७)

अमृतं विषायते, भारायते तथा ज्ञानं
वरदानं शापायते तमिस्रायते दिनम्
स्रोतो मरुभूमीयति सेवा लुण्ठना मता
वार्ता युद्धीयति कथं जगन्नाथस्वामिन् !
किं भवति जगति ते ब्रूहि जगन्नाथस्वामिन् !

(८)

हे विश्वरूप ! नैजं रूपं किं नो पश्यसि
हे दीनदयालो ! दीनजनान् किं नो पश्यसि ?
हे सर्वव्यापक ! किं सहसे सर्वस्य शुचं
कुरु नः सत्पथगानाशु जगन्नाथस्वामिन् !
किं भवति जगति ते ब्रूहि जगन्नाथस्वामिन् !

●

(रचनातिथिः ६-६-१९९१)

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

वन्दनीयास्ते !

इयं स्वर्गाधिका मे मातृभूमिर्वन्दनीयास्ते ।
परं यास्या दशाद्यत्वे, कथय किं वन्दनीयास्ते ? ॥१॥

चतुर्दिक् दृश्यते यासौ प्रगतिरभिनन्दनीयास्ते ।
चतुर्दिक् दुःस्थितिर्यालोक्यते, किं वन्दनीयास्ते ? ॥२॥

जना ये भारतं पुष्णन्ति, नित्यं वन्दनीयास्ते ।
अथो तत्पांसुलं कुर्वन्ति ये, किं वन्दनीयास्ते ? ॥३॥

जना एकत्वसूत्रे यैर्निबद्धा वन्दनीयास्ते ।
जनान् ये योधयन्ति प्रत्यहं किं वन्दनीयास्ते ! ॥४॥

अभिघ्नन्तो रिपून् युद्धे चलन्तो वीरगत्याग्रे ।
दिवं ये देशरक्षार्थं प्रयाता वन्दनीयास्ते ! ॥५॥

न ये देशस्य किन्तु स्वीयवंशस्यैव दारिद्र्यम् ।
अपाकर्तुं यतन्ते नेतृवर्या वन्दनीयास्ते ? ॥६॥

अतस्मिंस्तस्य बुद्धिं ये दधाना वन्दनीयास्ते ।
पुनर्ये तत्र तद्बुद्धिं दधति, नो वन्दनीयास्ते ? ॥७॥

नहि प्रत्यक्षमनुमानं न शाब्दं नेषदुपमानम् ।
प्रमाणं मन्यते या सा मतिः किं वन्दनीयास्ते ? ॥८॥

चिरान्निटिले यदासीत् स्थापितं केनापि सांहकृति ।
कलंकं मार्जितं यैस्ते केषां वन्दनीयास्ते ! ॥९॥

करामलकं न पश्यन्ती खपुष्पं चैव पश्यन्ती ।
असौ लोकोत्तरा दृष्टिः सखे ! ते वन्दनीयास्ते ? ॥१०॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

पुरा दुर्भावनादीप्तिस्ततः सद्भावनायात्रा !
इयं नीतिर्मता येषां जना नो वन्दनीयास्ते ! ॥११॥

प्रजासु प्रत्यहं कलहं विवर्धयसे स्वपोषार्थम् !
इयं वृत्तिः सखे नेतस्त्वदीया वन्दनीयास्ते ! ॥१२॥

अहिंसाचत्वरे हिंसा, सहिष्णुत्वाजिरे द्वेषः ।
क्वचिद् गृहयुद्धघोषः, किं दशेयं वन्दनीयास्ते ? ॥१३॥

अहो राष्ट्रध्वजं गणतन्त्रदिवसं ये बहिष्कुर्युः ।
किमेते भारतीयाः ? भारतीयैर्वन्दनीयास्ते ? ॥१४॥

प्रियं सत्यं हितं सारं वचो या वक्ति सा वाणी ।
न ते वन्द्या, परं विपरीतवक्त्री वन्दनीयास्ते ? ॥१५॥

यमेवारुह्य यात्रां कुर्वते पारं प्रयातुं तम् ।
प्लवं विच्छेत्तुकामा बालिशा ये, वन्दनीयास्ते ? ॥१६॥

चतुर्दिक् दन्दशूका निर्भयाः फूत्कुर्वते लोके ।
गरुत्मन् ! मौनवृत्तिस्ते किमेषा वन्दनीयास्ते ? ॥१७॥

परीते वह्निना देशे ज्वलति धूधूधधग्धगिति ।
असौ तूष्णीकता ते किं मनागपि वन्दनीयास्ते ? ॥१८॥

न जाने केन सन्दीप्तात्र हिंसा ताण्डवं कुरुते ।
करे धृत्वा करं ये संस्थिताः, किं वन्दनीयास्ते ? ॥१९॥

इयं हिंसासुरी व्याप्नोति हा ! देशं समस्तं मे ।
इयं दैनन्दिनी शोच्या स्थितिः किं वन्दनीयास्ते ? ॥२०॥

उपद्रविणां कृते शस्त्रास्त्रसंघातोऽन्यदेशीयः ।
कथं देशे प्रविष्टः ? किं सुरक्षा वन्दनीयास्ते ? ॥२१॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

उपद्रविभिः कृता निर्दोषनृणां जीवतां दाहाः ।
इमे रुधिरप्रवाहाः किं प्रशासक ! वन्दनीयास्ते ? ॥२२॥

रमन्ते सांख्यपुरुषाभा जनाः स्वासन्दिकायां ये ।
अकर्तारश्च पश्यन्तोऽखिलं, नो वन्दनीयास्ते । ॥२३॥

जनं विनिपात्य दुर्घोरेऽसुरक्षावह्निकुण्डे ये ।
सुरक्षामण्डले गुप्ता रमन्ते, वन्दनीयास्ते ? ॥२४॥

क्वचिद्ये धर्मनिरपेक्षाः क्वचिद्धर्मस्य वक्तारः ।
क्वचिद्धर्मावतारा नायका नो वन्दनीयास्ते ? ॥२५॥

'कथं निर्वाचने भाविन्यहं विजयी भवामी'ति ।
इदं येषां परं लक्ष्यं, न केषां वन्दनीयास्ते ! ॥२६॥

पदं मद्यं धनं मानं यशो लब्धुं मृषा ब्रुवते ।
वराका 'बुद्धिजीवी'संज्ञका ये, वन्दनीयास्ते ! ॥२७॥

तिलं ताडं, समुद्रं गोष्पदं, मेरुं कणं कर्तुम् ।
समर्था आसते ये सूचनादाः, वन्दनीयास्ते ! ॥२८॥

अहिंसा सत्यमुपकारः श्रमः प्रेमा मतो धर्मः ।
अतो ये सन्ति निरपेक्षा इदानीं वन्दनीयास्ते ! ॥२९॥

यया नीत्या समे सद्भावसूत्रे गुंफिता न स्युः ।
असौ नीतिः किमस्माकं समेषां वन्दनीयास्ते ? ॥३०॥

नरे शठतां दधाना सत्कृतिं दूरे प्रकुर्वाणा ।
इयं या राजनीतिर्दूरतो मे वन्दनीयास्ते ! ॥३१॥

इमे प्राक्पादयोः पतितास्दनु ये पृष्ठमांसादाः ।
खला मशका इवासृक्चूषका नो वन्दनीयास्ते ! ॥३२॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

यदीच्छसि भद्र! भद्रं दुर्जनान् वन्दस्व नित्यं त्वम् ।
अरे ! ये सज्जनास्ते सज्जनाः, किं वन्दनीयास्ते ! ॥३३॥

प्रजाशिक्षासुरक्षाभरणरूपं स्वीयकर्तव्यम् ।
न पालयितुं समर्थाः शासकाः, किं वन्दनीयास्ते? ॥३४॥

क्वचिद्वित्तीयघोटालाः, क्वचित्क्रयविक्रयोत्कोचाः ।
क्वचिच्चान्ये ह्यवाच्या येऽप्युदन्ता वन्दनीयास्ते ? ॥३५॥

कदाचित्खाडकूचर्चा कदाचिज्जंगजूचर्चा ।
इयं ग्रा दुर्दशालोक्या किमेषा वन्दनीयास्ते ? ॥३६॥

न यद्दातुं समर्थस्तत्कृते कुरुषे प्रतिज्ञां त्वम् !
अपूर्या किं प्रतिज्ञा तावकीना वन्दनीयास्ते ? ॥३७॥

अहो पूजास्थलं निर्मासि, पूजां नैव कुरुषे त्वम् !
कथय भक्तप्रवर ! ते भक्तिरेषा वन्दनीयास्ते ? ॥३८॥

ययोद्गिरतो विषं स्वस्मिन्निमान् कुम्भीनसान् सहसे !
अये चन्दनतरो ! सैषा धृतिस्ते वन्दनीयास्ते । ॥३९॥

अये पञ्चानन ! त्वां कुक्कुरोऽयं प्रत्यहं निन्दति ।
सहानेन त्वदीया मित्रता किं वन्दनीयास्ते ? ॥४०॥

कवेर्व्याजोक्तिरन्योक्तिः स्वभावोक्तिश्च वक्रोक्तिः ।
अनुक्त्वा किञ्चिदपि सर्वं भणन्ती वन्दनीयास्ते ॥ ॥४१॥

जना देशस्य रक्षार्थं तथा विश्वस्य कुशलार्थम् ।
यतन्ते ये न निजकृत्यैः, कथय किं वन्दनीयास्ते ? ॥४२॥

नरा नार्योऽबलाः सबलाः कनिष्ठा मध्यमा ज्येष्ठाः ।
स्वदेशं ये न वन्दन्ते मताः किं वन्दनीयास्ते ? ॥४३॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

स्वदेशं निन्दयन्तो विश्वबन्धुत्वस्य वक्तारः ।
फलं कांक्षन्ति ये मूलं विना, नो वन्दनीयास्ते ! ॥४४॥

यजन्ते ये विधानोक्तैः स्वकर्मभिरात्मजन्मभुवम् ।
नराः कुत्रापि निवसन्तो न केषां वन्दनीयास्ते ? ॥४५॥

बुधा वीराः कृषाणाः कार्मिका उद्योगिनः कवयः ।
कलाकाराः स्वदेशोन्नायका ये वन्दनीयास्ते । ॥४६॥

निबद्धास्ताडिता निहता तथा विकलाङ्गतां याताः ।
जना ये देशरक्षार्थं, न केषां वन्दनीयास्ते ? ॥४७॥

जना ये मातृभूमेर्वन्दनार्थं वन्दिनो जाताः ।
स्मितास्याः कालपाशं ये चुचुम्बुर्वन्दनीयास्ते ! ॥४८॥

अये मे मातृभूमे ! ते महिम्नो रक्षणार्थं ये ।
बलिं चक्रुः स्व सर्वस्वं, न केषां वन्दनीयास्ते ? ॥४९॥

जननि ! ये त्वां नराः क्षतविक्षतां कर्तुं समीहन्ते ।
कृतघ्नाः कस्य वा पापीयसो वद वन्दनीयास्ते ? ॥५०॥

अयं स्वातन्त्र्यसहकारः सदा सफलः समृद्धः स्यात् !
स्वरक्तैः सेचितोऽयं यैर्न केषां वन्दनीयास्ते ? ॥५१॥

रमाकान्त ! व्यथां देशस्य विश्वस्याथ निजकृत्यैः ।
जना ये वर्धयन्ति प्रत्यहं किं वन्दनीयास्ते ? ॥५२॥

न शब्दो नैव चार्थो न ध्वनिर्नैवास्त्वलंकारः ।
तथापीयं कवे ! कविता त्वदीया वन्दनीयास्ते ! ॥५३॥

(रचनापूर्तितिथिः १४.१.१९९३ ई०)

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

मदीयकविते ! कुरुष्व गानम्

सरस्वतीपादपद्मसेवा
यदीयमास्ते परं हि लक्ष्यम् ।
बुधाग्रगाणामतन्द्रितानां
मदीयकविते ! कुरुष्व गानम् ॥१॥

कदापि वागर्थनाम येषां
प्रयुक्तमस्त्रं वृथा न हि स्यात् ।
अलोकसामान्यसत्कवीनां
मदीयकविते ! कुरुष्व गानम् ॥२॥

स्वरश्रुतिग्रामरागबन्धै-
रपूर्वसृष्टेः सुसर्जकानाम् ।
शुभाय संगीतसाधकानां
मदीयकविते ! कुरुष्व गानम् ॥३॥

मृदाश्मना काष्ठखण्डकैर्वा
सृजन्ति ये नूतनां स्वजगतीम् ।
यशस्विनां शिल्पिनां हि तेषां
मदीयकविते ! कुरुष्व गानम् ॥४॥

सुखं धनं स्नेहबन्धनानि
स्वदेशसौख्याय ये त्यजन्ति ।
हुतात्मनां नित्यमेव तेषां
मदीयकविते ! कुरुष्व गानम् ॥५॥

परोपकारव्रतं पवित्रं
सदैव ये पालयन्ति हृष्टाः ।
सुपूजितानां नृणां हि तेषां
मदीयकविते ! कुरुष्व गानम् ॥६॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

निजोपदेशैर्मनोऽन्धकारं
विधूय मे शिष्यसन्ततीनाम् ।
जयन्ति, तेषां मुदा गुरूणां
मदीयकविते ! कुरुष्व गानम् ॥७॥

स्वतन्त्रतायज्ञदीक्षितानां
चिराय कारासु पीडितानाम् ।
मृतिंवराणां नरोत्तमानां
मदीयकविते ! कुरुष्व गानम् ॥८॥

रिपोः करान्मोचयाम्बभूवुः
स्वमातरं भारतावनिं ये ।
विशिष्य तेषां नृणां समेषां
मदीयकविते ! कुरुष्व गानम् ॥९॥

मनुष्यतां रक्षितुं स्वयत्नै-
रनुक्षणं शोधतत्पराणाम् ।
प्रबुधवैज्ञानिकव्रजानां
मदीयकविते ! कुरुष्व गानम् ॥१०॥

सहर्षस्त्रशीर्षं सहस्त्रहस्तं
सहस्त्रपादं जनं भजन्तः ।
समुद्यमा ये लसन्ति तेषां
मदीयकविते ! कुरुष्व गानम् ॥११॥

विषह्य शीतोष्णवर्षकष्ट-
प्रकोपमप्यन्नदायकानाम् ।
तपस्विनां क्षेत्रकर्षकाणां
मदीयकविते ! कुरुष्व गानम् ॥१२॥

उदन्वदाकाशपर्वतेषु
स्वदेशरक्षाव्रतस्थितानाम् ।
रणोद्भटानां मुदा भटानां
मदीयकविते ! कुरुष्व गानम् ॥१३॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

विभिन्नखेलासु कीर्तिमानैः
स्वदेशसम्मानवर्धकाणाम् ।
जितेन्द्रियाणां प्रशस्ययूनां
मदीयकविते ! कुरुष्व गानम् ॥१४॥

प्रसन्नवक्त्राः सदासते ये
दरिद्रतायामपि प्रकामम् ।
विशिष्य तेषां श्रमव्रतानां
मदीयकविते ! कुरुष्व गानम् ॥१५॥

स्वकीयचरितैर्मनस्सु पित्रोः
प्रकामसन्तोषदायका ये ।
सुता जगद्भूषणानि, तेषां
मदीयकविते ! कुरुष्व गानम् ॥१६॥

असज्जनानां कुनायकानां
कृतघ्न - दुर्वृत्त - वञ्चकानाम् ।
विहाय चर्चां, मनस्विनां त्वं
मदीयकविते ! कुरुष्व गानम् ॥१७॥

सदा प्रजातन्त्ररक्षकाणां
स्वकार्यनिर्वाहतत्पराणाम् ।
प्रदर्शकानां सृतेरभीते-
र्मदीयकविते ! कुरुष्व गानम् ॥१८॥

स्वपाणिपल्लवमुदारकल्पं
न कुत्रचिद् ये प्रसारयन्ति ।
नृणां सदायाचितव्रतानां
मदीयकविते ! कुरुष्व गानम् ॥१९॥

कुरीतयो वा कुनीतयो वा
जगत्यनिष्टं प्रपूरयन्त्यः ।
विलोपिता यैः, सभक्ति तेषां
मदीयकविते ! कुरुष्व गानम् ॥२०॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

स्वकीयवर्णं स्वरं भविष्णुं
विधातुकामासि ? तर्हि नूनम् ।
तपोधनानां जगद्गुरूणां
मदीयकविते ! कुरुष्व गानम् ॥२१॥

'सदैव सर्वे भवन्तु सुखिनः
सदैव सर्वे निरामयाः स्युः ।'
मनोरथस्यास्य पोषकाणां
मदीयकविते ! कुरुष्व गानम् ॥२२॥

कुटुम्बमेकं जगद्विधातुं
जनाः सदा ये प्रयत्नशीलाः ।
प्रहृष्य तेषां महात्मनां त्वं
मदीयकविते ! कुरुष्व गानम् ॥२३॥

यदीच्छसि त्वं जनिं स्वकीयां
सदर्थितां कर्तुमार्यशीले !
तदा महिम्नां स्वमातृभूमे-
मदीयकविते ! कुरुष्व गानम् ॥२४॥

अमन्दमानन्दमाप्तुकामा
परेशलीलाब्धिमौक्तिकानाम् ।
कदाचिदेकान्तवासमाप्ता
मदीयकविते ! कुरुष्व गानम् ॥२५॥

(रचनातिथिः २६-१२-१९९३)

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

वन्द्यतां काऽपि सा शासनासन्दिका !

(१)

जन्मजन्मान्तरीयं स्वकीयं परं
वैरभावं परित्यज्य यस्या वशात् ।
एकतां यान्ति नेतार एकक्षणे
वन्द्यतां काऽपि सा शासनासन्दिका ॥

(२)

'वर्तमानार्थनीतिः परित्यज्यताम्'
नैकशो यैरिदं वाक्यमुद्घोषितम् ।
तेऽपि यल्लीलया तां भणन्त्युत्तमां
वन्द्यतां काऽपि सा शासनासन्दिका ॥

(३)

यां विधातुं करस्थां न किं किं कृतं
चातुरीभ्राजितैर्नेतृवर्यब्रुवैः ।
यां समासाद्य विस्मर्यते तैर्जनो
वन्द्यतां काऽपि सा शासनासन्दिका ॥

(४)

लक्षकोट्यर्बुदानामहो वञ्चनं
शान्तभावेन यां प्राप्य कर्तुं क्षमम् ।
यां श्रितैश्छन्ददात्री प्रजा पीड्यते
वन्द्यतां काऽपि सा शासनासन्दिका ॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(५)

दूषणोद्घोषणं सद्गुणानां चये
सद्गुणोद्घोषणं दुर्गुणानां चये ।
यत्प्रभावाद्विधातुं सुशक्यं भवेद्
वन्द्यतां काऽपि सा शासनासन्दिका ॥

(६)

वञ्चनं मित्रघातस्तथा दस्युता
निस्त्रपत्वं कृतघ्नत्वमित्यादयः ।
दुर्गुणाः वन्द्यतां यान्ति सद्यो यया
वन्द्यतां काऽपि सा शासनासन्दिका ॥

(७)

धर्मकामार्थमोक्षोपदेशाकराः
सर्वविद्याचणाः सत्कलाचुञ्चवः ।
अक्षरज्ञानशून्या अपि स्युर्यया
वन्द्यतां काऽपि सा शासनासन्दिका ॥

(८)

देशसेवां विधातुं य आयान्त्यहो
तेऽन्यथाभावमाप्ता न किं कुर्वते।
यामधिष्ठातुकामा अधिष्ठाय वा
वन्द्यतां काऽपि सा शासनासन्दिका ॥

(९)

यं स्वतन्त्रं विधातुं हुतं जीवनं
देशभक्तैरसंख्यैर्विलम्बं विना ।
तस्य देशस्य चिन्ताऽपि हेया यया
वन्द्यतां काऽपि सा शासनासन्दिका ॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(१०)

पण्डितैर्योद्धृभिर्वाणिजैः कार्मिकैः
सर्वकैरेव याद्यत्व आराध्यते ।
सर्वसौख्यप्रदात्री समेषां नृणां
वन्द्यतां काऽपि सा शासनासन्दिका ॥

(११)

केनचिद् दृश्यतामस्मदीया दशा
स्थापिता मूर्ध्नि येऽस्माभिरुत्साहिभिः ।
हन्त ! तैरेव वञ्च्यामहे यद्वशात्
वन्द्यतां काऽपि सा शासनासन्दिका ॥

(रचनातिथिः २६-६-१९९६)

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

तं सुभाषं स्मरामो वयं सादरम्

(१)

जानकीनाथपुत्रस्तथाधीतिमान्
तेजसः पुञ्ज आशैशवाद्यो बभौ ।
मातृभूस्वास्थ्यसंवर्धनायागदं
तं सुभाषं स्मरामो वयं सादरम् ॥

(२)

'आइ सी एस' साफल्यमाप्त्वाप्यहो
शासनासन्दिकानादरं योऽकरोत् ।
मातृभूम्यर्चनं यस्य पुण्यव्रतं
तं सुभाषं स्मरामो वयं सादरम् ॥

(३)

यस्य चाध्यक्षतायां मिलित्वा जनैः
'पाटलीपुत्र-प्रस्ताव' आक्षिप्यत ।
नूतनान्दोलनं येन सञ्चालितं
तं सुभाषं स्मरामो वयं सादरम् ॥

(४)

नैव दैन्यं न वा याचनाप्यार्जवं
नीतिरास्ते खलानां पुरः सन्नृणाम् ।
शक्तिराराधनीयेति यस्यास्ति धी-
स्तं सुभाषं स्मरामो वयं सादरम् ॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(५)

येन चाज़ाद हिन्देति नाम्ना बलं
योजयित्वाद्भुतं कर्म सम्पादितम् ।
वीरचेतोमयूराम्बुदं हर्षदं
तं सुभाषं स्मरामो वयं सादरम् ॥

(६)

'दीयतां मे स्वरक्तं भवद्भिस्समै-
रात्मतन्त्र्यं भवद्भ्यो मया दास्यते ।'
आजुहावेति यो भारतीयान् जनान्
तं सुभाषं स्मरामो वयं सादरम् ॥

(७)

यस्य चात्यन्तमोजःप्रदैर्भाषणैः,
पारतन्त्र्यार्दिता भारतीया जनाः ।
कर्तुमैच्छन् स्वदेशं स्वतन्त्रं द्रुतं
तं सुभाषं स्मरामो वयं सादरम् ॥

(८)

'एत दिल्ली' मिति प्रोद्गता यस्य वाग्
भारतीयान् समुत्साहिनोऽकारयत् ।
यं ग्रहीतुं न शक्तास्तथा चाङ्ग्लाः
तं सुभाषं स्मरामो वयं सादरम् ॥

(९)

यस्य भक्तैरिदानीमपि स्मर्यते
जृम्भितं वीरभावस्य यस्याद्भुतम् ।
योऽमरो राजते मातृभूमेः सुतः
तं सुभाषं स्मरामो वयं सादरम् ॥

(रचनातिथिः १०-८-१९९६)

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

तस्य स्मृतिर्विजयते पुरुषोत्तमस्य[1]

(१)

गंगा कलिन्दतनया च सरस्वती च
यं नैजपुण्यसलिलैः परिपावयन्ति ।
तत्राप यो निजजनिं प्रथिते प्रयागे
तस्य स्मृतिर्विजयते पुरुषोत्तमस्य ॥

(२)

प्राभावयन्मदनमोहनमालवीयो
लाला च लाजपतरायसुधीवरो यम् ।
भक्तं व्यधाच्च यमहो प्रथितः पटेल-
स्तस्य स्मृतिर्विजयते पुरुषोत्तमस्य ॥

(३)

सप्रूपनामसमलंकृतप्राड्विवाकाद्
वाक्कीलतां समभजत् प्रथमं ततश्च ।
नाभाख्यराज्यविधिमन्त्रिपदं गतो य-
स्तस्य स्मृतिर्विजयते पुरुषोत्तमस्य ॥

(४)

कांग्रेसकार्यसमितेरभवत् करांच्याम्
उत्साहपूरितमनाः प्रथमं सदस्यः ।
अध्यक्षतामनु गतश्च दलस्य तस्य
तस्य स्मृतिर्विजयते पुरुषोत्तमस्य ॥

१. श्रीपुरुषोत्तमदासटण्डनस्य

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(५)

यूपीविधानसदसश्च भवन्नियन्ता
लेभे यशोऽतिविमलं विपुलं मनस्वी ।
संसत्सदस्यपदवीमपि रूढवान् य-
स्तस्य स्मृतिर्विजयते पुरुषोत्तमस्य ॥

(६)

तत्याज यो हि पदवीं विधिमन्त्रिसंज्ञां
कांग्रेससंज्ञकदलस्य च मुख्यतां वा ।
तत्याज किन्तु न हि यो निजराष्ट्रभाषां
तस्य स्मृतिर्विजयते पुरुषोत्तमस्य ॥

(७)

राजर्षिमान्यपदवी यमवाप्य जाता
धन्या मनोज्ञभरतावनिरत्नभूतम् ।
हिन्दीप्रचारमकरन्दमधुव्रतस्य
तस्य स्मृतिर्विजयते पुरुषोत्तमस्य ॥

(८)

यो राष्ट्रभक्तिपरिपूरितमानसः सन्
कारागृहस्य बहुकष्टततिं विषेहे ।
दुःखे सुखे च किल यः स्थितप्रज्ञ आसीत्
तस्य स्मृतिर्विजयते पुरुषोत्तमस्य ॥

(९)

हं हो यदाद्य खलु भारतभूमिभागे
संदृश्यते निजगिरः परितो ह्युपेक्षा ।
प्रासंगिकत्वमयते स्मरणं यदीयं
तस्य स्मृतिर्विजयते पुरुषोत्तमस्य ॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(१०)

यं श्रद्धयार्चितुमिदं[१] भवनं वरेण्यं
निर्मापितं बुधवरैर्विविधैः सुयत्नैः
स्मर्यास्ति यस्य निजराष्ट्रगिरः सपर्या
तस्य स्मृतिर्विजयते पुरुषोत्तमस्य ॥

(रचनातिथिः १४-९-१९९६)

१. दिल्लीस्थितं 'हिन्दी-भवनम्' ।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

स्वतन्त्रतायाः स्वर्णजयन्ती

(१)

देशभक्तिभावितचित्तान् सादरं नमन्ती ।
स्वातन्त्र्याहववीरभटान् सादरं स्मरन्ती ।
देशवासिनां चिन्तनधारां पुरो नयन्ती ।
सम्प्राप्तेयं स्वतन्त्रतायाः स्वर्णजयन्ती ॥

(२)

यैर्देशस्य कृते समर्पितं निजसर्वस्वम् ।
दर्शितवन्तो यं चाङ्ग्लेभ्यः पराक्रमं स्वम् ।
तान् स्मारयति स्वतन्त्रतायाः स्वर्णजयन्ती ।
सम्प्राप्तेयं स्वतन्त्रतायाः स्वर्णजयन्ती ॥

(३)

क्रान्तिकारिणां तपस्विनां वै विविधतपस्याः ।
हुतात्मभिर्या कृता देशमातुर्वरिवस्याः ।
ता अर्चयति स्वतन्त्रतायाः स्वर्णजयन्ती ।
सम्प्राप्तेयं स्वतन्त्रतायाः स्वर्णजयन्ती ॥

(४)

अहह ! खण्डिता भारतभूमिर्नः सञ्जाता ।
प्रादुर्भूता अत्याचारा दुष्टोत्पाताः ।
स्मारयतीदं स्वतन्त्रतायाः स्वर्णजयन्ती ।
सम्प्राप्तेयं स्वतन्त्रतायाः स्वर्णजयन्ती ॥

(५)

देशे क्रमशो जातो बहुविधनव्यविकाशः ।
किञ्च दृश्यते हन्त! चतुर्दिग् विविधविनाशः ।
बोधयतीदं स्वतन्त्रतायाः स्वर्णजयन्ती ।
सम्प्राप्तेयं स्वतन्त्रतायाः स्वर्णजयन्ती ॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(६)

रक्तदायिनो नाम्ना, कृत्यै रक्तपायिनः ।
देशसेविनो नाम्ना, कृत्यैर्देशभक्षिणः ।
पदे पदे विवशा विवशा दृक्पथं नयन्ती ।
सम्प्राप्तेयं स्वतन्त्रतायाः स्वर्णजयन्ती ॥

(७)

दूरे भावताद् देशाद् दुष्टो भ्रष्टाचारः ।
दूरे भवताद् देशान्निन्द्योत्कोचाचारः ।
निर्दिशतीदं स्वतन्त्रतायाः स्वर्णजयन्ती ।
सम्प्राप्तेयं स्वतन्त्रतायाः स्वर्णजयन्ती ॥

(८)

रक्षत देशं मनसा वचसा किञ्च कर्मणा ।
सीमान्तेषु भवत सज्जा आवृता वर्मणा ।
आह्वयतीदं स्वतन्त्रतायाः स्वर्णजयन्ती ।
सम्प्राप्तेयं स्वतन्त्रतायाः स्वर्णजयन्ती ॥

(रच़नातिथिः १५-८-१९९७)

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

लोकतन्त्रेऽस्मिन्

अकल्प्यं किं न घटते
भावगम्ये लोकतन्त्रेऽस्मिन् ।
भवति किं, किं भविष्यति वा
न जाने लोकतन्त्रेऽस्मिन् ॥१॥

महामात्यत्रयं दृष्टम्
मुहुर्निर्वाचनं घुष्टम् ।
अहो स्वातन्त्र्यहेमाब्दे
किमेतल्लोकतन्त्रेऽस्मिन् ॥२॥

मयूरव्यालशालूराः
स्वकीयं कांक्षितं लब्धुम्।
स्थिता एकत्र गतवैरा
महिष्ठे लोकतन्त्रेऽस्मिन् ॥३॥

विडाला मूषकैस्साकं
वृका हरिणैस्समं मैत्रीम् ।
प्रकुर्वाणा विलोक्यन्ते
पदार्थे लोकतन्त्रेऽस्मिन् ॥४॥

समीहितसिद्धये श्लिष्टाः
सुताः कुन्त्याश्च गान्धार्याः ।
महाभारतकथेयं
काप्यपूर्वा लोकतन्त्रेऽस्मिन् ॥५॥

अहो हैयङ्गवीनं सख्य-
मिच्छत्यग्निना साकम् ।
कदल्या मित्रता दृष्टा
बदर्या लोकतन्त्रेऽस्मिन् ॥६॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

इमे काका उलूकैः सार्ध-
मिच्छन्ति स्वसम्बन्धम् ।
तितउना वारिमैत्रीं पश्य
बन्धो ! लोकतन्त्रेऽस्मिन् ॥७॥

तमस्तेजश्च मित्रे स्तः
हयानां सैरिभैः सख्यम् ।
अजव्याघ्रौ सखायौ स्तः
प्रकृष्टे लोकतन्त्रेऽस्मिन् ॥८॥

विधुन्तुदचन्द्रयोः प्रीतिः
पयोजम्बीरयोः प्रीतिः ।
अजानां कौटिकैः प्रीति-
र्विलोक्या लोकतन्त्रेऽस्मिन् ॥९॥

तमस्तेजो दिनं रात्रिः
सुधा विषमन्धता दृष्टिः ।
अहो पर्यायतां प्राप्ता
विरुद्धा लोकतन्त्रेऽस्मिन् ॥१०॥

शृणुध्वं रे सुबद्धं
भक्ष्यभक्षकसख्यमिह लोके ।
विपत्तेः कारणं नास्ते
सुपूज्ये लोकतन्त्रेऽस्मिन् ॥११॥

अयं योऽस्त्यस्मदाशानां
प्रतीकः प्रतिनिधिः सदने ।
स आशामस्मदीयां
पूरयति नो लोकतन्त्रेऽस्मिन् ॥१२॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

किमपि कर्तुं तथाऽकर्तुं
तथा चैवान्यथा कर्तुम् ।
विदूषकसन्निभो नेता
प्रभुर्वै लोकतन्त्रेऽस्मिन् ॥१३॥

मतं यल्लोकतन्त्रं
शासनं नृणां नृभिर्नृभ्यः ।
विलीनं तत्क्व सञ्जातं
प्रचण्डे लोकतन्त्रेऽस्मिन् ॥१४॥

क्वचिच्चास्त्रीभवति सदने
ध्वनेर्विस्तारकं यन्त्रम् ।
सदस्याः कान्दिशीका हन्त !
दृष्टा लोकतन्त्रेऽस्मिन् ॥१५॥

अहो ! युद्धाजिरं जातं
सभाभवनं तु नेतृणाम् ।
विधायक एव पण्याश्वी-
भवति हा ! लोकतन्त्रेऽस्मिन् ॥१६॥

कदाचिद्धावनं दलतः
कदाचिन्नूत्नदलघटनम् ।
कदाप्यपवञ्चनाकाण्डं
विलोकय लोकतन्त्रेऽस्मिन् ॥१७॥

करौ बद्ध्वा मुखे दत्वा
तृणं नत्वा शिरः स्वीयम् ।
वृकाः कांक्षन्ति मेषाणां
मतं बत लोकतन्त्रेऽस्मिन् ॥१८॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

क्षणे रोषः क्षणे तोषः
क्षणे त्यागः क्षणे ग्रहणम् ।
क्षणे निन्दा क्षणे स्तुतयो
मतार्थं लोकतन्त्रेऽस्मिन् ॥१९॥

न कश्चित्कस्यचिन्मित्रं
न कश्चित्कस्यचिच्छत्रुः ।
मतार्थं शात्रवं मैत्री
भवति भो ! लोकतन्त्रेऽस्मिन् ॥२०॥

क्वचिद्दानी क्वचिद्भिक्षुः
क्वचिच्छिष्टः क्वचिद्धृष्टः ।
क्वचिद् ह्रीणोऽथ निर्लज्जो
मतार्थी लोकतन्त्रेऽस्मिन् ॥२१॥

जनैर्दत्तं मतं यस्मै
प्रतार्यास्तेन ते जाताः ।
स्वतन्त्रं भारतं किं किं
न पश्यति लोकतन्त्रेऽस्मिन् ॥२२॥

अहो जनताजनार्दन-
पूजनं यस्यास्ति कर्तव्यम् ।
स नेता वञ्चनं कुरुते
जनानां लोकतन्त्रेऽस्मिन् ॥२३॥

अये म्याऊंकरोत्येषा
कथं मामेव मार्जारी ।
मदीया पालिता यास्ते
कृतघ्ना लोकतन्त्रेऽस्मिन् ॥२४॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

कलासाहित्यसङ्गीत-
प्रहीणो ना तृणं खादति ।
पशूनां भागधेयं यद्
हरे! शृणु लोकतन्त्रेऽस्मिन् ॥२५॥

वहन्तः स्वं ध्वजं चिह्नं
करौ बद्धवा मतं लब्धुम् ।
वनीयक-कर्मनिष्णाता
भ्रमन्ते लोकतन्त्रेऽस्मिन् ॥२६॥

कथं बन्धो मतं दास्यसि
भयं त्यक्त्वा स्वके क्षेत्रे ।
वृतः पाटच्चरैर्मतदान-
केन्द्रे लोकतन्त्रेऽस्मिन् ॥२७॥

विकासोऽप्यद्भुतो जातो
विनाशोऽप्यद्भुतो जातः ।
प्रकाण्डा काण्डसन्तति-
रीक्ष्यते बत लोकतन्त्रेऽस्मिन् ॥२८॥

अयोग्याः प्रोन्नतिं प्राप्ताः
सुयोग्या अवनतिं नीताः ।
सतामपवञ्चनं प्रायो
विलोक्यं लोकतन्त्रेऽस्मिन् ॥२९॥

कथं भो मन्यसे देशं
धनं पित्र्यं विभज्याद्यम् ।
त्वया नेतः ! कृता का वास्य
सेवा लोकतन्त्रेऽस्मिन् ॥३०॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

मनस्यन्यद् वचस्यन्यत्
तथान्यत्कर्मणि स्वीये ।
दधानः प्रायशो लोकस्य
नेता लोकतन्त्रेऽस्मिन् ॥३१॥

कुतो निजसंस्कृतेश्चिन्ता
कुतो देशस्य वा चिन्ता ।
पदस्थाश्चिन्तयन्ति स्वां
समृद्धिं लोकतन्त्रेऽस्मिन् ॥३२॥

विदूषककर्म कुर्वाणा
जनान् ये वञ्चयन्त्यनिशम् ।
त एवाद्यासते मान्या-
स्तथाप्ता लोकतन्त्रेऽस्मिन् ॥३३॥

'जयो मे दक्षिणे हस्ते
जयो मे वामहस्ते च ।'
दलं हित्वा भणति चतुरः
प्रवीरो लोकतन्त्रेऽस्मिन् ॥३४॥

सरस्वत्या मरालो
लुञ्च्यते लक्ष्म्या उलूकेन ।
पिका मौनं भजन्ते
काकभीता लोकतन्त्रेऽस्मिन् ॥३५॥

बलात्कारा नृहत्या
बम्बविस्फोटास्तथा दाहाः ।
अहो दैनन्दिनी वार्ताऽ
स्मदीये लोकतन्त्रेऽस्मिन् ॥३६॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

इयं देवी प्रतारण-चातुरी
भ्रष्टावने दक्षा ।
मता नृपनीतिसंज्ञा
वन्दनीया लोकतन्त्रेऽस्मिन् ॥३७॥

पुनस्ते मे मतं काङ्क्षन्ति
यैरेवास्मि परिमुषितः ।
अहो ! निर्लज्जतेयं कीदृशी
ननु लोकतन्त्रेऽस्मिन् ॥३८॥

मतं मे कांक्षमाणा ये
पुनर्मे द्वारि सम्प्राप्ताः ।
कथं तेषां प्रियं कुर्याम्
न जाने लोकतन्त्रेऽस्मिन् ॥३९॥

शकाराणां विकारा
जृम्भमाणा नित्यमीक्ष्यन्ते ।
विपन्नाश्चारुदत्ताः
किञ्च धूता लोकतन्त्रेऽस्मिन् ॥४०॥

महर्घत्वं निधायाङ्के
सरत्यग्रे नवं वर्षम् ।
शुभेच्छा मामकीनाः स्यु-
र्भवद्भ्यो लोकतन्त्रेऽस्मिन् ॥४१॥

कटूक्तीः प्रत्यहं कुर्वे
समीक्षाः प्रत्यहं कुर्वे ।
न रिङ्गति कस्यचित्कर्णे
ऽपि यूका लोकतन्त्रेऽस्मिन् ॥४२॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

महाकाव्यान्यपेक्ष्यन्ते
यदीयं यद्यशो गातुम् ।
मदीयैः सीमितैः शब्दै-
र्भवति किं लोकतन्त्रेऽस्मिन् ॥४३॥

प्रसिद्धिं लम्भिताः खल-
नायकाः खलु नायकत्वेन ।
विपर्ययमीदृशं त्वं
पश्य बन्धो ! लोकतन्त्रेऽस्मिन् ॥४४॥

इदं दाहात्मकं तेजः
सुगूढं यन्नृणामन्तः ।
मदान्धाः ! कि न पश्यत रे ?
वदत भो लोकतन्त्रेऽस्मिन् ॥४५॥

(रचनातिथिः २०.१.१९९८)

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

भारतस्य विजयोऽयम्

(१)

"क्रुद्धं हिंसाबलं जितं किल सत्याहिंसाबलतः ।
आंग्लशासनं खलूच्चाटितं भारतस्य विजयोऽयम् ॥

(२)

पञ्चषष्टितमवर्षेऽस्माकं पश्चिमोत्तरे वीराः ।
पदचर्यया गता लाहौरं, भारतस्य विजयोऽयम् ॥

(३)

एकसप्ततौ दिसम्बरे किलं नवतिसहस्त्रं पाकाः ।
बद्धा निरागसां हन्तारो, भारतस्य विजयोऽयम् ॥

(४)

वारद्वयं पोखरणगर्भे ह्यणुविस्फोटपरीक्षा ।
स्वीयसाधनैः सफला जाता, भारतस्य विजयोऽयम्॥

(५)

अग्निनागप्रभृतीन्यस्त्राणि प्रोद्भासन्तेऽस्माकम् ।
तर्जयन्ति वैरिणः प्रतिपलं, भारतस्य विजयोऽयम् ॥

(६)

अवतारिता युद्धपोताः सागरवक्षसि सोत्साहम् ।
आत्मरक्षणं विदधति वीराः, भारतस्य विजयोऽयम् ॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(७)

मा चिन्तां कुरु रमाकान्त ! सागरे वियति भूपृष्ठे ।
निस्तन्द्रा जाग्रति वीरास्ते, भारतस्य विजयोऽयम् ॥''[१]

त्रीणि पदानि ४-७-१९९९ तारिकायां प्रणीतानि। तानि चात्रोपस्थाप्यन्ते :–

(८)

द्रासबटालिककक्सरमश्कोभागा अस्मद्वीरैः ।
यथा रक्षिता शत्रोर्हस्तात्, भारतस्य विजयोऽयम् ॥

(९)

भातृभूमिरक्षार्थं वीराः वीरगतिं लब्ध्वा यत् ।
रविमण्डलभेदनं चक्रिरे भारतस्य विजयोऽयम् ॥

(१०)

वायुसैनिका धरासैनिका सन्नायका भटानाम् ।
स्थास्यन्तीमे सदा प्रणम्या भारतस्य विजयोऽयम् ॥

---

(११)

''भ्रातश्चिन्तां नो कुर्वेऽहं किन्तु कामयेऽप्यन्यत् ।
पश्य कीदृशो मया काम्यते भारतस्य विजयोऽयम् ॥

(१२)

भ्रष्टाचारो महार्घता आतंकवाद उत्कोचः ।
निर्धनता यदि पराजिताः स्युर्भारतस्य विजयोऽयम् ॥

(१३)

वृत्तिहीनता विघटनवृत्तिर्जनतामूढीकारः ।
जिताः पूर्णतो यदि पूर्णः स्याद्भारतस्य विजयोऽयम् ॥

(१४)

यदि च विदूषकनिभा नायका जनतां नो लुण्ठेयुः ।
धर्मजातिभाषाविभेदतो भारतस्य विजयोऽयम् ॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(१५)

बाह्यमान्तरं प्रदूषणं नो नागरिकान् बाधेत ।
अभयं यदि तेषां हृदि विलसेद्भारतस्य विजयोऽयम् ॥

(१६)

शिक्षा स्वास्थ्यं क्रीडाभ्यासो देशभक्तिरविचलिता ।
सम्पूर्णेषु जनेषु भवेद्यदि भारतस्य विजयोऽयम् ॥

(१७)

क्षेत्रेषु स्यात्सस्यबहुलता कारक्षेषूत्पादः ।
प्रतिहस्तं स्याद्वृत्तियुक्तता, भारतस्य विजयोऽयम् ॥

(१८)

पठतु जनो यां कामपि भाषां किन्तु राष्ट्रभाषां प्रति।
नैवोपेक्षां यदा धारयेत्, भारतस्य विजयोऽयम् ॥

(१९)

विज्ञानं साहित्यं वाणिज्यं कृषिशिल्पोद्योगाः ।
अध्यात्म्यं कलाश्च जृम्भन्ताम्, भारतस्य विजयोऽयम्॥

(२०)

वेषभूषयोपासनपद्धत्याशनेन संस्कारैः ।
भिन्ना अप्येकतां भजेयुर्भारतस्य विजयोऽयम् ॥

(२१)

स्वतन्त्रतां यः कामयते सम्पूर्णजगद्देशानाम् ।
सदा वर्धताम् सदा राजताम् भारतस्य विजयोऽयम् ॥

(इयं रचना दिल्ली-संस्कृत-हिन्दी-सिन्धी-पञ्जाब्युर्द्वकादमीभिः दिल्लीस्थे 'शाह-आडिटोरियमे'-त्यभिधे सभाभवने १६-१२-१९९८ तारिकायां समायोजिते 'विजय-दिवसे' पठितासीत्।

(रचनातिथिः १६-१२-१९९८ 'विजय-दिवसः' किञ्च ४-७-१९९९)

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

प्रणम्याः कारगिलवीराः[१]

(१)

जयन्त्येतेऽस्मदीया गौरवाङ्काः कारगिलवीराः ।
समर्च्या आसतेऽस्माकं प्रणम्याः कारगिलवीराः ॥

(२)

मई-षड्विंशदिवसादेषमो मासद्वयं यावत् ।
अघोषित-पाक-रण-जयिनो[२]ऽभिनन्द्याः कारगिलवीराः ॥

(३)

अकस्मात्प्राविशन्नस्मद्गृहे गूढप्रवेशा ये ।
स्वदेशात्तान् बहिष्कर्तुं प्रचेलुः कारगिलवीराः ॥

(४)

परित्राणाय साधूनां विनाशार्थं च दुष्टानाम् ।
समारम्भं द्रुतं चक्रुः प्रणम्याः कारगिलवीराः ॥

(५)

बटालिग्-द्रास-मश्को-ककसरक्षेत्रेषु लीनानाम् ।
रिपूणां दुर्दशां चक्रुः समिद्धाः कारगिलवीराः ॥

(६)

जुबर-थारू-कुकुरथाङ्-तुर्तुकाख्येभ्योऽद्रिशिखरेभ्यः ।
तुलालिङ्गात्तथा शत्रूनतौत्सुः कारगिलवीराः ॥

(७)

दिशन्तो दुर्विपाकं पाककितवानां प्रयाणैः स्वैः ।
जगर्जुर्दुगमक्षेत्रे कृतान्ताः कारगिलवीराः ॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(८)

अवाक्षुस्ते शतघ्नीः स्वीयहस्तैरेव सोत्साहम् ।
ववर्षुर्भीषणान् बम्बान् रिपूपरि कारगिलवीराः ॥

(९)

ममन्थुस्ते रिपून् सर्वान् निलीनान् गूढभागेषु ।
स्वदेशस्य प्रतिष्ठां ते ररक्षुः कारगिलवीराः ॥

(१०)

भुशुण्डीनां शतघ्नीनां भयङ्करगोलकापातैः ।
रिपूनुच्चाटयामासुः प्रवीराः कारगिलवीराः ॥

(११)

अरीन् विद्रावयामासुः शठान् शिक्षापयामासुः ।
खलान् प्रध्वंसयामासुः प्रणम्याः कारगिलवीराः ॥

(१२)

ध्वजः शार्दूलशिखरे[३] स्वस्त्रिवर्णः स्थापितो यैर्यैः ।
समे ते सन्ति सर्वेषां प्रणम्याः कारगिलवीराः ॥

(१३)

हनीफुद्दीनसौरवकालियाहूजास्तथा चान्ये ।
महोत्साहा रवेर्मण्डलमभिन्दन्[४] कारगिलवीराः ॥

(१४)

रणे क्षतविक्षताङ्गा अप्यदम्योत्साहपरिपूर्णाः ।
जिगीषापूरितात्मानः प्रचण्डाः कारगिलवीराः ॥

(१५)

अहो ये मातृभूमे रक्षणार्थं स्वीयसर्वस्वम् ।
बलिं चक्रुः कथं ते विस्मृताः स्युः कारगिलवीराः ॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(१६)

जनन्यै जन्मभूम्यै त्यक्तसर्वस्वा रणक्षेत्रे ।
हुतात्मानो न वन्द्याः कस्य शतशः कारगिलवीराः ॥

(१७)

समस्तं भारतं ह्येकत्वसूत्रे बाधयाञ्चक्रुः ।
बलिं कृत्वा स्वदेशार्थं स्वदेहान् कारगिलवीराः ॥

(१८)

प्रधानामात्य' आस्तामस्तु वा साधारणो लोकः ।
कृतज्ञः सन् नमति युष्मान् प्रणम्याः कारगिलवीराः! ॥

(१९)

'द्रुतं विजयाभियानं सिद्ध'मित्यत्रास्ति को हेतुः ?
इहोत्तरमास्त उपयुक्तं 'प्रवीराः कारगिलवीराः' ॥

(२०)

शृणुध्वं पाकनेतारः शृणुध्वं पाकबलपतयः ।
यदीच्छथ शं तदा नो कोपनीयाः कारगिलवीराः ॥

(२१)

इमे नकुला मयूरा वैनतेयाः पाकनागानाम् ।
इमे पञ्चानना द्विषतां द्विपानां कारगिलवीराः ॥

(२२)

शृणुध्वं निस्त्रपा आतङ्कवादप्रेरिताः मूढाः ।
इमे जाग्रति दिवानक्तं सशस्त्राः कारगिलवीराः ॥

(२३)

उदन्वद्भूधराकाशेषु नित्यं देशरक्षार्थम् ।
इमे तिष्ठन्ति सन्नद्धा विनिद्राः कारगिलवीराः ॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(२४)

'अविश्वस्ते न विश्वासो विधेयो जातुचिद्विदुषा' ।
दिशन्तीदं भरतभूनायका: ! किल कारगिलवीरा: ॥

(२५)

'शठे शाठ्यं विधेयं' 'दुर्जनः शाम्येन्न चोपकृतैः' ।
'वधार्हश्चाततायी'-वेदयन्ते कारगिलवीरा: ॥

(२६)

रमाकान्त ! त्वया चान्यैः कवीन्द्रैरीडिताः काव्यैः ।
सदा स्थास्यन्ति पूजार्हा अमर्त्याः कारगिलवीरा: ॥

षड्विंशदिवसारब्धे शान्ते षड्विंशके दिने ।
विजयाख्याभियाने ये दर्शितस्वपराक्रमा: ॥१॥

चतुःशताधिका वीरा हुतात्मानो यशस्विनः ।
जेतारश्च रिपूणां ये, क्षताङ्गा ये भटोद्भटा: ॥२॥

शत्रून् कारगिलक्षेत्राधित्यकोपत्यकासु ये ।
गतासून् कान्दिशीकाँश्च चक्रिरे रणभैरवा: ॥३॥

तेषां कीर्तिं ककुब्व्याप्तां षड्विंशत्या पदां गिरन् ।
विधत्ते लेखनी धन्यां रमाकान्तो 'रमालये' ॥४॥

(रचनापूर्तितिथिः २६-७-१९९९)

---

१. 'विजयाभियाने (आपरेशन विजय)' भागं ग्रहीतारो भारतीया: सैनिका:।

२. २६.५.१९९९ तः २६.७.१९९९ पर्यन्तं कारगिल-क्षेत्रे प्रचलितं पाकिस्तान-प्रेषित-गूढाक्रमणकारिणामुच्चाटनाय यद् युद्धमिवाभवत्तत्र विजयिनः। कारगिलक्षेत्रे ये भारतीया: वायु-सैनिका: स्थल-सैनिकाश्च पराक्रमं प्रदर्शितवन्तस्तेऽत्र रचनायां 'कारगिलवीरा:' इति संज्ञया व्यपदिष्टा:।

३. 'टाइगर हिल'–इत्यत्र।

४. युद्धे वीरगतिका आदित्य-मण्डलं भित्वा ब्रह्मभावं गच्छन्तीति विश्वास:।

५. प्रधानमन्त्री।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

योऽयं कृतः शपथस्त्वया

योऽयं कृतः शपथस्त्वया तस्यार्थमपि जानासि किम् ?
यदिदं प्रतिज्ञातं त्वया तस्याशयं जानासि किम् ?

(१)

कर्तुं यथा सरलस्तथा शपथो न निर्वोढुं सखे !
शपथस्य निर्वाहो भवति कण्टकपथानुसृतिः सखे !
त्यक्त्वा सुमान्यालिङ्गसे कटुकण्टकान्, जानासि किम् ?
योऽयं कृतः शपथस्त्वया तस्यार्थमपि जानासि किम् ?

(२)

व्यालीवदनचुम्बनमिदं करवालधारालेहनम्
क्षुरधारया पदमित्रता मधुराशया गरलाशनम्
त्यक्त्वा सुखदतल्पं सखे ! भूमौ स्वपिषि, जानासि किम् ?
योऽयं कृतः शपथस्त्वया तस्यार्थमपि जानासि किम् ?

(३)

शपथं विधाय सखे ! त्वया हस्तौ निगडबद्धौ कृतौ
शपथं विधाय सखे ! त्वया पादौ निगडबद्धौ कृतौ
बद्धोऽसि वचसा कर्मणा मनसा त्वमिति, जानासि किम् ?
योऽयं कृतः शपथस्त्वया तस्यार्थमपि जानासि किम् ?

(४)

नो लप्स्यसे निद्रां निशायां नापि दिवसे निर्वृतिम्
चिन्ताप्रतान्तविलोचनां त्वं द्रक्ष्यसि स्वामाकृतिम्
आमन्त्रितास्ते या विपत्तस्याः फलं जानासि किम् ?
योऽयं कृतः शपथस्त्वया तस्यार्थमपि जानासि किम् ?

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(५)

शपथस्य पूर्त्यर्थं त्वया पेयं भवेद्गरलं मुदा
शपथस्य पूर्त्यर्थं त्वयाध्यवसाय आराध्यः सदा
शपथस्य रक्षार्थं त्वयार्प्यं जीवनं, जानासि किम् ?
योऽयं कृतः शपथस्त्वया तस्यार्थमपि जानासि किम् ?

(६)

ज्यायान् कनीयान् वा भवेच्छपथो गृहीतो मानवैः
तद्रक्षणार्थं लौहचणकाश्चर्वणीया मानवैः
शपथान्मनाक् प्रचलन्ति नो सत्यव्रताः, जानासि किम् ?
योऽयं कृतः शपथस्त्वया तस्यार्थमपि जानासि किम् ?

(७)

यैः पूरितः शपथो निजस्ते लोकवन्द्याः सम्मताः
यैः पूरितः शपथो नरा इतिहासपुरुषास्ते मताः
शपथस्य भेत्ता कथ्यते जीवन्मृतो, जानासि किम् ?
योऽयं कृतः शपथस्त्वया तस्यार्थमपि जानासि किम् ?

(८)

शपथो न कर्गलखण्डलिखितायास्तु पङ्क्तेर्वाचनम्
शपथोऽस्ति पीडासन्ततेरानन्दसहितं पाचनम्
शपथोऽस्ति मनसः कर्गले स्वात्माङ्कनं, जानासि किम् ?
योऽयं कृतः शपथस्त्वया तस्यार्थमपि जानासि किम् ?

(९)

शपथो न केवलमस्ति वाण्या वर्णमात्रोच्चारणम्
शपथस्तु बन्धो ! कथ्यते पञ्चाग्नितपसो धारणम्
होतव्य आत्मा मानवैस्तत्पूर्तये, जानासि किम् ?
योऽयं कृतः शपथस्त्वया तस्यार्थमपि जानासि किम् ?

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(१०)

मनसाथ वचसा कर्मणा भिन्ना भवन्ति न ये जनाः
सम्मानभाजनतां जगति ते यान्ति सर्वेषां जनाः
क्षतवाग्जनो निन्द्यो भवति लोके, सखे ! जानासि किम् ?
योऽयं कृतः शपथस्त्वया तस्यार्थमपि जानासि किम् ?

(११)

शपथेन बद्धा नो जना निजलाभचिन्तां कुर्वते
न हि ते स्वशपथापेक्षया निजजीवनं बहु मन्वते
स्नेहं दयां सौख्यं न ते गणयन्ति, भण, जानासि किम् ?
योऽयं कृतः शपथस्त्वया तस्यार्थमपि जानासि किम् ?

(१२)

लोभेन भयतः कामतो वा यो निजं शपथं त्यजेत्
शपथेन साकं स हि पुमान् निजजीवनं न हि किं त्यजेत् !
शपथस्य रक्षा ह्यात्मजयतो जायते, जानासि किम् ?
योऽयं कृतः शपथस्त्वया तस्यार्थमपि जानासि किम् ?

(१३)

विस्मृत्य शपथं ये जनाश्चातुर्यखेलां तन्वते
चिन्वन्ति ते कामं धनं, न हि ते यशः किल चिन्वते
सम्भावितस्याकीर्तिरतिमृत्युर्भवति, जानासि किम् ?
योऽयं कृतः शपथस्त्वया तस्यार्थमपि जानासि किम् ?

(१४)

ये वञ्चयन्त्यनिशं जनान् शपथं गृहीत्वा मानवाः
आत्मानमथ सर्वेश्वरं जानन्ति नो ते मानवाः
मिथ्याव्रतानां लुप्यते तेजो मुखाज्जानासि किम् ?
योऽयं कृतः शपथस्त्वया तस्यार्थमपि जानासि किम् ?

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(१५)

अधुना यदा शपथः कृतस्त्वयका तदायं रक्ष्यताम्
प्रत्यक्षरं शपथस्य बन्धो ! रक्षणीयं, रक्ष्यताम्
उच्चैः स्वरेणास्मत्पुरो यदवादि तज्जानासि किम् ?
योऽयं कृतः शपथस्त्वया तस्यार्थमपि जानासि किम् ?

(१६)

सम्प्रति शपथरक्षार्थमात्मा पीडनीयो रे ! त्वया
विस्मृत्य निजसौख्यं सखे ! लोकः समाराध्यस्त्वया
ईशः शपथकाले त्वया साक्षीकृतो जानासि किम् ?
योऽयं कृतः शपथस्त्वया तस्यार्थमपि जानासि किम् ?

(१७)

रक्ष प्रतिज्ञामात्मनो वर्धय तपः स्वं प्रत्यहम्
शपथं हि पूरय शुद्धमनसा, ते हितं कथयाम्यहम्
सम्पूर्य शपथं लप्स्यसे सुयशः स्थिरं, जानासि किम् ?
योऽयं कृतः शपथस्त्वया तस्यार्थमपि जानासि किम् ?

(१८)

रक्ष्येत शपथस्तावकोऽक्षरशो मयेदं काम्यते
सोढ्वापि कष्टं सफलतां विन्देति बन्धो ! काम्यते
नैवोत्सहे त्वां भग्नशपथं द्रष्टुमिति जानासि किम् ?
योऽयं कृतः शपथस्त्वया तस्यार्थमपि जानासि किम् ?

(रचनातिथिः १३-१०-१९९९ रात्रौ ८-०० वादनतः १२-०० वादनं यावत्
निशीथे दिल्ली-शिमला मार्गे)

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

भावसन्धिः

विमानं नीतवन्तस्ते विना काठिन्यमस्माकम्
'अमृतसर'-वायुयानस्थानके तैलं गृहीतं तैः ।
पुनर्व्यापादितो रूपेनकतियालो नृशंसैस्तै-
र्वयं विवशाः स्थिता गेहे, विलोक्यैतद्भृशं दूये ॥१॥

अथो दुबईं गतैस्तैर्मोचिताः किल यात्रिणः केचित्
तदनु कन्धारभूमौ व्यूहरचना तैः कृता सम्यक् ।
दिनान्यष्टौ स्थितैस्तैस्तत्र, यद्यत्काक्षितं तत्तत्
गृहीतं शासनात्सर्वं, विलोक्यैतद् भृशं दूये ॥२॥

विमाने ये स्थितास्ते यात्रिणो निजगेहमायाताः
प्रसन्नोऽहं, मुखान्मृत्योर्विमुक्तास्तेऽहमिति मन्ये।
परं विज्ञाय मुक्तिं क्रूरकर्मातङ्किनां त्वरितां
शिरोऽवनतं मदीयं ग्लानितोऽहं मानसे दूये ॥३॥

न दूयेऽहं रुजो वित्तस्य नाशाद्बन्धुनाशाद्वा
न दूयेऽहं सभायां मेऽपमानान्मित्रघाताद्वा ।
न दूये पुत्रशाठ्याद्वाप्युपेक्षायाः स्वजायायाः
परं राष्ट्रस्य वैवश्यं विलोक्याहं भृशं दूये ॥४॥

स धन्यो राष्ट्रपतिपूर्वः कृती शंकर दयालो यो
जहौ प्राणान् विवशताग्लानिनाट्यप्रेक्षणात्पूर्वम् ।
ह हा रचना वराकी नष्टपतिका कां गतिं यास्यति
दशां श्रुत्वा तदीयां हे प्रभो ! चित्ते भृशं दूये ॥५॥

सहस्राब्द्याः शताब्द्या वान्तिमं वर्ष शुभं भूयात्
जगत्यातङ्कवादोन्मूलनस्यारम्भ उद्भूयात् ।
न देशस्यास्य महिमा स्वाभिमानो वा तिरोभूयात्
तथा भूयात् प्रयत्नो येन नैवाहं पुनर्दूये ॥६॥

ज्वलतु चलितेन्धनोऽग्निः पन्नगः स्वीयां फणां कुरुतात्
स्वमहिमानं विजानीयाद्विवशतादष्टदेशोऽयम् ।
'स्वराष्ट्रे जागृयामे'तीदमस्माभिस्सदा स्मार्यं
न चेन्नो वञ्चयेत्कश्चित्तदा नेत्थं पुनर्दूये ॥७॥

(रचनातिथिः १.१.२००० ई०)

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

त्वं चन्दनमसि हे प्रभो !

(सन्तरविदासस्य 'प्रभु जी, तुम चन्दन हम पानी'तिपद्यस्य
'दोहा'च्छन्दसि संस्कृतकाव्यानुवादः)

त्वं चन्दनमसि हे प्रभो जलमहमस्मि परेश ।
प्रत्यङ्गं तव सुरभिणा सुरभितमिदमखिलेश ॥१॥

त्वमसि नीरदोऽहं प्रभो वनमयूर आभामि ।
अहं चकोरो लालसश्चन्द्रं त्वां पश्यामि ॥२॥

त्वं दीपोऽहं वर्तिका तव तेजसा विभामि ।
त्वं मुक्ताफलमसि विभो सूत्रमहं चाभामि ॥३॥

अहं सुवर्णष्टङ्कणस्त्वं विभासि परमेश ।
त्वं स्वामी मम, चाहमपि दासस्ते दीनेश ॥४॥

रविदासः कुरुते मुदा भक्तिमिमां जगदीश ।
रटति नाम तव निर्मलं नक्तंदिवमयमीश ॥५॥

(रचनातिथिः १३-२-२०००)

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.



'तुरीनो' स्मृतिसपादशतकम्

(एकादशविश्वसंस्कृतसम्मेलनसपादशतकम्)

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.



एकादशविश्वसंस्कृतसम्मेलनावसरे अर्वाचीनसंस्कृतस्य प्रदर्शन्याम्
'चैस्म्यो' संस्थाध्यक्षाय प्रो० आस्करबोत्तोमहाभागाय
अर्वाचीनसंस्कृतस्य नूतनांकं समर्पयन्
रमाकान्त शुक्लः
८.४.२०००

अस्या रचनायाः पादटिप्पणीषु प्रदत्ता विदुषां संकेताः प्रायः एकादश-विश्वसंस्कृतसम्मेलनकार्यक्रमपञ्जिकानुसारं सन्ति ।

अस्यां रचानायां संकलितानि चित्राणि रमाकान्त शुक्ल-डा० हरिदत्त शर्म-डा० रमेशकुमार पाण्डेय-'चैस्म्यो' संस्थाभिरंकितानि । चित्रद्वयं वैनिसिया नगरे क्रीतात् चित्रपोस्टकार्डात् साभारं गृहीतम् ।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.



एकादशविश्वसंस्कृत-
सम्मेलनस्य प्रतीकचिह्नम्

'तुरीनो' स्मृतिसपादशतकम्

(एकादशविश्वसंस्कृतसम्मेलनसपादशतकम्)

वैश्वमेकादशं सांस्कृतं मेलनं
[1]रुद्रसंख्यं 'तुरीनो' नगर्यां शुभम् ।
यत्समायोजितं प्राच्यविद्याधरै-
स्तंत्सहस्त्राब्दमाङ्गल्यदं जायताम् ॥१॥

'आइ०ए०एस०एसे'[2]ति संस्था तथा
'चेस्मियो'[3] संज्ञकं शोधसंस्थानकम् ।
यन्मिलित्वा समायोजितं चक्रतु-
स्तज्जगद्विज्ञसन्तोषदं कल्पताम् ॥२॥

क्रैस्तवर्षे नभोशून्यखाक्ष्यंकिते[4]
एप्रिलाख्ये शुभे मासि षड्भिर्दिनैः ।
[5]शम्भुनेत्रात्मिकायास्तिथेरावसो[6]-
र्योजितं मेलनं को न चित्ते स्मरेत् ॥३॥

खैष्टे वर्षे शून्यखाकाशनेत्रे[7]
एप्रिल्मासेऽथो तृतीये दिनाङ्के ।
'इन्कौण्ट्रा'[8]-संस्थासभागारमध्ये
संसद्भव्याभूत् 'तुरीनो' नगर्याम् ॥४॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

'पो' संज्ञाया यत्र नद्याः प्रवाहे
केचिल्लग्ना नौविहारे युवानः ।
नद्यास्तोयं पक्षिणः संपिबन्तः
सम्मोदं स्वं कूजितैर्व्यञ्जयन्ति ॥५॥

रम्याः स्वच्छा वृक्षपंक्तिप्रसन्नाः
मार्गा दृष्टाश्चत्वरैर्भ्राजमानाः ।
आरामाश्चालोकिता यत्र यूनोः
प्रेमक्रीडा नैव बाधां लभन्ते ॥६॥

तत्रत्यो यो गीतसङ्गीतमार्ग-
स्तत्रालोक्यं कोमलत्वं स्वरेषु ।
उद्वेगं नो यान्ति पौराः स्मितास्याः
कार्कश्यं नो दृश्यते तत्स्वभावे ॥७॥

'आस्कर् बोत्तो'[९] संज्ञको विज्ञधुर्यः
'चैस्म्यो' संस्थाध्यक्षवर्यः सुचेता ।
'इन्कौण्ट्रा'-संस्थासभागारमध्ये
सम्मेलायाः श्रीगणेशं चकार ॥८॥

तेन प्रोक्तं - ''संस्कृतज्ञानराशि-
र्धत्ते नूनं सार्वभौमीं प्रतिष्ठाम् ।
चेतःशान्तेः सम्प्रसाराय सर्वै-
राराध्यास्ते सर्वदा देववाणी'' ॥९॥

'विला ग्वालिनो'[१०]-संज्ञके रम्यरम्येऽ
तिथीनां गृहे वास आकल्पितो यैः ।
हिमाच्छादितामाल्प्स[११] शृङ्गावलीं ते
समोदं स्वकक्षादपश्यन् बुधेन्द्राः ॥१०॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

'विला ग्वालिनो'-स्वागतास्थानमध्ये
नियुक्ताः प्रसन्नानना या युवत्यः ।
विदूरागतेभ्यो बुधेभ्यः समास्ता
ददुः पूर्णसाह्यं, कथं विस्मृताः स्युः ॥११॥

'तुरीनो'नगर्यां समायोजितं विश्व-
गीर्वाणवाण्या यदेकादशं तत् ।
सुसम्मेलनं नूतनायाः शताब्द्याः
सहस्त्राब्दिकायाश्च भद्रं वितन्यात् ॥१२॥

इहागत्य विश्वस्य विद्वद्वरेण्यैः
स्वपत्राणि वैदुष्यवन्त्यर्पितानि ।
समुत्कृष्टपद्यैः समृद्धं च काव्यं
प्रगीतं कवीनां गणैरात्मनीनम् ॥१३॥

'आइ०ए०एस्०एस्०-संस्था-ध्यक्षो वाग्मी तथा सुकविः ।
ग्रन्थानां विविधानां, कर्ता विनयोज्ज्वलः शोधी ॥१४॥

रामकरणशर्माख्यो विबुधो विश्वश्रुतस्तत्र ।
अध्यक्षीयं भाषणमकरोदार्याभिरारभ्य ॥१५॥

तेन प्रोक्तं स्वीयेऽध्यक्षीये भाषणे स्पष्टम् ।
प्रासङ्गिकीयमास्ते संस्कृतभाषाऽधुनापि सर्वेषाम् ॥१६॥

इयमपनयत्यविनयं पर्यावरणं तथा रक्षति ।
सर्वभूतहितनिरतान् जनानियं द्रष्टुमभिलषति ॥१७॥

षड्दिवसीये ह्यस्मिन् व्यवस्थयायोजिते सम्यक् ।
सम्मेलने बुधानां विचारसम्मर्शयज्ञोऽभूत् ॥१८॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

केचित्पेठुः पत्राण्यथ केचिद्भाषणं चक्रुः ।
कार्यक्रमञ्च केचिद्दृश्यश्रव्यात्मकं प्रददुः ॥१९॥

चौडनपुरमुक्तेश्वरमन्दिरमभिलक्ष्य फिलियोजा[१२] ।
'सी०डी०रोम'[१३]-प्रस्तुतिमकरोज्ज्ञानाभिवृद्ध्यर्थम् ॥२०॥

महाभारतसम्बद्धं सीडीरोममदर्शयत् ।
प्रश्नैः परिवृतोऽनेकैर्विद्वान् धडफळेभिधः[१४] ॥२१॥

'विला ग्वालिनो'-संज्ञेऽतिथ्यावासे महारम्ये ।
'कोन्वेग्नो'-'पीमोण्टे'-'गुवालिनो' संज्ञ-हॉलेषु'[१५] ॥२२॥

सत्राण्यचलन् षोडश विविधान् विषयान् समालम्ब्य ।
विविधदेशविबुधानामाध्यक्ष्ये षट्सु दिवसेषु॥२३॥



'हालगुआलीनो'इत्यत्रायोजिते प्रथमे सामान्यसत्रे (वामतो दक्षिणं) वैद्यभगवानदाशः, डा० शिवमूर्तिस्वामी, डा० रामकरण शर्मा (अध्यक्षः), डा० रमाकान्तशुक्लः (सञ्चालकः), डा० अलबर्तो चियान्तरेत्तो च

अप्रेलस्य तृतीयेऽह्न्यपराह्णे वादनत्रयतः ।
'हालगुआलीनवि'[१६] वै प्रथमं सामान्यसत्रमभूत् ॥२४॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

संस्कृतभाषाविषये संस्कृतसाहित्यविषये च ।
पत्राण्यपठन् विबुधा आध्यक्ष्ये रामकरणस्य ॥२५॥

सञ्चालकत्वमूरीकृतवान् शुक्लो रमाकान्तः ।
सत्रारम्भे कृतवान् यो वाणी-वन्दनां पद्यैः ॥२६॥



डा० जीन माइकेल डिलायरः शोधपत्रं पठन्

'जीन् माइकेल डिलायर्'[१७] 'गरज़िल्ली एंरिका'[१८] 'पी.के.[१९] ।
हरिमूर्ति[२०] र्देवक्यथ[२१] पत्राण्यपठन् मुदा तत्र ॥२७॥

स्वामी[२२] श्रीशिवमूर्तिर्विद्वान् आनन्दगुरुगे[२३]ऽथ ।
नारायणसमतानी[२४] मञ्जुलिकाघोषविदुषी[२५] च ॥२८॥

डा० शशी तिवारी

डा० सुन्दरी सिद्धार्थ

डा० सुरेशचद्रगोस्वामी

शशी तिवारी[२६] वेमेनः[२७] सिद्धार्था सुन्दरी[२८] तथा ।
सुरेशश्चाथ गोस्वामी[२९] पटेलो[३०] गौतमस्तथा ॥२९॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

पत्रपाठे निजान् प्रश्नान् टिप्पणीश्च पृथक्-पृथक्।
अकुर्वन् येन सत्रस्य महिमासीत् सुवर्द्धितः ॥३०॥

'देववाण्याः' प्रसिद्धास्ते दिल्ल्यां हि परिषच्छुभा[३१]।
मुखपत्रं श्रुतं तस्या अस्त्यर्वाचीनसंस्कृतम् ॥३१॥

तस्य पत्रस्य पूर्वेषामङ्कानां सुप्रदर्शनी ।
'ग्वालिनो' संज्ञहॉलस्य प्रवेशद्वारि सज्जिता ॥३२॥



प्रो० आस्कर् बोत्तो प्रदर्शन्या उद्घाटनं विधाय प्रसन्नमुद्रायाम् (४.४.२०००)

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.



प्रो० आर०पी० गोल्डमैन : (सुवर्णपुरुष इतिख्यातः) अर्वाचीनसंस्कृतस्य २२/१ अंकं समुन्मील्य दर्शयति (४.४.२०००)

'आस्कर् बोत्तो'-महाभागस्तस्या उद्घाटनं शुभम् ।
अप्रेलस्य चतुर्थेऽह्नि कृतवान् विबुधोत्तमः ॥३३॥
अस्मिन्नवसरे श्रीमान् 'गोल्डमैन'-बुधोत्तमः[३२] ।
पत्रिका-नूतनाङ्कस्याकरोल्लोकार्पणं मुदा ॥३४॥
स्वहस्ताक्षरितं पत्रं सोऽदान्मह्यं, मयापि च।
हस्ताक्षराणि लब्धानि विदुषां तत्र वर्तिनाम् ॥३५॥



प्रो० वी० वेंकटाचलः श्रीसुन्दरराजकृतं ग्रन्थं समुन्मील्य भाषमाणः (४.४.२०००)

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

अर्वाचीनसंस्कृतम्

(अर्वाचीनसंस्कृतपरकं त्रैमासिकं पत्रम्)

द्वाविंशे वर्षे प्रथमोऽङ्कः

१५ जनवरी, २०००

राष्ट्रं जागृयाम

प्रधानसम्पादकः

डॉ० रमाकान्त शुक्लः

एम० ए०, पीएच० डी०, साहित्याचार्यः

सांख्ययोगाचार्यः

देववाणी-परिषद्, दिल्ली

८, वाणी-विहारः, नयी दिल्ली-११००५९

विद्वद्भिर्हस्ताक्षरितमर्वाचीनसंस्कृतम् (४.४.२०००)

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

डाक्टर आर० के० शर्मा[३३] ऽकरोदध्यक्षतां तदा ।
वेंकटाचल[३४] आचार्योऽन्यं ग्रन्थमुदमीलयत् ॥३६॥

श्रीजगन्नाथसम्बद्धं सुप्रभातं तथैव च ।
स्तोत्राण्यन्यानि राजन्ते यस्मिंश्चेतोहराणि वै ॥३७॥

यः श्री० सुन्दरराजेन प्रणीतो ग्रन्थ[३५] उत्तमः।
पूर्वं प्रकाशितः पत्रेऽनन्तरं पुस्तकाकृतौ ॥३८॥

इयं प्रदर्शनी पञ्च दिवसाँस्तत्र संस्थिता ।
अप्रेलस्याष्टमेऽह्नीयम् उपसंहारमागता ॥३९॥

तस्मिन्नवसरे श्रीमान् आस्कर् बोत्तोमहाशयः ।
स्वीकृत्य पत्रनूलाङ्कं हस्तं मेलितवान् मया[३६] ॥४०॥

स्वच्छे 'हॉल गुआलीनो'-महाकक्षे दिनद्वयम् ।
कविसम्मेलनं जातं हर्षदातृ सचेतसाम् ॥४१॥



विश्वसंस्कृतकविसम्मेलनेऽध्यक्षमण्डलस्य सदस्याः (वामतो दक्षिणं)
प्रो० राममूर्तिशर्मा, प्रो० रामकरणशर्मा (कवितां पठन्), प्रो०वी० वेंकटाचलः,
सञ्चालको डा० रमाकान्तशुक्लश्च

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

रामकरणशर्माणः[३७] किञ्च श्रीवेंकटाचलास्तत्र।
श्रीराममूर्तिसहिता अध्यक्षपदं ह्यलञ्चक्रुः ।।४२।।

चतुर्थ-सप्तमदिनयोरप्रेलस्योक्तप्रेक्षणागारे ।
अहमासं सयोजक इतरे कवयोऽभवँश्च सहभाजः।।४३।।

प्रो० ओम्प्रकाश पाण्डेयः

प्रो० हरिदत्त शर्मा

तत्र श्रीहरिदत्तो[३८] बैंकाकेऽभ्यागताचार्यः ।
पाण्डेयौम्प्रकाशः[३९] पेरिसपुर्याश्च सम्प्राप्तः ।।४४।।

कौशल्या वल्ली[४०] च, जम्मूनगरात्समायाता ।
भुवनेश्वरनगराच्छ्रीप्रफुल्लमिश्रस्तथा[४१] प्राप्तः ।।४५।।

दुर्गभिलाईवासी महेश शर्मा[४२] महोत्साहः ।
भुवनेश्वरवास्तव्यो गोपीनाथो महापात्रः[४३] ।।४६।।

प्रो० अशोकः अक्लूजकरः

प्रो० महेशचन्द्र शर्मा

अक्लूजकरोऽशोकः[४४] कैनेडादेशतः प्राप्तः।
उज्जयिनीकविपरिवृढ आचार्यः श्रीनिवासरथः[४५] ।।४७।।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

मौहम्मद इसराइल खानः[४६] पाण्डेय आर्एसः[४७] ।
कर्णावतीनिवासी श्रीमान् गौतमपटेलश्च[४८] ॥४८॥



विश्वसंस्कृतकविसम्मेलने कवितां पठन् डा० रमेशकुमार पाण्डेयः (४.४.२०००)

दिल्लीतः सम्प्राप्तः पाण्डेयाचार्य आर०के०[४९] युवकः ।
'शोधप्रभा' प्रकाशन-सम्पादनकार्यसंलग्नः ॥४९॥

भारती देवी (न्यूयार्क)

न्यूयार्कात्सम्प्राप्ता योगज्ञा भारती[५०] देवी ।
शर्मा श्रीरामकरण आचार्यो राममूर्तिश्च ॥५०॥

वी० वेंकटाचलाख्यो दार्शनिकः कविरथाचार्यः।
सिद्धार्थसुन्दरी च कवितापाठं मुदा चक्रुः ॥५१॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.



विश्वसंस्कृतकविसम्मेलने कवितां पठन् (दक्षिणे) रमाकान्त शुक्लः
(४.४.२०००)

मया 'भाति मे भारत'[५१] मिति काव्यात्रीणि पद्यानि ।
'उत्तरमङ्गल'[५२] नाम्नी रचना चैवांशतः पठिता ॥५२॥

प्रथमं कविसम्मेलन - सत्रं यस्मिन् दिने पूर्णम् ।
तस्मिन् दिवसेऽजायत वैक्रमनवरात्रप्रारम्भः ॥५३॥

विजयनाम-संवत्सर-प्रवृत्तिमभिलक्ष्य कविवर्यैः ।
शुभकामनाः प्रदत्ताः सर्वेभ्यः पूतभावेन ॥५४॥

अप्रैलगिरिसंख्येऽह्नि (७.४.२०००) काव्यपाठोपवेशने ।
जोशी किरीट[५३] आसीद्वै विशिष्टातिथिमानभाक् ॥५५॥



विश्वसंस्कृतकविसम्मेलनस्य द्वितीयोपवेशने (वामतो दक्षिणं) डा० किरीट जोशी (मुख्यातिथिः) प्रो० रामकरण शर्मा (अध्यक्षः) प्रो० श्रीनिवास रथः (कवितां पठन्) रमाकान्त शुक्लश्च (सञ्चालकः) (७.४.२०००)

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

श्रीनिवासरथश्चासीत् प्रमुखः काव्यपाठकः ।
'तदेव गगनं'[५४] सिद्धो यस्यास्ते काव्यसंग्रहः ॥५६॥

अशोकाक्लूजकरनामा कनाडादेशतः प्राप्तः ।
युवकविद्याव्रती कविताम् पपाठ क्रोडसंगणकात्[५५] ॥५७॥

अध्यक्षासन्दिका जुष्टा श्रीमद्भिर्धैर्यशालिभिः ।
करणोत्तररामैश्च शर्मभिः[५६] कवितल्लजैः ॥५८॥

यद्यपि कविसम्मेलनमासीन्नो कार्यसूचिस्थम्।
आयोजितं तथापि त्वरितेन प्रावधानेन ॥५९॥

श्रीरामकरणशर्मा, विक्टर ओगस्तिनी[५७] तथा चान्ये ।
ऑस्करबोत्तोप्रभृतय आसन् साहाय्यकर्तारः ॥६०॥

संयोजनसञ्चालनकर्मणि शुक्लो रमाकान्तः ।
नियोजितोऽयं सकलैः कविवाणीवन्दितां यातः ॥६१॥

दिनद्वये मध्यान्तरवेलायां योजिते ह्यस्मिन्।
अष्टादश किल रचनाः पठिताः कविभिर्मुदोत्फुल्लैः ॥६२॥

आयत्यामपि भूयात्कविगोष्ठी पूर्वसूचनया ।
एष प्रस्तावोऽभूत् कार्यसमित्यां तुरीनोपुरि ॥६३॥

अप्रेलपञ्चमेऽह्नि[५८] द्रष्टुं नगरं वयं याताः ।
चर्च-चतुष्पथ-संग्रहगेह-विपणिकाः समैर्दृष्टाः ॥६४॥

तस्मिन्नेव दिनाङ्केऽभूदर्पितं मानपुस्तकम्[५९] ।
ग्रेगरी एम० बोन्गार्डलेविनाय[६०] महात्मने ॥६५॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

'इण्डोलोजिका तौरीनेन्सिया'[६१] नाम विश्रुतम् ।
'आइ. ए.एस्.एस्.' संस्थायाः मुखपत्रं विराजते ॥६६॥

त्रयोविंश-चतुर्विंश-संख्याकौ तस्य नूतनौ ।
संयुक्ताङ्कौ प्रसिद्धौ यौ तौ जातौ मानपुस्तकम् ॥६७॥

(उपरि) वेनीसियानगरे सेण्टरस्क्वेयर जलमार्गतटे (वामतो दक्षिणं) डा० रामसुरेश-पाण्डेयः, रमाकान्त शुक्लः, प्रो० ओम्प्रकाश पाण्डेयः, डा० सुरेशचन्द्र गोस्वामी च। (नीचैः) सेण्टमार्कस्क्वेयरे उपर्युक्ता अन्ये च सहयात्रिणः।

अप्रेल-षष्ठदिवसे दृष्टा वेनीसिया नगरी ।
पाण्डेयद्वय-शुक्ल-त्रिपाठि-गोस्वामिभिर्गत्वा[६२] ॥६८॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

'वेनिस' इति या चांग्लैरुच्चार्या, सा पुरी रम्या ।
केवलजलपरिवहनं, तत्रास्ते साधनं गतागतयोः ॥६९॥





(उपरि) सेण्ट मार्क स्क्वेयरप्रांगणं (नीचैः) बासिलिक चर्च च ।
(साभारम्)

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

'सेन्मार्क स्क्वायर'[६३] दृष्टं, चर्च बासिलिकं[६४] तथा ।
विस्त्रब्धानां कपोतानां क्रीडा दृष्टा मनोहरा ॥७०॥

'सेण्ट मार्क स्क्वेयरे' कपोतानां क्रीडां पश्यन्तः रमाकान्त शुक्लः, डा० रामसुरेश पाण्डेयः, डा० ओम्प्रकाशपाण्डेयदम्पती च।

तेभ्यः कणा मया दत्ता वेष्टितस्तैरहं मुदा ।
केचिच्छिरसि सम्प्राप्ताः केचित्स्कन्धे परे करे ॥७१॥

सुरेशचन्द्रगोस्वामी दिल्लीवासी तदा मम ।
छव्यङ्कनं विधायादात् मह्यं चित्रमनन्तरम् ॥७२॥

बालकाः बालिकास्तत्र किशोराश्च किशोरिकाः ।
युवानोऽथ युवत्यश्च प्रौढ-वृद्धा विलोकिताः ॥७३॥

सर्वे सर्वाश्च गौरेण वर्णेन श्रियमागताः ।
श्यामैर्नेत्रैस्तथा केशैः शोभिता हृदयस्पृशः ॥७४॥

भोजनाभूषणादीनां यास्तत्रापणिकाः स्थिताः ।
आगन्तुकानां पुटकात् बलाल्लीराः[६५] हरन्ति ताः ॥७५॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

निवृत्य रेलयानने तस्मिन्नेव दिने वयम् ।
तुरीनोनगरं प्राप्ता निशीथे शीतभाविते ॥७६॥

सप्तम्यामाप्रेल्यां 'गुआलिनो' संज्ञके सभाभवने ।
ब्रोकिंग्टन्नाध्यक्ष्ये[६६] मयापि पठितं स्वकं पत्रम्[६७] ॥७७॥

श्रीमद्भागवतस्था नववर्णीयैर्युताः पादैः ।
अनुष्टुभो हि विमृष्टा सोदाहरणं मया तत्र ॥७८॥

रामकरणशर्मान्ये विद्वांसश्चात्र पत्रे स्वान् ।
सट्टिप्पणीरकुर्वन् पप्रच्छुर्मां तथा प्रश्नान् ॥७९॥

एषु बुधेषु श्रीमानक्लूजकरस्तथा च पाण्डेयः ।
रामसुरेशो गोपीनाथमहापात्र इति मुख्याः[६८] ॥८०॥

अष्टमेऽथ दिनाङ्केऽभूत्पूर्तिसत्रं[६९] सुयोजितम् ।
महाकक्षे 'गुआलीनो हॉल'-संज्ञे मनोरमे ॥८१॥

'हॉल गुआलीनो-' भूर्धन्यास्ते यत्र सफलं सत् ।
एकादशं हि वैश्वं संस्कृत-सम्मेलनं पूर्णम् ॥८२॥

मयार्वाचीनसंस्कृतपत्र-पूर्वाङ्का यथालब्धाः ।
समार्प्यन्ताशुकरभट्टाय[७०] विदुषे सादरं तत्र ॥८३॥

समापनसत्रकाले राममूर्तिः कुलपतिस्तस्मै ।
ददौ सम्मानपत्रं विश्व-विद्यागेहपक्षाद्वै[७१] ॥८४॥

पठितवान् सादरं सम्मानपत्रं तत्र हरिदत्तः ।
प्रयागस्थस्तथाद्यत्वेऽतिथिर्बैंकाक आचार्यः ॥८५॥

ततः सामूहिकं छव्यङ्कनं समवेतविबुधानाम् ।
'गुआलीनो विला' पृष्ठेऽभवत् सूर्यातपालोके ॥८६॥

तदाल्पसपर्वतश्रेणी हिमाच्छन्ना बभौ नूनम् ।
सरस्वत्याः शुभं हासं सृजन्ती विद्वदालोके ॥८७॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

तुरीनोनगर भ्रमणकाले 'बारबरा' युवत्या (मध्यस्थया) साकं सम्मेलनप्रतिनिधयः

ततः परं 'बारबरा'[७२] युवत्या
प्रदर्शिता नो नगरस्य शोभा ।
उद्यान-दुर्गादिविलोकनेन[७३]
हृष्टा वयं प्रेमरसाभिभूताः ॥८८॥

ततः परेद्युर्नवमे दिनाङ्के
गता समस्तातिथयः स्वदेशम् ।
निधाय चेतस्सु मधुस्मृतिं वै
सम्मेलनस्यास्य मनोहरस्य ॥८९॥

एवञ्चेतालियादेशे[७४] 'तुरीनो' नगरे मुदा ।
विश्वं संस्कृतमाहात्म्यादेकनीडमिवाभवत् ॥९०॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

द्विशताधिकविद्वांसः, समवेता मेलने ह्यस्मिन् ।
येषां नामग्रहणे स्थानं किल बह्वपेक्ष्येत ॥९१॥

ओगस्तीनी विक्टरस्तत्परः सन्
साचिव्यं श्री आस्करस्याकरोद्यः ।
प्रादादस्मभ्यं समस्तं हि साह्यं
तस्याभारं मानसे धारयामः ॥९२॥

'विला गुआलिनो' स्थानात् अप्रेलनवमे दिने ।
'तुरीनो' व्योमयानानां पत्तन[७५] वयमागताः ॥९३॥

अस्मान् नीत्वा समायाता शिष्टा या किल सुन्दरी ।
'लौरिदाना' मिधा, तस्यै धन्यवादान् ददाम्यहम् ॥९४॥

सा प्रसन्नानना तन्वी कर्तव्यकुशला तथा ।
सखीभिः सहिता साह्यमस्मभ्यं सततं ददौ ॥९५॥

तस्यै तस्याः सखिभ्यश्चाशीर्वादान् वितराम्यहम् ।
यत्र यत्र वसेयुस्ताः सर्वसौख्यमवाप्नुयुः ॥९६॥

'एमेनुएला' नवयौवनश्रीः
स्वकार्यदक्षा ह्यथ 'लौरिदाना'।
साहाय्यकर्त्री किल 'पावला' च
विस्मर्तुमेता न कदापि शक्याः[७६]॥९७॥

अस्मत्कक्षस्वच्छतापादयित्री
या शालीना सुन्दरी रम्यरूपा ।
हस्ते 'मोबाईल-फोनं' दधाना
साऽपि स्मर्यागन्तुकैर्नूनमास्ते ॥९८॥

'एयरफ्रांस' संज्ञेन विमानेन वयं तदा ।
'चार्ल्स डी गॉल' संज्ञं वै प्राप्ताः पेरिसपत्तनम् ॥९९॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

पेरिसनगर्याम् ईफिलटावर-स्तम्भः

'ईफिल टावर'नामा प्रथितो ह्यभ्रंल्लिहः स्तम्भः।
युगलकिशोरेण[७७] तथा शशिना[७८] साकं मया दृष्टः॥१००॥

दृष्टा स्वतन्त्रतायाः प्रतिमा विश्वश्रुताऽस्माभिः।
'सेन' नदीतीरस्था, न्यूयार्केऽप्यस्ति तादृशी मूर्तिः॥१०१॥



'ईफिल टावरं' निकषा (वामतो दक्षिणं) डा० युगलकिशोर मिश्रः
रमाकान्त शुक्लः, डा० शशि तिवारी च।

'ईफिल टावर'-पार्के सामूहिकचित्रमभवन्नः।
'नौएडा'-गुप्तकृत[७९] नूनमसौ धन्यवादार्हः॥१०२॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

आंग्लीं भाषां पेरिसवासी नो वदति कश्चिदपि ।
अनुमानेनैव वयं तेषां फ्रेंचं तु जानीमः ॥१०३॥

अस्माकं सारथिरपि फ्रेंचं वदति स्म नो आंग्लीम् ।
किन्त्विङ्गितैः समस्तं कार्यमभूत्सिद्धमस्माकम् ॥१०४॥

'एयरइण्डियायान'मारुह्याथ विलम्बतः ।
दिल्लीं प्राप्तः समित्रोऽहमप्रेलदशमे दिने ॥१०५॥

'मातास्माकं धरणी सर्वत्रैवाश्रयोऽस्माकम् ।
तस्याः स्वास्थ्यं नष्टं वयं कुपुत्राश्चिकीर्षामः ॥१०६॥

भ्रष्टाचार-कुपोषण-पर्यावरणप्रदूषणप्रभृति ।
कृत्वा वयं कुकार्यं मातुः क्लेशं सदा कुर्मः ॥१०७॥

मा कश्चिदपि धरित्र्याः क्लेशं वर्धिष्णुरस्तु कुत्रापि ।'
इत्यनया भावनया दिल्लीभूमिं ववन्देऽहम् ॥१०८॥

तस्मिन्नेव दिने(१०.४.२०००)मम पौत्र्याः[८०] प्रथमं तु जन्मदिनमासीत् ।
निजपित्रा साकं साप्यानेतुं मां समायाता ॥१०९॥

पुत्रान् पौत्रीं जायां दृष्ट्वा हर्षं जगामाहम् ।
पाण्डेयैः[८१] सहितोऽहं 'रमालयं'[८२] प्राप्तवान् सपदि॥११०॥

स्मारं स्मारमिदं किल सम्मेलनमस्म्यहं सुखितः ।
स्मरणीयमिदं स्थास्यति मन्येऽन्येषां बुधानामपि ॥१११॥

नगरभ्रमणं भोजनमावासः पत्रपरिपठनम् ।
वार्तालापश्चर्चा सर्वं सिद्धं 'तुरीनो'पुरि ॥११२॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

पूर्णं विवरणमास्ते दातुमशक्यं मयैकेन ।
यतो हि नोपातिष्ठम् सर्वेष्वपि सत्रकक्षेषु ॥११३॥

विद्वांसः प्रार्थ्यन्ते वैशद्याल्लेखितुं तत्तत् ।
सम्मेलनस्य वृत्तं साक्षाद्विहितं हि तैर्यद्यत् ॥११४॥

भारद्वाजोपाह्वा कमला[८३] विदुषी लिलेख गद्येन ।
सम्मेलनस्य वृत्तं प्रकाशितं भवति तच्चात्र* ॥११५॥

शशी तिवारी पाण्डेय आर. के. संज्ञकस्तथा ।
दृष्टं श्रुतं समाश्रित्य वृत्तं गद्ये लिलेखतुः ॥११६॥

यात्रायै 'यू०जी०सी०'[८४] प्रतिशुश्रावानुदानं मे ।
आयोगस्य तदर्थं वहामि कार्तज्ञमाभारी ॥११७॥

ये ये जना याश्च युवत्य आसन्
व्यस्ता प्रबन्धे खलु मेलनस्य ।
तेषाञ्च तासाञ्च भवन्तु लोके
मनोरथा लब्धफलाः सदैव ॥११८॥

सर्वे भवन्तु सुखिनः सर्वे स्वस्थास्तथा सन्तु ।
सर्वे संस्कृतरुचयः सर्वे किल पूर्णकामाः स्युः ॥११९॥

द्वादशं मेलनं वैश्वं हेलसिंक्यां हि सांस्कृतम् ।
त्रिवर्षानन्तरं भूयादेवमेव शुचिस्मृति ॥१२०॥

वैक्रमेऽद्रिशराकाशनेत्रे[८५] विजयवत्सरे ।
चैत्रे मासि सिते पक्षे नवम्यां बुधवासरे ॥१२१॥

* अर्वाचीनसंस्कृते

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

क्रैस्तविंशशताब्द्याश्च सहस्त्राब्द्यास्तथान्तिमे[८६] ।
द्विसहस्त्रतमे वर्षेऽप्रेलस्य द्वादशे दिने ॥१२२॥

'रमालये' रमाकान्तः निवसन् रमया सह ।
सपादशतकं चक्रे 'तुरीनोस्मृति'संज्ञकम् ॥१२३॥

नास्ते वर्णनविच्छित्तिर्नैवाप्यत्रास्त्यलंकृतिः ।
किन्तु साक्षात्कृतं वस्तु स्मरणीयमिहास्ति नः ॥१२४॥

इदं विवरणं सत्यमत्युक्तिरहितं शिवम् ।
पद्यरूपस्थितं भूयात् तोषार्थं संस्कृतात्मनाम् ॥१२५॥

(रचनातिथिः रामनवमी वि० २०५७, बुधवासरः १२.४.२००० ई०)

(वामतो दक्षिणं) वैद्यभगवानदाशः, प्रो० रामकरण शर्मा, प्रो० ऑस्कर बोत्तो, रमाकान्त शुक्लश्च (३.४.२०००)

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

पादटिप्पण्यः

१. एकादशम्।

२. 'इण्टरनेशनल एसोसिएशन ऑफ़ संस्कृत स्टडीज' (International Association of Sanskrit Studies, Paris) इत्येतन्नाम्नी संस्था यस्या मुख्यालयः पेरिसनगरेऽस्ति।

३. CESMEO इण्टरनेशनल इन्स्टीट्यूट फॉर एडवांस्ड एशियन स्टडीज तुरीनो (इटली) (International Institute for Advanced Asian Studies, Turin, Italy)

४. २००० तम क्रैस्तेऽब्दे।

५. तृतीयदिवसात् (३.४.२०००)

६. अष्टमदिनं यावत् (८.४.२०००)

७. २००० तमे।

८. CENTRO CONGRESSI TORINO INCONTRA, via Nino Costa 8, Turin (Italy).

९. Prof. Oscar Botto, President CESMEO, International Institute for Advanced Asian Studies, Turin, (Italy).

१०. Hotel—Villa Gualino, Viale Settimio Severo 63, 10133 TORINO (Turin) Italy.

११. आल्पस पर्वत-शिखरावलीम्।

१२. Prof. Pierre-Sylvain Filliozat, Ecole Pratique des Hautes Etudes, Paris (France).
Dr. Vasundhara Filliozat, Institute de Civilisation Indienne, Paris (France).

१३. CD-ROM अस्य प्रदर्शनं कम्प्यूटरयन्त्रेण चित्रपटे क्रियते यत्र दृश्यं श्रव्यं चोभयमपि साक्षात्क्रियते प्रेक्षकैः। मध्ये मध्ये प्रस्तोता व्याख्यामपि करोति।

१४. Dhadphale Prof. M. G., Hon. Secretary B. O. R. I., Pune (India)

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

१५. Hall Gualino, Hall Convegno, Hall Piemonte—इत्येतेषु सभागारेषु।

१६. 'Hall Gualino' इत्यत्र । 'गुआलीनो' इति प्रातिपदिकस्य सप्तम्यन्तं रूपम्।

१७. Delire Dr. Jean Michel, Universite' Libre de Bruxelles Bruxelles (Belgium).

१८. Garzilli, Prof. Enrica, Instituto di Linguistica, Universite' degli Studi di Perugia, Perugia (Italy).

१९. Misra Dr. Prafulla Kumar, Post Graduate Dept. of Sanskrit, Utkal University, Bhubaneswar (India).

२०. Kridalaksana, Prof. Harimurti, University of Indonesia, Jakarta (Indonesia).

२१. Devaki, Dr. H. P., Dept. of Studies in Sanskrit, University of Mysore, Mysore (India).

२२. Swamiji Prof. Shivamurthy, S. T. J. Education Society, Bangalore (India).

२३. Guruge Prof. Ananda W. P., Senior Special Advisor to the Director General of UNESCO, Dean of Academic Affairs and Director of the International Academy of Buddhism, Hsi Lai University, Los Angeles (CA, USA).

२४. Samtani Prof. Narayan H., Hon. Director of the Centre for Mahayana Buddhist Studies, Nagarjuna University, Guntur (India).

२५. Ghosh Dr. Manjulika, Dept. of Philosophy, University of North Bengal, Darjeeling (India).

२६. Tiwari Dr. Shashi, Reader in Sanskrit, Maitreyi College, University of Delhi, New Delhi (India).

२७. Wayman Prof. Alexander, Professor Emeritus of Sanskrit,

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

Colambia University, New York (U.S.A.).

२८. Siddhartha, Dr. Sundari, Indraprastha College, Delhi (India).

२९. Goswami, Dr. Suresh C., Dept. of Chemistry, Dyal Singh College, University of Delhi, New Delhi (India).

३०. Patel Dr. Gautam, Chairman, Sanskrit Sahitya Akademi, Gujrat State, Ahmedabad (India).

३१. देववाणी-परिषद्, दिल्ली Devavani Parishad, Delhi, R-6, Vani Vihar, New Delhi-110059.

३२. Goldman Prof. Robert P., Dept.of South and Southeast Asian Studies, University of California at Barkeley (CA, USA).

३३. Sharma Prof. Ram Karan, President I.A.S.S., Delhi (India).

३४. Venkatachalam Prof. V., Chairman, Indian Council of Philosophical Research, Govt. of India, Varanasi (India).

३५. श्रीजगन्नाथसुप्रभातम् तथा अन्यानि स्तोत्राणि Shri Jagannatha Suprabhatam and Other Stotras (with English Commemtary) by S. Sundararajan, I.A.S. (Rtd.) Devavani Parishad Delhi, R-6 Vani Vihar, New Delhi-110059 (India), 1998.

३६. अर्वाचीनसंस्कृतस्य सम्पादकेन रमाकान्तशुक्लेन सह।

३७. एकस्यैव जनस्य कृते कविसम्मेलनस्य समाप्तिं यावदुपवेशनं कठिनं भवतीति हेतोः संस्कृतकविसम्मेलनस्य आयोजनकाले मया प्राय एकाधिकानां विदुषामध्यक्षमण्डलं निर्मीयते येन एकस्य सदस्य-स्यानुपस्थितावपि सम्मेलनमध्यक्षविरहितं न स्यात्। श्रीराममूर्तिः=Sharma Prof. Ram Murti, Vice Chancellor, Sampurnanand Sanskrit University, Varanasi (India).

३८. Sharma Dr. Hari Dutt, Visiting Professor of Sanskrit, Dept. of Oriental Languages, Silpakorn University, Bangkok (Thailand).

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

३९. Pandey Prof. Om Prakash, ICCR Visiting Professor of Sanskrit, Oriental Dept., Sorbonne, Paris (France).

४०. Walli Dr. Koshalya, Former Head of the Sanskrit Dept., Jammu University, Jammu Tawi (India).

४१. द्र० पादटिप्पणी १९.

४२. Sharma Prof. Mahesh Chandra, Bhilai (India).

४३. Mahapatra Prof. Gopinath, Head of the Dept. of Sanskrit, Utkal University, Bhubaneswar (India).

४४. Aklujkar Prof. Ashok N., Dept. of Asian Studies, British Columbia University, Vancouver (Canada).

४५. Rath Prof. Shrinivas, Formar HOD Sanskrit, Vikram University, Ujjain, M.P. (India), 18 Kalidasa Marg, Ujjain 456010 (India).

४६. Khan Prof. M. I., Sanskrit Dept., University of Delhi, South Campus, New Delhi (India).

४७. Pandey Dr. Ram Suresh, Reader in Sanskrit Dept., Rajdhani College, New Delhi-110015 (India)

४८. द्र० पादटिप्पणी ३० ।

४९. Pandey Prof. Ramesh Kumar, Shri Lal Bahadur Shastri Rashtriya Sanskrit Vidyapeeth, New Delhi (India).

५०. Bharati Devi, Anand Ashram, New York (U.S.A.).

५१. 'भाति मे भारतम्' इत्येतच्छीर्षकं काव्यं यस्य प्रथमं संस्करणं १९८० तमे चतुर्थं च संस्करणं १९९९ तमे ख्रैष्टेऽब्दे प्रकाशितं जातम्।

५२. 'उत्तरमङ्गलम्' इत्येतच्छीर्षकं ४७ स्रग्विणीयुतं काव्यं यद्धि कस्यचिन्मित्रस्य नववर्षशुभकामनाया उत्तरस्वरूपमस्ति मित्रस्य मङ्गलं च कांक्षति।

५३. Joshi, Kirit, Former Secretary, Ministry of Education, Govt. of India, New Delhi.

५४. द्र० पादटिप्पणी ४४

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

५५. 'लेप टॉप'-नाम कम्प्यूटरयन्त्रात्।

५६. प्रो० रामकरणशर्मभिः । द्र० पादटिप्पणी ३३

५७. Victor Agostini, Confrence Secretary.

५८. ५.४.२००० तारिकायाम्। तस्मिन् दिने स्क्वेयर-प्रसिद्ध चर्चगर्भगृहदर्शनानन्तरं 'Via Po 55, Torino' इत्यत्र स्थितः 'Museo Di Arti Decorative' -संज्ञकः संग्रहालयो दृष्टः। तदनन्तरं 'ड्राइव तौरीनी' प्रभृति मार्गा अपि दृष्टाः।

५९. Felicitation Volume.

६०. Bongard—Levin Prof. Gregory, Russian Academy of Sciences, Moscow (Russia).

६१. Indologica Taurinensia (Official Organ of the International Association of Sanskrit Studies), Volume XXIII-XXIV 1997-98, Editor in Chief : Oscar Botto. Published by CESMEO, Via Cavour, 17-10123 TORINO (Italy).

६२. 'पाण्डेयद्वय' इति पदेन सपत्नीकः डा० ओम्प्रकाशपाण्डेयः डा० रामसुरेशपाण्डेयश्च निर्दिष्टौ, द्र० टिप्पणी ३९, ४७ । 'शुक्ल'पदेन रचनाकारो रमाकान्तशुक्लो निर्दिष्टः । त्रिपाठिपदेन डा० आशारानी त्रिपाठी गृह्यते—Tripathi Asha Rani, Head of the Dept. of Sanskrit, Sankardev College, Shilong (India). 'गोस्वामि'पदेन २९ टिप्पण्यंकितः डा० सुरेशचन्द्रगोस्वामी सपत्नीको गृह्यते ।

६३. St. Marcus Square.

६४. Bacilik of St. Marcus.

६५. इटलीदेशस्य 'लीरा' (Lira) संज्ञकमुद्राः ।

६६. Brockington Prof. John L., School of Asian Studies, University of Edinburgh, Edinburgh (U.K.)

६७. *'Anuṣṭubh in Śrīmad Bhāgavata Mahāpurāna'* इतिशीर्षकं शोधपत्रम् ।

६८. एतेषां विदुषां परिचयार्थं—३३, ४३, ४४, ४७ संख्याकाः टिप्पण्यो द्रष्टव्याः।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

६९. Closing Section—Valedictory Address.

७०. **'आशुकरभट्ट'** इति संस्कृतीकृतं नाम प्रो० ऑस्कर बोत्तो महाभागस्य। नामेदमुद्घाटनसत्रे आचार्यवेंकटाचलेनोत्प्रेक्षितमासीत् ३.४.२००० तारिकायाम्।

७१. सम्पूर्णानन्दसंस्कृतविश्वविद्यालयपक्षतः ।

७२. 'बारबरा' इति पथप्रदर्शिकाया (Guide) नाम ।

७३. 'बोटेनिकल गार्डन'-'कासल'-प्रभृतिदर्शनीयस्थलानां विलोकनेन ।

७४. 'इतालिया' इतीटलीदेशस्य तत्रत्यभाषायां नाम ।

७५. 'ट्यूरिन एयरपोर्ट' इत्यत्र।

७६. Emanuela, Loredana, Paola—इत्याख्या: स्वयंसेविकास्तत्र समागतानां प्रतिनिधीनां प्रसन्नमुखेन साहाय्यं चक्रुः । तासां शिष्टता अविस्मरणीयास्ति।

७७. Mishra Prof. Yugal Kishore, Secretary of M. S. Rashtriya Vedvidya Pratishthan, Pradhikaran Bhawan, Ujjain (India).

७८. डा० शशि तिवारी-महाभागया सह । द्र० टिं० २६

७९. श्री एच० पी० गुप्तः 'भारत पेट्रोलियम कार्पोरेशन लिमिटेड, ए ५-६, सेक्टर १, नोएडा, उ० प्र०-२०१३०१' इत्यत्र 'वरिष्ठ प्रबन्धक-प्रशासन (उत्तर)' इतिपदमधितिष्ठन् अस्माकं चित्रं स्व कैमरायन्त्रेण जग्राह। स च चित्रस्य प्रतिरूपाण्यपि मत्सकाशे प्रेषितवान्-इत्यसौ धन्यवादार्हः ।

८०. 'अर्चिता' नाम्न्याः मम पौत्र्याः जन्मदिवसः १०.४.१९९९ अस्ति । डा० चन्द्रमौलिस्तस्य पिता, माता च सौ० अनिता शुक्ला ।

८१. डा० रामसुरेशपाण्डेयमहाभागैः । तेऽस्मत्प्रतिवेशिनः । सहैव गताः, सहैवागताः ।

८२. 'रमालयः' इत्यस्मद्गृहस्य नाम । संकेतस्तु-'आर६ वाणी विहारः, नयी दिल्ली-११००५९' इति ।

८३. डा० कमला भारद्वाज महाभागा-या नवदिल्लीस्थ श्रीलालबहादुरशास्त्री-राष्ट्रियसंस्कृतविद्यापीठे प्राध्यापिकास्ति या च भारतसर्वकार-मानव-

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

संसाधनमन्त्रालयत: सम्मेलने प्रेषितासीत्–अस्मदनुरोधं संरक्ष्य गद्येन सम्मेलन वृत्तमलेखीत्, एवञ्च डा० शशी तिवारी–महाभागया डा० रमेशकुमार-पाण्डेय-महाभागेन च यथादृष्टश्रुतं विवरणमलेखि। एतद्विवरणत्रितयमप्य-र्वाचीनसंस्कृते प्रकाशितम्।

८४. नवदिल्लीस्थ: विश्वविद्यालयानुदानायोग: (University Grant Commission)

८५. अद्रय: सप्त (७) शरा: पञ्च (५) आकाश: शून्यम् (०) नेत्रे द्वे (२) अङ्कानां वामतो गति:। २०५७ तमे विजयनाम्नि वैक्रमेऽब्दे-चैत्रशुक्ल-नवम्यष्टम्यौ बुधवासरे आस्ताम्। अत एव दुर्गाष्टमी, रामनवमी च एकस्मिन्नेव दिने मानिते।

८६. १२.४.२००० तम दिनाङ्के। विंशशताब्द्या द्वितीयसहस्राब्द्याश्च अन्तिमं वर्षमिदम् न तु एकविंशशताब्द्यास्तृतीयसहस्राब्द्याश्च आद्यं वर्षम्। न जाने किमिति विचिन्त्य लोका ३१.१२.२००० त: पूर्वमेव नूतनसहस्राब्द्यां प्रवेशमुत्प्रेक्षन्ते। अहं तु १.१.२००१ त: नूतनवर्षप्रवेशं स्वीकरोमि।

इटलीदेशे 'तुरीनो' नगरे 'विला गुआलिनो' इत्यत्र एकादशविश्वसंस्कृतसम्मेलनस्य प्रतीकचिह्नेन साकं (वामतो दक्षिणं) डॉ० रामसुरेश पाण्डेय:, डॉ० कमला भारद्वाज, रमाकान्त शुक्ल:, डॉ० शशी तिवारी, डॉ० महेशचन्द्र शर्मा, डॉ० प्रफुल्ल कुमार मिश्रश्च (३.४.२०००)

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

महाकुम्भे

अपूर्वं दृश्यते दृश्यं प्रयागीये महाकुम्भे ।
नृणामास्था जलधिरूपा प्रविष्टास्ते महाकुम्भे ॥

सहस्राब्द्याः शताब्द्या नूत्नवर्षस्याथवारम्भे ।
जगत्स्नाति त्रिवेण्याः पावने सलिले महाकुम्भे ॥

इमे नागा इमे वैरागिणः सङ्गमजले स्नातुम्।
महोत्साहास्तथान्ये साधवः प्राप्ता महाकुम्भे ॥

न केवलमागता भरतावनेर्विविधप्रदेशेभ्यः।
अपितु सम्पूर्णजगतो मानवाः प्राप्ता महाकुम्भे ॥

किमास्ते तद्ररहस्यं यज्जनान् योजयति भिन्नहृदः ।
परीक्षन्ते समीक्षन्ते जगद्विज्ञा महाकुम्भे ॥

किमयमास्तेऽन्धविश्वासोऽथवास्था बद्धमूला यत् ।
जनाः शिशिरे जले शीतेऽवगाहन्ते महाकुम्भे ॥

स्थितः सूर्यस्तथा चन्द्रो मकरराशौ गुरुर्मेषे ।
वृषे वा, द्वादशाब्दानन्तरं स्नामो महाकुम्भे ॥

हरिद्वारे तथोज्जयिनीनगर्यां नासिकक्षेत्रे ।
प्रयागे तीर्थराजे दृश्यते मेला महाकुम्भे ॥

विना विज्ञापनं नृणां महासम्मर्द आगच्छन् ।
मनोमोक्षं महानन्दं च लभतेऽयं महाकुम्भे ॥

अगच्छन्तः प्रयागं किञ्च न स्नात्वापि गङ्गायाम् ।
पितुर्मातुर्गुरोः सेवापराः पूताः महाकुम्भे ॥

अथो ये दूरतो गङ्गां स्मरन्तोऽहर्निशं लोकाः ।
परोपकृतिव्रतस्थास्तेऽपि धन्या वै महाकुम्भे ॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

अहो मे राष्ट्रगरिमा येन जीवामो वयं सर्वे ।
विभिन्ना एकतां याता मिलामो वै महाकुम्भे ॥

किशोरा बालका वृद्धा युवानः स्नान्त्यथो प्रौढाः ।
किशोर्यो बालिका वृद्धा युवत्यो वै महाकुम्भे ॥

भवेद्राष्ट्रं समृद्धं वञ्चकैः शून्यं प्रगतिपरकम् ।
समस्तं विश्वमास्तामेकनीडं वै महाकुम्भे ॥

प्रभुं परमेश्वरं विनतेन शिरसा प्रार्थयामो यत् ।
समे सद्बुद्धिसत्कर्मान्विता स्युर्वै महाकुम्भे ॥

पुरातननूतनाभ्यामिह मिलित्वा साध्यते योगः ।
भवन् मुग्धोऽवलोकय नूतनामाभां महाकुम्भे ॥

रमाकान्तस्तु न प्राप्तस्त्रिवेण्याः सङ्गमक्षेत्रे ।
परं लभतेऽनया गीत्याभिषेकायं[1] महाकुम्भे ॥

(रचनातिथिः १४-१-२००१)

इलाहाबाद-रेलस्थानके भोजी कुद्दू-लीनाः ।
हता न मोक्षं लभन्ते को प्रभो या चे महाकुम्भे ।

११/२/२०१३

---

१. अयः शुभावहो विधिः। अभिषेकस्यायस्तम्।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

मित्रतां कामये शात्रवं चाश्रये !

मित्रतां कामये शात्रवं चाश्रये,
पार्श्ववर्ती तवाहं सदा कूटधीः ।
त्वद्गृहे त्वद्विरुद्धं भणाम्यप्रियम्
आतिथेय ! त्वदीयोऽतिथिश्चास्म्यहम् ॥१॥

शैशवे क्रीडितं यत्र गेहे मया,
मातुलो मेऽवसद् यत्र गेहे पुरा ।
तद् गृहं द्रष्टुमत्युत्सुकश्चास्म्यहम्
नैव शान्त्याः कृतेऽस्म्युत्सुकः किन्त्वहम् ॥२॥

न ह्युपेक्षे विवादास्पदानुद्धतान्
गेहविस्फोटकान् त्वद्गृहे भाषितुम् ।
पूर्वमेतैः सहाहं वदिष्यामि भो
त्वां ततोऽहं वदाम्यप्रियं वा प्रियम् ॥३॥

वाचि चित्तेऽथ कार्ये न चैकोऽस्मि भो
दर्शनीयं स्थलं वीक्ष्य मोदं भजे ।
भोजनं स्वादु तेऽहं करिष्ये परं
नैव संयुक्तघोषं करिष्याम्यहम् ॥४॥

त्वद्गृहे यच्च संगीतमायोज्यते
तत्स्वकर्णातिथीकर्तुमस्म्युत्सुकः ।
किन्तु दातुं न पार्श्वे ममास्ते कणो
त्वत्सकाशाच्च सर्वं जिघृक्षाम्यहम् ॥५॥

त्वद्व्यवस्थापिते सौधकक्षे सखे
रात्रिरेषा मया वै कथं नीयताम् ।
दीयतां मेऽवकाशो विवक्षां स्वकां
येन शान्तां विधातुं क्षमः स्यामहम् ॥६॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

अस्मि मार्जारिका सिंहगेहे स्थिता गर्जनं
कुर्वती म्याँउशब्दैः स्वकैः ।
त्वं तु शान्तिं चिकीर्षुः सखे गेहयो-
स्तावकं श्रद्दधे नो वचः किन्त्वहम् ॥७॥

आगतोऽहं गृहं ते सखे याचितुम्
उत्तमाङ्गं त्वदीयस्य गेहस्य वै ।
दीयतां मह्यमेतद् यथा मद्गृहे
वर्धतां मे प्रतिष्ठा सुखी स्यामहम् ॥८॥

त्वच्छिरो नास्ति ते, तत्र वादोऽस्ति भो
मामकस्तत्र चास्तेऽधिकारः परः ।
दीयतां त्वच्छिरो मे, विवादो भवेद्
येन शान्तोऽथ मैत्रीं च पुष्णाम्यहम् ॥९॥

त्वं त्वतीवासि रे निष्ठुरो मित्र मे,
नो शृणोषि त्वमीषन्ममाभाषितम् ।
त्वं न दत्से यदा मे ममाकांक्षितं
यामि नैजं गृहं रिक्तहस्तोऽप्यहम् ॥१०॥

वर्तसे मेऽग्रजस्त्वं यतस्तत् सखे,
त्वं न किञ्चिद्वदेः त्वं शृणुष्वैव माम् ।
अन्यथेमां परित्यिज्य वार्तां सखे !
यामि नैजं गृहं वै निशीथेऽप्यहम् ॥११॥

यामि हंहो कथंकारमस्माद् गृहाद्
रिक्तहस्तः स्वकं गेहमद्य प्रभो ।
मर्षयिष्यन्ति मां नो जना मे गृहे
स्वाननं तान् कथं दर्शयिष्याम्यहम् ॥१२॥

(रचनातिथिः १७-७-२००१)

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

आतंकवादस्य घोरताण्डवः

एकविंशशताब्दीये प्रथमे किल वत्सरे ।
सितम्बराभिधे मासे ह्येकादशतमे दिने ॥१॥

अमेरिकायां न्यूयार्के मनहट्टनसंस्थिते ।
विश्वव्यापारकेन्द्रस्थे "ट्विन् टावर" संज्ञके ॥२॥

अभ्रंलिहे द्वे भवने शताभ्यधिकभूमिके ।
आतंकवाददुर्मत्तराक्षसेन विनाशिते ॥३॥

वाशिंग्टने स्थितं किञ्च 'पेण्टागाने'तिसंज्ञकम् ।
सुरक्षाभवनं ध्वस्तं विमानाक्रमणेन वै ॥४॥

चिरादातंकपीडा यानुभूता भारतेन वै ।
सानुभूता किलेदानीं पाश्चात्त्यै राष्ट्रनायकैः ॥५॥

'ओसामा-बिन-लादेन एतत् कार्यमकारयत्' ।
विश्वस्येत्यमरीकाया अध्यक्षः श्रीबुशाह्वयः ॥६॥

तालिबानोपरि व्योममार्गादाक्रमणाय वै ।
निजसैन्यं दिदेशाथ सहयोगिबलानि च ॥७॥

अद्यत्वे काबुले चैव कन्दाहारे प्रवर्तते ।
तालिबानीयसैन्येषु बम्बवर्षा दिवानिशम् ॥८॥

अलकायदेतिसंज्ञस्य प्रमुखो बिनलादनः ।
अनिशं क्वापि लीनोऽपि बुशं शंकयते भृशम् ॥९॥

परिणामो भवेत्कोऽस्याः स्थितेरिति न निश्चितम् ।
कथावशेषे भवने तु स्मरणीये सदा हि मे ॥१०॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

भवनद्वयस्य यच्चित्रम् मयाग्राहि गतेऽब्दके ।
तदत्र[1] दीयते चित्रं तत्स्मृत्यर्थं मयाधुना ॥११॥

ये जनास्तत्र निधनं प्राप्तास्तेषाञ्च सद्गतिम् ।
याचेऽहम् परमात्मानम् सृष्टिस्थितियप्रभुम् ॥१२॥

आतंकवाद उच्छिन्नो जायताम् जगतीतलात् ।
परित्राताः साधवः स्यु' र्दुष्कृतः स्युर्विनाशिताः ॥१३॥

(रचनातिथिः १५-१०-२००१)



१. अर्वाचीनसंस्कृते (२३/४) चित्रमिदं प्रकाशितमासीत् ।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

भारतस्य जनता समीक्षते

को नु देशगरिमाणमीहते
को नु भारत-सुखानि कांक्षति ।
राष्ट्रियैक्यमथ को रिरक्षति
भारतस्य जनता समीक्षते ॥१॥

के ब्रुवन्ति किमु किं च कुर्वते
प्राप्य शक्तिमथ को न माद्यति ।
वञ्चयन्ति मतदायकान्न के
भारतस्य जनता समीक्षते ॥२॥

कोऽस्ति राष्ट्रहितसाधने रतः
कश्च राष्ट्रपरिवञ्चने रतः ।
केन कस्य किल कर्म किं कृतम्
भारतस्य जनता समीक्षते ॥३॥

कश्च केन किमिति प्रसाद्यते
कश्च केन किमिति प्रतार्यते ।
कोऽस्ति कस्य प्रणिधिः क्व कीदृशो
भारतस्य जनता समीक्षते ॥४॥

आत्मतन्त्रमिदमाप्तमस्ति यत्
त्यक्तसर्वविधसौख्यसाधनैः ।
तस्य रक्षणकृते नु के क्षमाः
भारतस्य जनता परीक्षते ॥५॥

कैः कृतं च किल देशखण्डनं
कैः क्रियेत पुनरस्य मण्डनम् ।
कः करोति खलु दण्ड्यदण्डनं
भारतस्य जनता निरीक्षते ॥६॥

कोऽपवञ्चनपरोऽस्ति नायकः
कश्च मुग्धजनताप्रतारकः ।
कश्च सर्वजन-ताप-हारकः
भारतस्य जनता समीक्षते ॥७॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

को विरागमुपयाति शासनात्
कोऽतिरागमुपयाति चासने ।
धूर्त उच्चपदवीं कथं गतः
भारतस्य जनता समीक्षते ॥८॥

कः कियान् पवनयात्रितां गतः
कः कियान् विषधरैर्वृतः स्थितः ।
को जहाति शठतां न कर्हिचिद्
भारतस्य जनता समीक्षते ॥९॥

नन्नमीति कतमं जनं च कः
कश्चिखादिषति जानतं धनम् ।
को जिघृक्षति कथं मतं नृणां
भारतस्य जनता निरीक्षते ॥१०॥

किं किमस्ति किल काकचेष्टितं
किं किमस्ति किल गृध्रचेष्टितम् ।
किं किमस्ति परवञ्चनावचो
भारतस्य जनता समीक्षते ॥११॥

कृष्णवित्तविपुलार्जने रताः
के च सन्ति मलिनाशया जनाः ।
के हरन्ति जनता - धनं खलाः
भारतस्य जनता समीक्षते ॥१२॥

देशलुण्ठनमहाव्रतस्थितान्
लक्षकोटिधनवञ्चनाचणान् ।
धर्मकञ्चुकधराँश्च राक्षसान्
भारतस्य जनता निरीक्षते ॥१३॥

कः करोति शठपादचुम्बनं
सूचनां ददति के च शत्रवे ।
मन्वते च किल के भुवं प्रसूं
भारतस्य जनता निरीक्षते ॥१४॥

गूढशत्रुप्रतिवेशिनः कथं
नित्यमेव प्रविशन्ति भारतम् ।
स्वास्थ्यनाशकरणाय तस्य वै
भारतस्य जनता समीक्षते ॥१५॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

भ्रष्टकृत्यमथ ये निरन्तरं
निर्भयेन मनसा प्रकुर्वते ।
तानपि प्रखरदुःखदारिता
भारतस्य जनता समीक्षते ॥१६॥

पित्र्यरिक्थमिव राष्ट्रियं धनं
वीतचिन्त उदरे करोति कः ।
श्रव्यदृश्यविविधप्रमाणकैः
भारतस्य जनता समीक्षते ॥१७॥

जातिजन्यरिपुताप्रसारणे
कस्य वै रुचिरिहास्ति जाग्रती ।
कश्च वञ्चनपरः सभागृहे
भारतस्य जनता समीक्षते ॥१८॥

को नु साम्प्रतमिहास्ति भारते
देशसौख्यहितसाधने रतः ।
आगते तु चयने[1] विवेकिनी
भारतस्य जनता परीक्षते ॥१९॥

को जितेन्द्रिय इहास्ति नायकः
केन भारतहितं च साध्यते ।
केन राष्ट्रगरिमा विवर्ध्यते
भारतस्य जनता प्रतीक्षते ॥२०॥

आततायिपवनाशनाशनो[2]
वैनतेय इह कोऽस्ति नायकः ।
राष्ट्रशत्रुपरिपातनोत्सुको
भारतस्य जनता प्रतीक्षते ॥२१॥

स्युः कदात्र किल पूजिता गुणाः
नैव लिङ्गमथ नो वयो नृणाम् ।
राष्ट्ररक्षणपरैकमानसा
भारतस्य जनता प्रतीक्षते ॥२२॥

कोऽधुना भरतभूसुसेवया
धन्यमात्मजननं विधास्यति ।

---

१. चयने=निर्वाचने

२. पवनाशनः=सर्पः। पवनाशनोऽशनं यस्य सः। सर्पभक्षी ।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

पूरयिष्यति च को ममेहितं
भारतस्य जनता प्रतीक्षते ॥२३॥

नार्तपीडनमिहास्तु कुत्रचित्
नाप्युपद्रवपरम्परा स्फुरेत् ।
नैव वञ्चकजयः प्रतिष्ठताम्
भारतस्य जनता समीहते ॥२४॥

नास्तु कश्चिदिह रोगपीडितः
नास्तु कश्चिदिह चाप्यशिक्षितः ।
नात्र वृत्तिरहितोऽस्तु कश्चन
भारतस्य जनता समीहते ॥२५॥

यस्य जन्म भरतावनौ भवेत्
तस्य तस्य भरणं भवेद् ध्रुवम् ।
वृत्तिकष्टमिह कोऽपि नाप्नुयाद्
भारतस्य जनता समीहते ॥२६॥

आततायिकृतदुष्कृतिर्जनं
बाधयेन्नहि कदापि भारते ।
कर्मठत्वमभिवर्धतां नृणां
भारतस्य जनता समीहते ॥२७॥

नापराधिजनसुप्रतिष्ठता
नापि तस्करजनानुमोदनम् ।
नैव देशहितखण्डनं भवेद्
भारतस्य जनता समीहते ॥२८॥

सत्यमेव जयतान्न चानृतम्
आर्जवं जयतु नैव दुष्टता ।
वीरता जयतु राष्ट्ररक्षिणी
भारतस्य जनता समीहते ॥२९॥

राष्ट्रमस्तु सुखशान्तिपूरितं
राष्ट्रमस्तु सुदृढं सुरक्षितम् ।
राष्ट्रमस्तु सुयशःसमृद्धिमत्
भारतस्य जनता समीहते ॥३०॥

(रचनातिथिः २४-१२-२००१)

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

किं कुर्यात्

कृते यत्नेऽपि नो सिद्धिर्भवति चेत्कोऽत्र किं कुर्यात् ।
विरुद्धे भागधेये कर्म कुवाणोऽपि किं कुर्यात् ?
'विलिण्टाइन' दिने छात्राः कुसुमहस्ता गताः पार्के ।
वराकोऽध्यापको गत्वापि कक्षे ब्रूहि किं कुर्यात् ॥
गृहादचलं भवन्तं द्रष्टुकामोऽहं यथाकालम् ।
परं मार्गेऽमिलज्जामो विलम्बे कोऽत्र किं कुर्यात् ॥
गृहाच्चलितः समयतोऽहं परं मध्येपथं रुद्धः ।
'विलम्बादागतोऽस्मी'ति क्षमायाच्ञ्यपि किं कुर्यात् ॥
उपस्थितिञ्जिकास्ते द्वारि चारक्षी लगुडहस्तः ।
तथापि त्वं त्वदीयैस्ताड्यसे चेत्करेऽत्र किं कुर्यात् ॥
भवति साक्षात्कृतिर्विद्यागृहे त्वं चोत्तमश्रेणिः ।
न पूर्वेद्युस्त्वया दृष्टो विशेषज्ञोऽपि किं कुर्यात् ॥
श्रुतो धर्मः, कृता सन्ध्या, श्रिते चाभ्यासवैराग्ये ।
जहाति च नैव चाञ्चल्यं मनः किल कोऽत्र किं कुर्यात् ॥
अहं यां चिन्तयाम्यनिशं विना यां नो लभे निद्राम् ।
न सा दूरध्वनौ सुलभा, जनोऽयं मित्र ! किं कुर्यात् ॥
प्रिया भार्या त्वमसि, वदसि प्रियं प्रियमण्डने, पत्यै ।
न चेत्समयेऽशनं दत्से पतिस्ते ब्रूहि किं कुर्यात् ?
त्वया विषभक्षणं कृत्वा कृतायामात्महत्यायाम् ।
प्रियस्त्वां नैति चेद् द्रष्टुं तवेदं कर्म किं कुर्यात् ॥
वधूः श्वसुरालयादपमानिता गच्छति पितुर्गेहे ।
पितुर्गेहेऽपि नो सौख्यं भजति चेत्सात्र किं कुर्यात् ?
महामात्योऽटलोऽध्यक्षो मुशर्रफ् चागरानगरे ।
शिखरवार्तावसाने निष्फलौ ! कः कोऽत्र किं कुर्यात् ?
'मृतो वा जीवितो वापेक्ष्यते न्यायाय लादेनः ।'
प्रतिज्ञायापि नो लभते बुशस्तं चेत्स किं कुर्यात् !
कृते विविधे प्रपञ्चेऽपि प्रकामं बहुमतं नाप्तम् ।
इदानं वञ्चनाचुञ्चुर्दलाध्यक्षोऽपि किं कुर्यात् !
इमे प्रतिपक्षिणो भूत्वा समायाता वृकाः सदने ।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

परं तत्रैकतां प्राप्ता ऋजुर्मेषोऽत्र किं कुर्यात् !
इमे बहुनायका रथिनो रथं विमता यदारूढाः ।
निनीषुस्तं प्रमुखसारथिरयं विवशो नु किं कुर्यात् ?
मतं दत्तं त्वया किल यत्तु तद्युक्तं परं भ्रातः ।
ददासि न चेत्त्वमुत्कोचं तदा नेतापि किं कुर्यात् ?
अरण्ये रोदनं कुरुषे बधिरकर्णे जपसि बन्धो !
पठितवानसि बहून् ग्रन्थान्, त्वदर्थं कोऽपि किं कुर्यात् !
गृहीत्वा पाटलं पुष्पं वसन्तो द्वारि सम्प्राप्तः ।
मनसि किल पत्रशातनमस्ति, मधुमासोऽत्र किं कुर्यात् !
कवी रात्रौ लिखति कविताममरकोशं मुहुः पश्यन् ।
न च श्रोतास्य शृणुते पद्यबन्धं सोऽत्र किं कुर्यात् !
कृते यत्नेऽपि मुद्रणदोषतो मुक्तिर्न यदि लभ्या ।
तदाक्षरयोजकः सम्पादको वा मित्र ! किं कुर्यात् !
अहं शस्त्रास्त्रसम्पन्नो भटः सीमासु तिष्ठामि ।
न चादेशं लभे युद्धस्य, शौर्यं मेऽत्र किं कुर्यात् ?
मदीयौ द्वौ सखायौ हस्तमेलनमद्य नो कुरुतः ।
तयोर्मैत्रीं दिदृक्षुश्चेज्जनोऽयं ब्रूहि किं कुर्यात् ?
ययोरशनं कुलं शीलं तथा कर्माणि भिद्यन्ते ।
तयोर्मैत्रीं विवाहं चेच्छसि त्वं ? कोऽत्र किं कुर्यात् ॥
स्वराष्ट्रस्य प्रगतिमिच्छन्ति कवयोऽध्यापका वीराः ।
भटा उद्योगिनः श्रमिणः, कुनेता किन्तु किं कुर्यात् !
यदास्माभिश्चिताः प्रभवो मलीमसकर्म कुर्वाणाः ।
मुहुर्गायन् 'स्वभारतभां' रमाकान्तोऽपि किं कुर्यात् ॥

(रचनातिथिः १६.२.२००२)

योऽयमातंकवादः

योऽयमातंकवादः खलानां खलः पूजितो मुह्यमानो जगद् बाधते ।
आयतौ नैव कीर्तिं जयं चाप्नुयान्नूतने वत्सरे वो भवेन्मङ्गलम् ॥

(रचनातिथिः १५.१.२०००)

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

काव्यप्रणेता रमाकान्तशुक्लः

जन्मतिथिः : २४-१२-१९४० ई०

जन्मस्थानम् : खुर्जा (उ०प्र०)

पिता : (स्व०) श्री ब्रह्मानन्द शुक्लः

माता : श्रीमती प्रियम्बदा शुक्ला

शिक्षास्थले : खुर्जास्थश्रीराधाकृष्ण-संस्कृतकालेजः, एन.आर.ई.सी. कालेजश्च।

शिक्षा : एम.ए. (हिन्दी-संस्कृतयोः) पीएच०डी० (आगरा वि०वि०), साहित्याचार्यः (वाराणसेयसंस्कृतवि०वि०)।

प्रकाशिता ग्रन्थाः जैनाचार्य रविषेणकृत पद्मपुराण और तुलसीकृत रामचरितमानस (उ०प्र० शासनपुरस्कृतः), उत्तररामचरितप्रियम्वदाव्याख्या (सहलेखनम्)।

प्रणीतानि काव्यानि : भाति मे भारतम्, जय भारतभूमे, भाति मौरीशसम्, भारतजनताहम् अन्याश्च स्फुटा रचनाः।

नाट्यकृतयः : पण्डितराजीयम् (उ०प्र० संस्कृत अकादमी-पुरस्कृतं ध्वनि-नाटकम्), अभिशापम् (उ०प्र० संस्कृत अकादमी-पुरस्कृतं ध्वनिनाटकम्), द्वयोरपि मञ्चप्रस्तुतिः नैकधा जाताः । पुरश्चरणकमलम्, नाट्यसप्तकम्, (दिल्लीसंस्कृतअकादम्या अखिलभारतीयमौलिकसाहित्यरचनापुरस्कारेण सम्मानितम्) ।

सम्पादिता ग्रन्थाः : संस्कृतसुधा, संस्कृगद्यगुच्छः, अर्वाचीनसंस्कृत-महाकाव्यविमर्शः (खण्डत्रयम्), अर्वाचीनसंस्कृत-साहित्य-परिचयः (खण्डद्वयम्), अर्वाचीनसंस्कृत-संग्रहः (खण्डत्रयम्), अर्वाचीनसंस्कृतम् (त्रैमासिकपत्रम्) १९७९ तः अद्यावधि (दिल्लीसंस्कृतअकादम्या अखिलभारतीय संस्कृतपत्रकारितासम्मानेन सभाजितम्)।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

अनूदिता ग्रन्थाः : डॉ० उमाकान्तशुक्लस्य 'कूहा' खण्डकाव्यस्य, श्री०श्री० सुन्दरराजस्य 'श्रीहनूमत्पञ्चाशत्'-'शरणागतिषोडशी'-'अन्यापदेशकाव्यनां' च हिन्दी भावानुवादाः ।

काव्यपाठः : विदेशेषु मौरीशस-अमेरिका-इटली-प्रभृतिषु देशेषु भारतवर्षस्य विविधराज्येषु च समायोजितेषु विविधसमारोहेषु किञ्च आकाशवाणी-दूरदर्शनयोः १९६३ तः अद्यावधि संस्कृतकाव्यपाठः कृतः। आकाशवाण्याः सर्वभाषा-कविसम्मेलने संस्कृतकविरूपेण अनुवादकर्तृकविरूपेण च सहभागिता कृता।

साम्प्रतिकवृत्तिः : दिल्लीविश्वविद्यालयस्याङ्गभूते राजधानीकालेजे हिन्दीविभागे उपाचार्यः (रीडरः)

आवासः : 'रमालयः' आर-६, वाणी विहारः, नयी दिल्ली-११००५९ (भारतम्) दूरभाषः २५६३९१४६

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

THE POET

Dr. Rama Kant Shukla

Brief Bio-Data

Shukla, (Dr.) Rama Kant : M.A. (Hindi & Sanskrit), Ph.D. (Hindi), Sahityacharya, Samkhyayogachary, *Educationist :* Born at Khurja (U.P.) on December 24; 1940, Mother : Smt. Priyamvada Shukla, Father : Late Shri Brahamanand Shukla, *Sanskrit Gurus* : Vidyavachaspati, Pt. Paramanand Shastri, Pt. Kuber Dutt Shastri and Pt. Brahamanand Shukla *Educ.* Agra Univ. (N.R.E.C. College, Khurja), Sampurnand Sanskrit Vishwavidyalaya, Varanasi (Shree Radha Krishna Sanskrit Mahavidyalaya, Khurja); Lecturer in Hindi, Multanimal Modi (P.G.) College, Modinagar 1962—67; Sr. Lecturer, Rajdhani College, New Delhi (University of Delhi) 1967—86, Reader in Hindi Deptt 1986-2002. Writer-Director, *Bhāti Me Bhāratam* (TV Sanskrit Programme in 20 episodes); Ex-Chairman, All India Sanskrit Journalists Association, Delhi, President A.I.O.C. Pune, 34th Session—Prakrit & Jainism Section, 36th Session, Classical Sanskrit Section and 39th Session (13—15 Oct 1998) Modern Sanskrit Literature Section; 41st Session A.I.Sanskrit Poets Symposium (15.12.2002); Founder Gen. Secy. Devavani Parishad, Delhi, Convener, VIth World Sanskrit Conference Sanskrit Kavi Sammelan, Philadelphia (USA) 1984 and Co-convener Xth WSC Sanskrit Kavi Sammelan, Bangalore; Convener XIth World Sanskrit Poetic Symposium at Turin (Italy) on 4 & 7 April, 2000, Chairman of Session 13E of WAVES (World Association for Vedic Studies) Conference held at Hoboken NJ (USA) on 28—30.7.2000. Convener of a session, Vishva Sanskrit Sammelan organised by the MRHD, Govt. of India at Delhi (5-9.4.2001), Life Member : All India Oriental Conference, Pune, Hindi Anusandhan Parishad, Delhi Univ., Bharatiya Hindi Parishad, Allahabad; Ex Member, Kalidas Samiti, Vikram Univ., Member, Indian Delegation, International Sanskrit Sammelan (Mauritius) 1984; Member International Association of Sanskrit

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

Studies, PARIS. Founder Ch. Editor, *Arvācīnasaṁskṛtam* (quarterly journal of Devavani Parishad, Delhi), participated as Sanskrit poet in AIR Sarvabhasha Kavi Sammelan 1987 and as a translater poet from Sanskrit to Hindi in AIR Republic Day Sarvabhasha Kavi Sammelan held at Delhi & Pune (three times); delivered literary talks, recited Sanskrit Poems and directed self written 10 Sanskrit Plays on AIR 1963-2000; *publs-Uttararāmacaritam* (co-commentary); *Jainācārya Raviṣeṇakrta Padmapurāṇa aur Tulasīkrta Rāmacaritamānasa,* Edited *Arvācīnasaṁskṛtam-ahākāvya- vimarśaḥ (3 Vols.) Arvācīnasaṁskṛta sāhitya paricayaḥ (2 Vols.); Arvācīnasaṁskṛta-saṅgrahaḥ (3 Vols), śriviṣṇu-sahasranāma Satyabhāṣyam (IIIrd Ed. 1996) 'Saṁskṛta Sudhā' 'Saṁskṛta Gadya Gucchaḥ* etc., Translated *'Kūhā'* (Sanskrit Poetry of Dr. Umakant Shukla) and *Śrī Hanumatpañcāśat, Śaraṇ-agatiṣoḍaśī & Anyāpadeśa Kāvyam* (of S. Sundararajan) into Hindi; Contributed Research Papers in various Journals and International and National U.G.C Seminars, Authored *Bhāti Me Bhāratam; Jaya Bhāratabhūme, Bhāratajanatā'ham, Nāṭyasaptakam Sarvaśuklā;* Taperecorded-*Bhāti Me Bhāratam, Kalidāsa's Ritusaṁhāram, Meghadūtam, Kumāra-sambhavam and Raghuvaṁśam, Complete Śrīmadbhāgavatam, Gaṅgālaharī, Saundaryalahari, Śri Hanumat-pañcasát & Śara·n_agati·so·daśi and Śrimad-bhagavadgita, Binsar Mahādeva Stotrāvalī, Bhaktirasāyanam;* Honoured by Felicitation Volume *'Devavāṇī-suvāsaḥ' (Vol. I-II)* Edited by 'Abhiraja' Dr. Rajendra Mishra in 1993. *Awards* and Honours : U.P. Govt. Award; Delhi Sanskrit Akademi Akhil Bhartiya Maulika Sanskrit Rachana Puraskar, Sanskrit Samaradhaka Puraskar, Sanskrit Sahitya Seva Samman (1997), Akhil Bharatiya Sanskrit Patrakarita Seva Samman (2001-2002); Title conferred by various Sanskrit and Hindi Literary Organizations; Sanskrit Rashtrakavi, Kavi Ratna, Kavi Shiromani and Hindi Sanskrit Setu etc., Website : www.loc.gov/acq/ovop/delhi/salrp/sukla *Address (off.)* Reader in Hindi Department, Rajdhani College, (University of Delhi) New Delhi-110015, India; *(Res.) 'Ramālayaḥ',* R-6, Vani Vihar, New Delhi-110059, India. Phone Res. 011-25639146

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

काव्यप्रणेता रमाकान्तशुक्लः

जन्मतिथिः : २४-१२-१९४० ई०

जन्मस्थानम् : खुर्जा (उ०प्र०)

पिता : (स्व०) श्री ब्रह्मानन्द शुक्लः

माता : श्रीमती प्रियम्बदा शुक्ला

शिक्षास्थले : खुर्जास्थश्रीराधाकृष्ण-संस्कृतकालेजः, एन.आर.ई.सी. कालेजश्च।

शिक्षा : एम.ए. (हिन्दी-संस्कृतयोः) पीएच०डी० (आगरा वि०वि०), साहित्याचार्यः (वाराणसेयसंस्कृतवि०वि०)।

प्रकाशिता ग्रन्थाः जैनाचार्य रविषेणकृत पद्मपुराण और तुलसीकृत रामचरितमानस (उ०प्र० शासनपुरस्कृतः), उत्तररामचरितप्रियम्वदाव्याख्या (सहलेखनम्)।

प्रकाशितानि काव्यानि : भाति मे भारतम् (उ०प्र० संस्कृत अकादमी-पुरस्कृतं काव्यम्), जय भारतभूमे (उ०प्र० संस्कृतअकादमी-पुरस्कृतं काव्यम्), भाति मौरीशसम् (काव्यम्), भारतजनताहम् (कवितासंकलनम्), सर्वशुक्ला।

नाट्यकृतयः : पण्डितराजीयम् (उ०प्र० संस्कृत अकादमी-पुरस्कृतं ध्वनि-नाटकम्), अभिशापम् (उ०प्र० संस्कृत अकादमी-पुरस्कृतं ध्वनिनाटकम्), द्वयोरपि मञ्चप्रस्तुतिः नैकधा जाताः । पुरश्चरणकमलम्, नाट्यसप्तकम्, (दिल्लीसंस्कृतअकादम्या अखिलभारतीयमौलिकसाहित्यरचनापुरस्कारेण सम्मानितम्) ।

सम्पादिता ग्रन्थाः : संस्कृतसुधा, संस्कृगद्यगुच्छः, अर्वाचीनसंस्कृत-महाकाव्यविमर्शः (खण्डत्रयम्), अर्वाचीनसंस्कृत-साहित्य-परिचयः (खण्डद्वयम्), अर्वाचीनसंस्कृत-संग्रहः (खण्डत्रयम्), अर्वाचीनसंस्कृतम् (त्रैमासिकपत्रम्) १९७९ तः अद्यावधि (दिल्लीसंस्कृतअकादम्या अखिलभारतीय संस्कृतपत्रकारितासम्मानेन सभाजितम्)।

काव्यपाठः : विदेशेषु मौरीशस-अमेरिका-इटली-प्रभृतिषु देशेषु भारतवर्षस्य विविधराज्येषु च समायोजितेषु विविधसमारोहेषु किञ्च आकाशवाणी-दूरदर्शनयोः १९६३ तः अद्यावधि संस्कृतकाव्यपाठः कृतः। आकाशवाण्याः सर्वभाषा-कविसम्मेलने संस्कृतकविरूपेण अनुवादकर्तृकविरूपेण च सहभागिता कृता।

साम्प्रतिकवृत्तिः : दिल्लीविश्वविद्यालयस्याङ्गभूते राजधानीकालेजे हिन्दीविभागे उपाचार्यः (रीडरः)

आवासः : 'रमालयः' आर-६, वाणी विहारः, नयी दिल्ली-११००५९ (भारतम्) दूरभाषः ०११-२५६३९१४६ (011-25639146)

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi